श्रीगुरुभ्यो नमः

शङ्करभक्तजनसभाग्रन्थावलिः संख्या—१

तन्त्रार्थप्रसूनमालिका



काञ्चीपुरीय - शङ्करभक्तजनसभया
प्रकाशिता

1982

काञ्चीपुरम्

संपादक : श्री. वे. सुब्रह्मण्यशास्त्री

Śaṅkara Bhakta Jana Sabhā Series No. I

TANTRĀRTHAPRASŪNAMĀLIKĀ

By

Nyāya-Vedānta-Vāgīśa, Śāstra-Ratnākara,

Paṇḍitarāja

Śrī V. SUBRAHMAṆYA ŚĀSTRĪ

(Recipient of President and Sahitya Academi's Awards

Reader in Sanskrit, Annamalai University (Retd).

Chief Pandit, Advaita Sabha, Kumbakonam.)

Published by

Śrī Śaṅkara Bhakta Jana Sabhā

Kāñchīpuram - 631502

1982

Editor : Sri V. SUBRAHMANYA SASTRI

PROLOGUE

With the blessings of His Holiness Śrī Māhāsvāmi-pūjyapāda of *Śrī Kāñcī-Kāmakoṭi-pīṭha*, we have immense pleasure in placing before the world of scholars the present work - *Tantrārthaprasūnamālikā* by Śrī Subrahmaṇya Śāstrī, one of the senior authorities in the fields of Nyāya and Advaita Vedānta. Śrī Śāstriar has taught Navya-Nyāya and Advaita Vedānta for over five decades at the Annamalai University, Cidambaram, Sanskrit College, Madras, and at present is teaching at the Advaita Sabhā, Kumbakonam. He is a prolific writer and has edited numerous works on Nyāya and Advaita Vedānta in a remarkable manner. His definitive editions of the works on Nyāya such as the *Trimśacchlokī* with the commentary of Paṭṭābhirāma, the *Nyāyaratna* of Maṇikaṇṭha with the commentary of Nṛsiṁhayajvan, the *Nyāya-sāra* of Bhāsarvajña with the commentaries of Aparārkadeva and Ānandānubhava (in collaboration with Śrī S. Subramaṇya Śāstrī) and of works on Advaita such as the *Brahmānandīyabhāvaprakāśa* byMahāmahopādhyāya Panchāpageśa Śāstriar with *tippaṇa*, the *Bṛhadāraṇyakopanisad-bhāsya-vārtika* of Sureśvarācārya with the commentary of Ānandapūrṇa-vidyā-sāgara testify to Śrī Śāstriar's solid learning and accurate scholarship. His independent treatises such as the *Vivaraṇa*-a commentary on the *lakārātha* section of the *Vyutpattivāda* of Gadādhara, *Prakaṭārthānubandhivicāra*, the *Śābdataraṅgiṇī* and the *Khyātitattvasamīkṣā* display his wide erudition, painstaking scholarship and fine critical judgment. The work *Śābdataraṅgiṇī* has won the Sāhitya Academy Award.

The present work *Tantrārthaprasūnamālikā* - A Garland of Philosophical Gleanings - consists of twelve well-defined chapters, each one designated as *prasūna*. The first four *prasūna*-s deal with the concepts related to Nyāya while the remaining with those related to Advaita Vedānta.

The first *prasūna* is chiefly devoted to an elucidation that the Nyāya school comes nearer to Advaita Vedānta than other schools of thought. The second *prasūna* consists of a detailed discussion regarding the signification of the injunctive suffixes. The third one discusses the question whether Gadādhara of the Nyāya school and Khaṇḍadeva of the Pūrva-mīmāṁsā school were aware of the philosophical positions of one another. The fourth one sets forth the nature and sub-divisions of the instruments of action-*kāraka*-s from the stand-point of *Vyākaraṇa* and that of Nyāya. The criticism levelled against the doctrines of Advaita in the works on Nyāya are critically examined and ultimately disproved in the fifth *prasūna*. The sixth *prasūna* is devoted to a discussion regarding the nature of *viṣayatā* - the characteristic of being an object of knowledge, from the stand-point of Advaita; it is preceded by a thorough criticism of the view-points of the Dvaita, Viśiṣṭādvaita and the Nyāya school in regard to that concept. A detailed analysis of the concepts of liberation and of *māyā* is found in the seventh *prasūna*. The eighth *prasūna* sets forth the principal doctrine of the *Upaniṣad*-s namely, the *dṛṣṭi-sṛṣṭi-vāda* according to which perception itself constitutes creation. The ninth *prasūna* explains the import of the *Chāndogya* text - *vācārambhaṇam vikāro nāmadheyam* according to Advaita and shows that the interpretations of the Viśiṣṭ-ādvaita and the Dvaita schools are not sound. A detailed

analysis of the *sadvidyā* section of the *Chāndogyopaniad* is given in the tenth *prasūna* and the logical significance of the great-saying of the *Upaniṣad* "Thou art that" is explained. In the eleventh *prasūna*, the philosophical texts instructed by Brahmā to Indra are discussed in detail. The twelfth *prasūna* is devoted to the significance of the word *āścarya* found in the *Bhagavad-Gītā* text.

The fine scholarship and good style that mark his other works are continued in this volume too by Śrī Śāstriār. The discriminating selection of material, scholarly research, lucid exposition, and critical acumen characterize this whole work. His Highness the Late Rāma Varmā Parīkṣit, Mahārājā of Cochin in his Foreword to Śrī Śastriar's Commentary on the *Lakārārtha* section of the *Vyutpatti-vāda* wrote in 1948 thus : "Mr Śastri is an erudite scholar and unlike many such, is still a student as well... Mr Śāstri's style is straight and lucid and never produces confusion in the reader's mind by the use of unnecessary verbiage". The present volume too testifies to what has been stated above.

Śrī Śāstriar has had the good fortune of being patronised by His Holiness the Sage of Kāñcī - The Prince among Ascetics and by His Highness the Mahārājā of Cochin - An Ascetic among Princes. In recognition of the services he has rendered to the cause of philosophical literature in Sanskrit, His Holiness The Mahāsvāmipūjyapāda of *Śrī Kāñcī-kāmakoṭipīṭha* conferred upon Śrī Śāstriar the title of *Śāstraratnākara*, His Highness the Late Mahārāja of Cochin the title of *Paṇḍitarāja*, and the Government of India, the President's Award for proficiency in Sanskrit.

The *Śankara-bhakta-jana-sabhā* feels much honoured in sponsoring the publication of the present volume of such a distinguished scholar. It expresses its grateful thanks to the authorities of the Goenka Charities, Madras, to the members of the Reception Committee constituted in connection with His Holiness Śrī Jayendra Sarasvathīsvāmīpāda's visit to Bombay and to Śrī Śivāsthānam Trust, Madras for the financial aid provided to publish this volume.

Sri S. Srinivasan, Chartered Accountant, M/s. N. Sankara Aiyar & Co., Bombay has been kind enough to get financial aid from the above sources. The *sabhā* expresses its deep sense of gratitude to him.

To Brahmaśri N. Ramakrishna Śastrigal, Āsthāna-vidvān of Sri Kānci Mutt, and to Dr N. Veezhinathan of the Madras University, the *Sabhā* expresses its gratitude for attending to the many details of the publication of this volume.

To Sri A. Dayanand Rao, the proprietor of M/s Ananthe-shwarā Print Packs, Mylapore, Madras, the *Sabhā* expresses its sincere thanks for the neat execution of this work at such short notice.

May Goddess *Kāmākṣi* - the *śakti* of the Institution established by Śrī Śankara for the Southern Region, grant Śrī Śāstriar a long life and good health to carry out his academic pursuits.


S. V. Narasimhan
President
Śrī Śānkara-bhakta-jana-sabhā
Kāñcīpuram

24-11-82

परमहंसपरिव्राजकाचार्याः

श्रीकाञ्चीकामकोटिपीठजुषः

जगद्गुरवः श्रीमहास्वामिनः



श्रीचन्द्रशेखरेन्द्रसरस्वतीस्वामिपादाः

ग्रन्थस्यास्य प्रणेतारः



न्यायवेदान्तवागीश - शास्त्ररत्नाकर - पण्डितराज

वे. सुब्रह्मण्यशास्त्रिणः

(भारतराष्ट्रपति - साहित्यआकादमिसंस्थासंमानिताः)

समर्पणम्

पादचारपवित्रीकृतनिखिलदिगन्तानां,

प्रत्यक्षदैवतानां सर्वदा अस्मान् परिरक्षतां

श्रीकाञ्चीकामकोटिपीठजुषां जगद्गुरु - महास्वामिनां

परमहंसपरिव्राजकाचार्याणां

श्रीचन्द्रशेखरेन्द्रसरस्वतीश्रीचरणानां

चरणनलिनयोः विधायानन्तान् साष्टाङ्गप्रणामान्

तन्त्रार्थप्रसूनमालिकां

समर्पयति निबन्धा, वे. सुब्रह्मण्यशास्त्री ।

•

श्रीगुरुभ्यो नमः
नमो गणेशाय

प्रस्तावना

नमाम्यभोगिपरिवारसंपदं
निरस्तभूतिमनुमार्धविग्रहम् ।
अनुग्रमुन्मृदितकाललाञ्छनं
विनाविनायकमपूर्वशङ्करम् ।।

श्रीमच्छङ्करभगवत्पादपरिष्कृते दर्शनीयतमे गभीरे वेदान्तदर्शने, तदुपकरणे विद्वद्बृन्दमनोहारितर्कनिरूपके न्यायदर्शने च, व्युत्पत्त्यतिशयमभिलषतां बालानामुपकृतये नैके प्रकरणग्रन्थाः पूर्वतनैः विद्वद्भिः निबद्धा विलसन्ति । प्रकरणग्रन्थपठनावसरे एव प्रौढग्रन्थतत्त्वार्थपरिशीलनसुलभसमाधीनां दर्शनान्तरीयचोद्यानां परिहारपरिज्ञानं वेदान्तदर्शनावगाहनाभ्यर्हित साधनं भवेदिति समालोच्य, तदा तदा शास्त्रार्थानुबन्धिषु संपाद्यमानेषु लेखेषु, तादृशानां चोद्यानां तत्परिहाराणां च लेखनमकरवम् । बहुतिथे काले गते, संपादितानां शास्त्रार्थलेखानां परिशीलनया, द्वादशविधैः तन्त्रार्थप्रसूनैः ग्रथितां तन्त्रार्थप्रसूनमालिकां गुरुपादाब्जोपहारयोग्यामिमां कृतिमवर्तयम् ।

तत्र, अद्वैतदर्शनसिद्धान्तानुकूलानां बहूनां सिद्धान्तानां स्वीकारात्, वेदान्तदर्शनदूषणे निर्भरविरहात्, न्यायाचार्याणामद्वैतदर्शने स्मरसतः महत्याः श्रद्धाया अवगमाच्च, न्यायदर्शनं वेदान्तदर्शनस्यातीव संनिकृष्टं दर्शनमिति तत्तद्ग्रन्थोद्धारपूर्वकं प्रपञ्चितं **प्रथमे प्रसूने** ।

सर्वोऽपि वेदः कार्यपरः, भूतवस्तुवादी वेदभागो नास्तीति आक्षेपस्य परिहारः निषेधवाक्यं दृष्टान्तीकृत्य प्रतिपादितः आकरग्रन्थेषु । न ब्राह्मणं हन्यादिति निषेधवाक्यम् । तत्र लिङा बलवदनिष्टाननुबन्धिसमीहितसाधनता उच्यते । तदभावः नञा धात्वर्थे हनने बोध्यते । स चाभावः विशेष्यवति विशिष्टाभावत्वात् विशेषणाभावे बलवदनिष्टाननुबन्धित्वाभावे तादृशानुबन्धित्वे पर्यवसितः इति तादृशशाब्दबोधवान् न हनने प्रवर्तते इति निषेधवाक्यं निवर्तकं भवतीति नैयायिकानां सरणिः । इत्थमेव निरुक्तसमीहितसाधनतायाः लिङर्थतामवलम्ब्य, न हन्यादिति वाक्यं अकार्यबोधकमपि हनने बलवदनिष्टाननुबन्धित्वाभावबोधकं यथा प्रमाणं, तथा अकार्यबोधकं सिद्धब्रह्मवस्तुबोधकमपीति समर्थितं वेदान्तदर्शने ।

एवं, तत्त्वमसीति महावाक्ये, तत्पदस्य त्वंपदस्य च लक्षणामपेक्ष्य तत्पदस्यैकस्यैव तदधीनादौ लक्षणाकल्पनं युक्तमिति प्रसक्तमाक्षेपं, विशेषणांशत्यागेन तत्पदार्थविशेष्यचैतन्यबोधः तत्पदशक्त्यैव भवति, लक्षणां नापेक्षते इति वेदान्तिनः प्रतिक्षिपन्ति । तत्र लिङर्थविशेषणांशं बलवदनिष्टाननुबन्धित्वं परित्यज्य विशेष्यस्य इष्टसाधनत्वमात्रस्य श्येनेनाभिचरन् यजेतेत्यत्र शक्त्या लिङा बोधः इति मणिकारवचनमुपोद्बलयन्ति । एवं लिङर्थविषये तद्बोधविषये च वेदान्तसिद्धान्तानुकूलं नैयायिकानां लिङर्थव्यवस्थापनमिति विधिविमर्शनं द्वितीयप्रसूनरूपेण प्रतिपादितमस्ति ।

तत्र (1) नव्यमीमांसकैः श्रीखण्डदेवाचार्यैः भाट्टरहस्ये विधिवादे प्रतिपादितार्थसंग्रहः (2) नव्यवैयाकरणैः श्रीनागोजीभट्टैः लघुमञ्जूषायां निरूपितार्थसंग्रहः (3) वैयाकरणभूषणे श्रीकौण्डभट्टोदीरितप्रमेयसंक्षेपः (4) अन्ते सर्वदूषणपरिहारपूर्वकं न्यायमतनिष्कर्षः इति चत्वारः सन्ति भागाः ।

प्रथमे,

कृतिसाध्यत्वं बलवदनिष्टाननुबन्धित्वं इष्टसाधनत्वं चेति त्रितयं लिङर्थः इति तार्किकमतमयुक्तम्, शक्तित्रयकल्पने गौरवात्, कृतिसाध्यत्वस्य मानान्तरावगम्यतया अन्यलभ्यत्वेनाशब्दार्थत्वात्, प्रवृत्तेः बलवदनिष्टानुबन्धित्वज्ञानरूपप्रतिबन्धकाभावेनोपपत्तेः, बलवदनिष्टाननुबन्धित्वज्ञानस्य प्रवृत्तावहेतुत्वेन तद्विषयस्य लिङर्थताया अयुक्तत्वाच्च। यजेतेत्यादौ, कदाचित् बलवद्द्वेषविषयं आन्तरालिकश्रमं प्रति जनके यागादौ बलवदनिष्टाननुबन्धित्वं बाधेन बोधयितुं न शक्यते। इष्टसाधनत्वमात्रं लिङर्थः, निषेधस्थले अनिष्टसाधनत्वे लक्षणा इति नवीनतार्किकमतमप्ययुक्तम्। प्रवृत्तिप्रयोजकज्ञानविषयेच्छावत्त्वं प्रवर्तकत्वम्। तज्ज्ञानायावश्यमिच्छा ज्ञातव्या। तयैव धात्वर्थपाकादौ इष्टसाधनत्वमनुमीयते इति आक्षेपलभ्यमिष्टसाधनत्वं न लिङर्थः। निषेधस्थले अनिष्टसाधनत्वे लक्षणायां ज्योतिष्टोमेन न यजेत इति लौकिकवाक्यस्य प्रामाण्यापत्तिः। तत्रान्तरालिकश्रमजनके ज्योतिष्टोमे अनिष्टसाधनत्वस्याबाधात्। एवं तार्किकपक्षे अनेककार्यकारणभावकल्पनागौरवमस्ति। पाककृतेः वर्तमानतादशायां चैत्रः पचेदिति प्रयोगापत्तिः। इष्टसाधनपाकानुकूलकृतेर्विषयस्याबाधात्। एवं चैत्रः कीदृशः इति प्रश्ने चैत्रः पचेत्, पचति इत्यादेः सदुत्तरत्वापत्तिरपरिहार्या।

तस्मात् तार्किकपक्षो न युक्तः। परन्तु विधिः प्रवर्तना-प्रवृत्त्यनुकूलव्यापारः। स च लोके प्रवर्तकपुरुषेच्छारूपः। अपौरुषेये तु वेदे वेदस्थलिङ्निष्ठः अलौकिको व्यापारः कल्प्यते। व्यापारमात्रं लिङर्थः। तस्य स्वज्ञानविशेषाधीनानुमितिप्रयोज्यत्वसंबन्धेन तत्त्वेनानुपस्थितेन आख्यातार्थभावनायामन्वयः। संबन्धविशेषलाभः मानान्तराधीनः। निषेधस्थले निवारणा लिङर्थः। तस्य स्वप्रयोज्यानुमितिप्रयोज्याभावप्रतियोगित्वसंबन्धेन भावनायामन्वयः इति निष्कर्षः संग्रहेण वर्णितः।

द्वितीये भागे—

लिङर्थः प्रेरणा । सा च प्रवर्तकनिष्ठः प्रवृत्त्यनुकूलव्यापारः । लोके पुरुषनिष्ठः लिङन्तशब्दप्रयोगः, प्रयुज्यमानः शब्दो वा । अपौरुषेये वेदे वैदिकः लिङ्शब्दः प्रवर्तकः । स एव प्रेरणात्वेन लिङ्शब्दनिष्ठः लिङर्थो भवति । भूतलात्मकस्य घटाभावस्य घटाभावत्वेन भूतल-वृत्तित्वमिव वैदिकप्रेरणायाः प्रवर्तकशब्दनिष्ठत्वमुपपद्यते । प्रेरणात्वं चाखण्डो धर्मः। इष्टसाधनत्वं तु न प्रेरणा, धात्वर्थनिष्ठस्य तस्य प्रवर्तक-निष्ठत्वाभावात् । यागः इष्टसाधनं, तस्मात् त्वं कुरु इति हेतुहेतु-मद्भावेन स्वारसिकप्रयोगात् लिङर्थस्य इष्टसाधनत्वान्यतया प्रतीतेश्च । इष्टसाधनत्वस्येव विनिगमनाविरहेण साध्येष्टकत्वस्यापि लिङर्थता-पत्तेश्च । लिङर्थप्रेरणाविषयत्वेन धात्वर्थे इष्टसाधनत्वमनुमाय प्रवर्तते पुरुषः । न कलञ्जं भक्षयेदित्यत्र आरोपितं कलञ्जभक्षणं प्रेरणाविषयः इति शाब्दबोधः इति मञ्जूषार्थसंक्षेपो न्यरूपि ।

अवश्यज्ञेयमिष्टसाधनत्वमेव प्रवर्तनात्मकं विधिः लिङर्थः । कृतिसाध्यत्वं प्रत्यक्षादिमानान्तरावगतम् । द्वेषाभावेनान्यथासिद्धत्वात् बलवदनिष्टाननुबन्धित्वज्ञानं न प्रवृत्तौ कारणम् । अतः तयोर्न लिङर्थता । न कलञ्जं भक्षयेदित्यादेश्च, अनिष्टसाधनत्वे लक्षणाङ्गीकारेण वा, असुराः इत्यादाविव नञः विरोध्यर्थस्वीकारेण इष्टविरोधि-अनिष्टसाध-नत्वस्य बोधोपगमाद्वा, कलञ्जभक्षणे नरकाभावरूपेष्टसाधनत्वाभाव-बोधस्वीकाराद्वा, कलञ्जभक्षणाभावे नरकाभावरूपेष्टसाधनत्वबोधाद्वा उपपत्तिः इति वैयाकरणभूषणोक्तप्रमेयसंक्षेपोऽकारि तृतीये भागे ।

सर्वदोषपरिहारपूर्वकं न्यायमतसिद्धो लिङर्थः निरूपितः चतुर्थे भागे । इष्टसाधनताज्ञानं विना प्रवृत्त्यनुपपत्तेः सर्वैरङ्गीकारात् अवश्य-ज्ञेयं इष्टसाधनत्वमेव लिङर्थः । प्रवर्तकत्वं च प्रवृत्तिप्रयोजकेष्टसाधन-

त्वबोधकलिङाद्युच्चारयितृत्वे सति स्वतन्त्रत्वम् । नेच्छाघटितम् । अतः अवश्यज्ञेयेच्छया आक्षेपलभ्यत्वादिष्टसाधनत्वं न लिङर्थः इति न युक्तम् ।

यागः इष्टसाधनं, तस्मात् त्वं कुरु इति हेतुहेतुमद्भावेन प्रयोगात् न तल्लिङर्थः इति दूषणं सर्वपक्षसाधारणं, समानसमाधानं च । साध्येष्टकत्वज्ञानस्य कारणत्वे बहुव्रीह्यर्थसंबन्धविषयतायाः कारणतावच्छेदकत्वेन गौरवात्, साध्येष्टकत्वस्यापि लिङर्थतापत्तेरयोगः । चैत्यं न वन्देत, रात्रौ श्राद्धं न कुर्यात्, जलं न ताडयेत् इत्यादिवाक्यानां इष्टसाधनत्वाभावबोधनं विना प्रामाण्यानुपपत्तेः तस्य लिङर्थता स्वीकरणीया। व्यापारवतो कृतिः इति बोधानन्तरं आप्तेच्छाविषयप्रवृत्तिविषयत्वरूपहेतुज्ञानस्य, तत्र हेतौ इष्टसाधनत्वव्याप्तिज्ञानस्य च संपादनक्लेश एव पर्यालोचितः, लिङः इष्टसाधनत्वे शक्ति ग्राहयति । एवं वैदिकशब्दे अलौकिकव्यापारे मानाभावः। वेदस्थलिङ् मां प्रेरयतीति वाक्यं, प्रवृत्तिप्रयोजकेष्टसाधनताबोधकत्वं गोचरयतीति न तेन वैदिकलिङि अलौकिकव्यापारसिद्धिः ।

येषां मते लिङन्तशब्द एव प्रेरणा, तन्मतेऽपि तस्याः स्वात्मकप्रवर्तकनिष्ठत्वं धात्वर्थविषयकत्वं च कल्पनीयमिति गौरवम् । प्रवृत्तिप्रयोजकतया संप्रतिपन्नस्य धात्वर्थनिष्ठस्येष्ट साधनत्वस्य लिङर्थतामात्रं कल्पनीयमिति न्यायमते लाघवं बोध्यम् । पाककृतेः वर्तमानतादशायां चैत्रः पचेदिति प्रयोगस्तु, धानकर्मबोधकधेनुपदे गोत्वस्येव, नव्यमीमांसकमते पङ्कजपदस्य पद्मत्वस्येव, आख्यातार्थकृतिगतभविष्यत्तायाः, कृतेः तत्तल्लिङादिपदज्ञानाधीनत्वस्य वा प्रयोगोपाधितास्वीकारेण सुलभवारणः । धात्वर्थस्य स्वानुकूलत्व, स्वबोधकधातूत्तरतत्तल्लिङादि-

पदज्ञानाधीनत्वोभयसंबन्धेनाख्यातार्थकृतावन्वयस्वीकारेणापि उक्तदोष-परिहारः संभवतीति न किञ्चिदेतत् ।

नवीनतार्किकमतेऽपि ज्योतिष्टोमेन न यजेत इति नापत्तिः, नञ्वति वाक्ये सर्वत्रानिष्टसाधनत्वबोधानङ्गीकारात् । चैत्यं न वन्देत इत्यादौ इष्टसाधनत्वाभावस्य, नातिरात्रे षोडशिनं गृह्णाति इत्यत्र षोडशिग्रहणाभावे इष्टसाधनत्वस्य च बोधोपगमात् ।

बलवदनिष्टाननुबन्धित्वज्ञानस्य प्रवृत्तावहेतुत्वेऽपि न कलञ्जं भक्षयेदिति वाक्यप्रामाण्योपपादनाय तादृशाननुबन्धित्वस्य लिङर्थता आवश्यकी । तदादिन्यायेन बलवद्द्वेषविषयतावच्छेदकत्वोपलक्षितनरक-त्वाद्याश्रयसाधनतात्वावच्छिन्नाभावकूटे तादृशाभावत्वेनानुगते लिङः एका शक्तिः । तात्पर्यवशात् कुत्रचित् नरकासाधनत्वं कुत्रचित् रोगा-साधनत्वं बोध्यते इति नानुपपत्तिः ।

संबन्धानां संबन्धत्वेन संसर्गतया भानं नास्ति । योग्यता-तात्पर्य-ज्ञानादिघटितसामग्रीसत्त्वेन विशेषरूपेणैव संसर्गभानात् । संबन्धत्वेनापि तत्तत्संसर्गविशेषभाननिर्वाहाय तत्तच्छाब्दबोधे समभिव्याहारविशेषरूपा-काङ्क्षाज्ञानस्य हेतुतायाः सर्वैरपि स्वीकरणीयत्वाच्च । तस्मात् बलवद-निष्टाननुबन्धित्वादिकं त्रयं लिङर्थः, यथायथं धात्वर्थादौ शाब्दबोधे भासते इति भट्टाचार्यपरिष्कारानुसारी पन्थाः निरूपितः ।

भाट्टरहस्ये तार्किकसिद्धान्तानां दूषणदर्शनात् संजाते, खण्डदेवा-चार्यैः गदाधरभट्टाचार्योक्तार्थाः दूषिताः इति प्रवादे, असमोचीनता-बुद्धिजननाय, व्युत्पत्तिवाद - भाट्टरहस्यग्रन्थोद्धारपूर्वकं तयोरितरेतर-परिचयाभावः स्फुटीकृतः तृतीये प्रसूने ।

न्यायग्रन्थेषु शाब्दबोधनिरूपणावसरे, शाब्दिकानां प्रक्रियाः निरूप्यन्ते। कुत्रचित् शाब्दिकोक्तरीतिविलक्षणतया तदीयप्रक्रियाः निरूपिताः। कर्मकारकविभजनप्रस्तावे, वाक्यपदीये, निर्वर्त्यं विकार्यं, प्राप्यमिति त्रेधा कर्म विभक्तम्। व्युत्पत्तिवादे, कर्म त्रिविधम् प्राप्यं प्रकृति-विकृती चेति विधान्तरेण विभक्तम्। शाब्दिकग्रन्थेष्वपि हरिकारिका-पाठे न्यूनताधिक्ये, व्याख्यानभेदाश्च दृश्यन्ते। 'प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा।' इति कारिकांशः भूषणसारे नोट्टङ्कितः। वाक्यपदीयस्थेन अनेन कारिकार्धेन निर्वर्त्ये विकार्ये च पक्षभेदो निरूप्यते इति बहवः वदन्ति। हरिवल्लभास्तु विकार्यसामान्यलक्षणपरतया कारिकार्धमिमं योजयन्ति। कैश्चित् इत्यस्य प्रसिद्धैराचार्यैरित्यर्थकतां च ब्रुवन्ति। पक्षभेदान् निरूप्य, गदाधरमतेन वाक्यपदीयकारिकां व्याख्याय, तदुक्तत्रिविधकर्मणां लक्षणनिष्कर्षः वर्णितोऽस्माभिः।

आवरणभङ्गानुकूलव्यापारः जानात्यर्थः। आवरणभङ्गात्मक-क्रियाफलाश्रयत्वात् घटादेः जानातिकर्मता इति शाब्दिकाः। न्याय-मते तु ज्ञानमात्रं धात्वर्थः। विषयत्वमेव गौणं कर्मत्वं घटं जानातीत्यादौ द्वितीयाविभक्तिलक्ष्यमिति वदन्ति। न्यायमते, (१) 'कर्मणि द्वितीया' इति सूत्रं गौणमुख्यन्यायविरोधात् तत्र न प्रवर्तेत, भाष्यवार्त्तिकोक्तस्य कर्मण्येव द्वितीया इति नियमस्य विरोधश्च इत्याक्षेपस्य परिहारः (२) 'अकथितं च' इति सूत्रात् घटादेः कर्मसंज्ञेति केषांचित् पक्षः, (३) विषयताया अपि जानात्यर्थफलतया तदाश्रयत्वेन 'कर्तुरीप्सिततमं कर्म' इति सूत्रेणैव कर्मसंज्ञा इति पक्षः इत्येतत् सर्वं नैयायिकैरवश्यं बोद्धव्यमिति मनसि कृत्वा सर्वमिदं संगृहीतं चतुर्थे प्रसूने।

एतावता न्यायदर्शनानुबन्धिनः शाब्दबोधोपयोगिनश्चांशाः विचा-रिताः। अथेदानीं वेदान्तदर्शनसिद्धार्थानां विचारः प्रस्तूयते।

न्यायनिबन्धेषु, न्यायमञ्जर्यां, न्यायलीलावत्यां, न्यायकन्दल्यां, किरणावल्यां, चिन्तामणौ च तत्र तत्राभिहितानि वेदान्तदर्शनदूषणानि पराक्रियन्ते पञ्चमे प्रसूने । परमार्थसद्भिन्नं असत् अलीकं निरुपाख्यमेवेति व्यवस्थामूरीकृत्य, जयन्तभट्टाः, परमार्थसद्भिन्नत्वेन वेदान्तदर्शनसिद्धस्यात्यन्तासत्त्वमभिप्रेत्य किमपि दूषणं निरूपयन्ति । तच्च दूषणं सदसद्विलक्षणत्वरूपमिथ्यात्वस्य वेदान्तदर्शनसिद्धत्वनिरूपणेन सुनिरसम् । वल्लभाचार्याः स्वकपोलकल्पितान् पक्षभेदान् दूषयन्ति । गङ्गेशोपाध्यायास्तु, कर्मनिरपेक्षस्य तत्त्वज्ञानस्य मुक्तिहेतुत्वमुपगम्यापि, सुखदुःखाभावेतरत्वेन अविद्यानिवृत्तेः पुरुषार्थतानुपपत्तिं वर्णयन्ति । गदाधरभट्टाचार्याः, स्वीये मुक्तिवादे, अन्तःकरण वृत्तिभेद एव साक्षात्कारः मोचकः इति, नवीनतार्किकमते आत्यन्तिकदुरितध्वंसस्यापवर्गस्य दुःखजनकाभावतयेव अविद्यानिवृत्तेरपि पुरुषार्थता इति चोपपाद्य, वल्लभाचार्य-गङ्गेशोपाध्यायोक्तदूषणपरिहारपूर्वकं वेदान्तदर्शनसिद्धमपवर्गं निरूपयन्ति । इत्थं न्यायग्रन्थोक्तानां वेदान्तदर्शनदूषणदूरीकरणं विहितं पञ्चमे प्रसूने ।

ज्ञानविषययोः संबन्धो विषयता । सा च ज्ञानजनककरणसंसर्गाश्रयत्वमेवेति आनन्दतीर्थीयाः मन्यन्ते। अणोर्जीवस्यापृथक्सिद्धं प्रसरणादि क्रियावत् द्रव्यं ज्ञानमित्युच्यते, तेन घटादीनां संयोगादिरेव विषयतेति रामानुजीया अभिप्रयन्ति । प्रकाशस्य सतः तदीयतामात्रनिबन्धनः स्वभावविशेषो विषयता इति आत्मतत्त्वविवेककृन्मतम् । एतन्मतत्रयमपि उपपाद्य निराकृतम् । अतिरिक्ता विषयतेति शिरोमणिभट्टाचार्यमतेऽपि, संबन्धिभ्यामसंबद्धस्य संबन्धत्वासंभवात्, विषयतासंबन्धस्यापि संबन्धान्तरप्रसङ्गेन खण्डनरीत्या अनवस्थादोषग्रासात्, पारमार्थिकः ज्ञानविषययोः संबन्धः न निरूपयितुं शक्यते । अतः मायिकं चित्तादात्म्यमेव

संबन्धः । तेन संबद्धं घटादिकमपि मायिकमेव । अवच्छेद्यावच्छेदक-भावापन्नचित्तादात्म्यानामेव विषयतात्वम् । विशेष्यता-प्रकारतादि-लक्षणं तत्रानन्ताचार्योक्तदूषणपरिहरणं च निर्व्यूढं विषयतासमालोचने षष्ठे प्रसूने ।

सप्तमं प्रसूनं माया-विमुक्तिस्वरूपं वर्णयति । असङ्गमविकारि ब्रह्म त्रिगुणात्मिकां मायाशक्तिं सहायमवलम्ब्य प्रपञ्चमुत्पादयति । ब्रह्मण इव मायाया अपि जगत्प्रकृतित्वं 'योनिश्च हि गीयते' इति ब्रह्मसूत्रं ब्रूते । मायाकार्यविकारस्य मायिकत्वात् न तेन ब्रह्म सविकारं भवति । माया स्वप्रकाशं चैतन्यमावृणोति । नास्ति, न प्रकाशते इति व्यवहारं जनयति । प्रपञ्चं जीवेशादिविभागं च जनयति । ब्रह्मापेक्षया न्यूनपरि-माणापि माया नयनसंनिहिताङ्गुलिः सूर्यमिव ब्रह्म आवृणोति । मध्याह्ने बहिर्देशात् आगत्यापवरकं प्रविष्टस्य प्रकाशो न भासते । आवृतो भवति । तद्वत् स्वप्रकाशोऽप्यात्मा मायया आवृतो भवति ।

माया चेयमविद्यारूपिणी । 'माया चाविद्या च स्वयमेव भवति' इति तापनीयश्रुतेः । चैतन्ये प्रतिबिम्बते अविद्या । तत्र बिम्बभूतः ईश्वरः । प्रतिबिम्बस्तु जीवः । प्रतिबिम्बस्य बिम्बस्वरूपत्वात् जीवः चेतनः, न दर्पणे मुखप्रतिबिम्बवदचेतनः । मायायां प्रलयकाले सर्वप्रपञ्चसूक्ष्मरूपाणि लीनानि । सर्गकाले ततो निःसृत्य स्थूलतया प्रतीयन्ते । 'अस्य सत्व-मसत्वं च दर्शयति' इति नृसिंहतापिनीश्रुतिर्ब्रूते । इयमसन्तं सन्तमिव सन्तमसन्तमिव करोति । हिमः सूर्योदयात् प्रागपि सन् न भासते । सूर्येण भासमानः तमेव हिमभासकं सूर्यमावृणोति । तत्सदृशी माया स्वभासकं साक्षिणमावृणोति । अतो दुर्घटकारिणी माया । इयं न सद्रूपा, 'क्षरं प्रधानममृताक्षरो हरः' इति प्रधानशब्दितमायायाः बाध्यतारूपक्षरत्व-बोधनात् । नाप्यसती, प्रत्यक्षत्वात्, अर्थक्रियाकारित्वाच्च । नापि सद-

सती, सत्वासत्वयोर्विरोधेनासमावेशात् । किन्तु सदसद्विलक्षणा अनिर्वचनीया मिथ्याभूता । मायापदं मिथ्यार्थकम्, ऋतेऽर्थं यत्प्रतीयेत इति भागवतस्मृत्या तथा बोधनात् ।

'नासद्रूपा न सद्रूपा माया नैवोभयात्मिका ।

अनिर्वाच्या ततो ज्ञेया मिथ्याभूता सनातनी ।।' इति वृहन्नारदीयम् ।

सेयमहं ब्रह्मास्मीति अन्तःकरणवृत्तिरूपेण साक्षात्कारेण नश्यति । स्वप्ने दृश्यमानाः अविद्यामयाः व्याघ्रादयः सुप्तपुरुषोत्थापनेन स्वोपादानाविद्यां नाशयन्ति । तथैवाविद्यामयोऽपि साक्षात्कारः स्वोपादानाविद्यां नाशयति । रोगनाशाय पीतमौषधं रोगं स्वात्मानं-औषधं च नाशयति । तथा अविद्यानिवर्तकः साक्षात्कारः अविद्यामिव स्वात्मानं-साक्षात्कारमपि निवर्तयति । अविद्यानिवृत्तौ, अद्वितीयाखण्डपूर्णानन्दात्मनाऽवस्थितिरेव मोक्षः । अविद्यानिवृत्तिरात्मरूपेति न तया अद्वैतहानिः । तदा पूर्णानन्दस्य ज्ञायमानत्वाभावेऽपि पुरुषार्थत्ता भवत्येव । परकीयानन्दः परस्य न पुरुषार्थः, तं प्रत्यावृतत्वात् । स्वीयानन्दस्तु अनावृतः पुरुषार्थः । तथाच अनावृतानन्दत्वमेव पुरुषार्थत्वप्रयोजकमिति अविद्यानिवृत्तेः अनावृताखण्डानन्दात्मकतया पुरुषार्थता अव्याहतेति वर्णयति सप्तमं प्रसूनम् ।

अद्वैतात्मतत्त्वबोधायाधिकारिभेदेन विरचितासु प्रक्रियासु, अतिशुद्धान्तःकरणानामुत्तमाधिकारिणां सुबोधा दृष्टिसृष्टिप्रक्रिया । दृष्टिसमसमया सृष्टिः दृष्टिसृष्टिः । सृज्यमानः ज्ञातैकसत्ताकः, नाज्ञातः ज्ञानोदयात् प्रागस्ति। स्वज्ञानव्याप्यत्वं, स्वाज्ञानाभावव्याप्यत्वं वा दृष्टिसृष्टिरिति निष्कर्षः ।

सुषुप्तपुरुषात् जगतः सृष्टिश्रुतिः, सुषुप्तौ जगतः लयश्रुतिः, 'अव्यक्तादीनि भूतानि' इति गीता, 'अविद्यायोनयो भावाः सर्वेऽमी बुद्बुदा इव' इति वासिष्ठस्मृतिः, लाघवतर्कश्च दृष्टिसृष्टौ प्रमाणम् । अनादि- जीवब्रह्मविभागादीनां न दृष्टिसृष्टिः । एवं सर्वस्यापि दृश्यस्य संस्काररूपा सूक्ष्मावस्थापि न दृष्टिसृष्टिः । तेषां दृश्यत्वादिना मिथ्यात्वं सिद्धयति । अत एव क्षणभङ्गवादनिराकरणमपि संगच्छते । अस्मिन् मुख्यसिद्धान्ते उपक्षिप्ता आक्षेपाः प्रतिक्षिप्ताः ।

घटादिद्वैतप्रपञ्चबोधकानि प्रत्यक्षादीनि तत्त्वावेदकानीति दृष्टिः अधमा । तेषां व्यावहारिकं प्रामाण्यमिति दृष्टिः मध्यमा । जन्यमात्रस्य प्रातिभासिकत्वात् तेषु व्यावहारिकप्रामाण्यबुद्धिः भ्रमः इति दृष्टिः उत्तमा । ईदृशोत्तमदृष्टिविषयः दृष्टिसृष्टिवादो मुख्यः वेदान्तसिद्धान्तः इत्यष्टमं प्रसूनं ब्रूते ।

ब्रह्मसूत्रेषु स्थलत्रये उद्धृतेयमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञा मुख्या भवति । तदुपपादनाय दृष्टान्तबोधकं 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ।' इति छान्दोग्यश्रुतिवाक्यम् । कारणं सत्यं कार्यजातमनृतमनिर्वचनीयं मिथ्या । कार्याणां तत्त्वं (अनारोपितं रूपम्) कारणमेव । तथाच मृत्तिकाज्ञाने सति घटशरावादिकं सर्वमपि तत्त्वतो ज्ञातं भवति । तत्त्वज्ञानमेव ज्ञानमित्युच्यते । कारणमात्रस्य सत्यत्वावधारणं उक्तवाक्यार्थः । अत्र व्याख्याने, वाचारम्भणशब्दस्य नामधेयशब्दस्य च मिथ्यात्वार्थपर्यवसायितया पौनरुक्त्यम्, मृत्तिकैव सत्यमिति वक्तव्ये मृत्तिकेत्येव इत्यत्र इतिशब्दः अनर्थकश्च इत्याक्षेपो न युज्यते । अत्र वाचारम्भणं विकारः इति उद्देश्यसमर्पकम् । नामधेयमिति विधेयसम-

र्थकम् । घटः शरावः इत्यादिवागालम्बनभूतो विकारः, नामधेयं-नाममात्रं मिथ्या इति व्याख्यानमतीव स्वरसम् । नात्र दोषगन्धोऽपि ।

आरम्भणं—उत्पत्तिः वाचा-वागेव । वाचेति प्रथमान्तं पदम् । दुर्निरूपमिति यावत् । असतः सतो वा उत्पत्तेरयोगात् । एवं विकारः—विनाशादिविक्रियायुक्तमनादिदृश्यमपि नामधेयं नाममात्रमित्यपि व्याचक्षते । मृत्तिकेत्येवेत्यत्र इतिशब्दः आद्यर्थकः । मृत्तिकादि सत्यमित्यर्थः । न हि मृत्तिका परमार्थसती । तस्या अपि तत्कारणमेव तत्त्वमिति रीत्या मूलकारणं सदेव सत्यमिति बोधनाय इतिशब्दप्रयोगस्यावश्यकत्वात् । एकविज्ञानेन इति तृतीया अभेदार्थिका । तथाच स्वीयतत्त्वज्ञानाभिन्न-ज्ञानविषयब्रह्मकं सर्वमिति पर्यवसितार्थः । रामानुजीयानां आनन्दतीर्थीयानां च श्रुतिव्याख्याने,अनेकपदलक्षणाश्रयण-योजना-अध्याहारव्याकरण-विरोधादिक्लेशो दर्शितः **नवमे प्रसूने** ।

सारिष्ठा सद्विद्या छान्दोग्यषष्ठे उद्दालकेन पुत्राय श्वेतकेतवे उपदिष्टा । आदौ षष्ठप्रपाठकार्थसंग्रहः, ततः कतिपयश्रुतिवाक्यानामर्थः, आचार्यभाष्यवाक्यतात्पर्यं, सिद्धान्तसिद्धे महावाक्यार्थे परोक्तदोषास्पर्शः तदीयस्य महावाक्यव्याख्यानस्याश्लिष्टता च संग्रहेण दशमे प्रसूने प्रतिपाद्यन्ते । 'उत तमादेशमप्राक्ष्यः' इत्यत्र आदेशपदस्य कर्मव्युत्पत्त्या उपदेशगम्योऽर्थः । उपदेशार्थे वेदे लोके चादेशशब्दप्रयोगात् । कर्मव्युत्पत्तौ व्याकरणविरोधोऽपि नास्ति । आदेशपदस्योपदेशावगम्यार्थकत्वादेव 'उत तमादेशमप्राक्ष्यः' इति उद्दालकवचनमपि संगतं भवति, विना प्रश्नमुपदेशासंभवात् । मृदादिदृष्टान्तैरेकविज्ञानेन सर्वविज्ञानमुपपादितम् । विकाराणां कार्याणामनृतत्वात्, कारणस्यैव तेषां तत्त्वरूपत्वात् कारणस्वरूपज्ञानमेव कार्याणां तत्त्वज्ञानमिति ।

इतः परमुद्दालकोपदेशः प्रारभ्यते । प्रलये सजातीय - विजातीय-स्वगतभेदरहितं सद्रूपमासीत् । तत् बहु स्यामिति मायावृत्तिरूपसंकल्पेन सूक्ष्माणि तेजोऽबन्नानि ससर्ज । तानि तन्मात्राणीत्युच्यन्ते । तत्प्रकृतिके मनसि जले सूर्य इव छायात्मना प्रतिबिम्बात्मना प्रविष्टं सदेव जीव इत्युच्यते । तत् नामरूपव्याकरणमकरोत् । सूक्ष्माणां व्यवहाराक्षमत्वात् व्यवहारक्षमत्वसंपत्तये एकैकं त्रिवृतमकरोत् । त्रिवृत्कृतेन निरुक्तेन तेजोऽबन्नात्मकभूतेन सर्वोऽपि भौतिकः प्रपञ्चः समभूत् । त्रिवृत्करण-प्रक्रियायां 'अपागादग्नेरग्नित्वम्' इत्यादिना कार्याणामनृतता स्पष्ट-मुपवर्णिता । एतावता सर्वोऽपि प्रपञ्चः सद्रूपात् मूलकारणाज्जातः सद्व्यतिरेकेण नास्तीति प्रतिपादितम् ।

जीवश्च मनसि प्रविष्टः, जलानुविधायी जलसूर्य इव मनोऽनु-विधायीति मनः इति शब्देन व्यवह्रियतेऽत्र षष्ठे प्रपाठके । जागरकाले तत्तद्देशगमनादिजन्यश्रमापनुत्तये, सुषुप्तौ स्वस्थानं स्वस्वरूपं गच्छति । अत एव सुषुप्तं 'स्वपिति' इत्याचक्षते । स्वस्वरूपे लीनो भवतीति तदर्थात् । एवं स्वपितिनामनिर्वचनेन जीवस्य स्वरूपं सदेवेति निर्धारितम् । तथा शरीरादिकार्यद्वारेणापि सर्वजगन्मूलं सद्रूपं ज्ञातुं शक्यते । तस्मात् सर्वमपि मूलकारणीभूतसदात्मकमेव, तदेव सत्यं, जीवस्वरूपमपि तदेव । अतः त्वं-श्वेतकेतुः तदसि जगन्मूलभूतं सदसि इति पिता उपदिदेश । ततः, सर्वेषां जीवानां सुषुप्तौ सद्रूपप्राप्तौ सत्यां कुतो न तेषां विविच्य ज्ञानं नास्ति, प्रबोधे स्वस्थानादागतोऽस्मि इति कुतो न जानाति, तरङ्गादीनां जले लये नाश इव सद्रूपप्राप्तौ जीवानां न नाशः इति च श्वेतकेतोः जीवानां सुषुप्तौ सद्रूपगमनविषयिणीः शङ्काः, पुष्परस-नदीजल-वृक्षशाखादिदृष्टान्तैः निराकरोत् । परमसूक्ष्म-रूपत्वेन सतः स्थूलप्रपञ्चकारणत्वे, अज्ञायमानत्वेन चासंभावनाशङ्कां न्यग्रोधबीजदृष्टान्तेन जले निक्षिप्तलवणपिण्डदृष्टान्तेन च निराकृत्य,

जगन्मूलसद्रूपात्मावबोधे आचार्योपदेशरूपमुपायं गन्धारपुरुषनिदर्शनेनोपादिशत्। गन्धारदेशात् तस्करैः पिहिताक्षः अरण्यं प्रापितः पुरुषः विक्रोशमानः, दैववशात् कश्चन कारुणिकं पुरुषमासाद्य, तेन मोचिताक्षिबन्धनः गन्धारदेशगामिमार्गं तदीयवाक्यश्रवणेनावधार्य, स्वयं च मेधावी ग्रामात् ग्रामं पृच्छन् स्वमेव गन्धारदेशं प्राप। तथा सद्रूपात् प्रच्युतः जीवः पुण्यापुण्यतस्करैः देहारण्यं प्रापितः सुखदुःखादीननुभवन् विक्रोशति। कदाचित् दैववशात् लब्धकारुणिकाचार्योपदेशात् नासि त्वं संसारी, किन्तु असंसारिसद्रूपः इति बोधितः, तदुक्तार्थे असंभावनादिकं युक्तिभिरपाकृत्य निश्चितबुद्धिः मेधावी सद्रूपमेव स्वात्मानं प्रतिपद्यते। सत्संपत्तिरेव मोक्षः। परन्तु यस्मिन् शरीरे ज्ञानमुत्पन्नं तच्छरीरपातपर्यन्तं सत्संपत्तौ विलम्बो भवति। शरीरपातपर्यन्तं ज्ञानी जीवन्मुक्तो विहरति। देहे पतिते सत्संपत्तिमवाप्नोति। सत्याभिसन्धत्वात् पुनः न प्रत्यागच्छति। तथाच सर्वमपि सत्कार्यं सद्व्यतिरेकेण नास्ति। तदेव सत्यम्। तदेव सर्वस्यात्मा। हे श्वेतकेतो, जीवः त्वम्। तवापि स्वरूपं जगन्मूलं सद्रूपमेव 'तत्त्वमसि' इत्येवं नवकृत्वः उद्दालक उपदिदेश। क्षीणसकलकल्मषः श्वेतकेतुरपि तदेव तत्त्वदर्शी बभूव इत्याख्यायिकानुबन्धः। ऐतदात्म्यमिति श्रुतिविवरणपरस्य 'एषः आत्मा यस्य तत् एतदात्म तस्य भावः ऐतदात्म्यम्' इति भाष्यवाक्यस्य सप्रमाणं द्वेधा स्वारसिकार्थवर्णनं विहितमस्ति। 'तत्त्वमसीति वाक्यं नैक्यपरम्, शरीरवाचकानां शरीरिपर्यन्तत्वनियमात् जीवब्रह्मणोः शरीरशरीरिभावबोधकमि'ति परकीयव्याख्यानमसंगतम्। असिपदसत्त्वेन 'अहं वै त्वमसि' इत्यादाविव त्वमर्थविशेष्यकस्यैव बोधस्य जननात् तत्र ब्रह्मशरीरकत्वस्य बोधनासंभवात्। ऐक्यपरत्वे तत्पदस्य त्वंपदस्य च लक्षणाया आश्रयणीयतया लाघवेन एकस्मिन्नेव तत्पदे तदधीनादिलक्षणया त्वं तदधीन इत्येव वाक्यार्थः इति परोक्तिरपि न साध्वी। विशिष्टवाचकात् पदात् विशेषणं विहाय विशेष्यमात्रस्य शक्त्यैव बोधः

इति विधिवादे मणिकारैरभिधानात् तत्पदात् त्वंपदाच्च केवलचैतन्यबोधः शक्त्यैव, तत्र लक्षणा इति प्राचीनानामुक्तिरौपचारिकी इति अद्वैतसिद्धौ लघुचन्द्रिकायां च प्रपञ्चितम्।

शब्दो नित्यः घटवत् इत्यत्र घट-दृष्टान्तानुरोधेन अनित्यः इति पदच्छेदवत् अत्रापि **अतत्त्वमसि** इति पदच्छेदः इति तु अतीवासाधु। अभेदप्रतिपादनतात्पर्यकतया दृष्टान्तानां संगमनात्, जीवब्रह्माभेदस्याप्राप्तत्वेन अप्रसक्तप्रतिषेधापत्तेः ब्रह्मज्ञाने जीवज्ञानासंभवेन एकविज्ञाने सर्वविज्ञानप्रतिज्ञायाः मुख्यप्रतिज्ञात्वानुपपत्तेश्च। तस्मात् तत्त्वमसिवाक्यं जीवब्रह्माभेदमेव बोधयतीति **दशमप्रसूनार्थः**।

छान्दोग्ये, देवेन्द्राय ब्रह्मा आत्मविद्यां तत्फलं चोपदिदेशेति श्रूयते। 'एवमेवैष संप्रसादः अस्मात् शरीरात्समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते। स उत्तमः पुरुषः।' इति फलमुक्तम्। तत्र शरीरात् समुत्थानं- श्रवणमननादिजन्यं संप्रसादशब्दितजीवस्य शरीरद्वयविविक्ततया ज्ञानम्। उपसंपत्तिः - परब्रह्मैक्यप्राप्तिः। अभिनिष्पत्तिः- आत्मसाक्षात्कारः इत्येकः पक्षः।

साक्षात्कारानन्तरभावित्वादुपसंपत्तेः, उपसंपद्य अभिनिष्पद्यते इत्यत्र क्त्वाप्रत्ययार्थो न घटते। अतः मुखं व्यादाय स्वपिति इत्यत्र सुप्त्वा मुखं व्यादत्ते इतिवत्, अभिनिष्पद्य उपसंपद्यते इति व्यत्यासः कर्तव्यः इति केचित् मन्यन्ते। 'अव्ययकृतो भावे' इत्यनुशासनात् भावार्थकत्वमेव क्त्वाप्रत्ययस्य। अप्रधानक्रियायाः तात्पर्यविषयतत्तत्संबन्धेन प्रधानक्रियायामन्वयः। वेदमधीत्य तिष्ठतीत्यत्र अध्ययनक्रियायाः समानकालावच्छिन्नव्याप्यव्यापकभावसंबन्धेन तिष्ठतिक्रियायामन्वयः इति वैयाकरणानां सरणिमनुसृत्य, उपसंपत्तिक्रियायाः समानकालावच्छिन्नव्याप्यव्यापकभावरूपसंबन्धः साक्षात्काररूपाभिनिष्पत्तौ बोध्यते इत्यपि सुवचम्।

वस्तुतः झणात्कृत्य कंसः पतितः इत्यत्र झणात्कारजनकतायाः पतनक्रियायां बोधात्, अत्रापि उपसंपत्तिजनकत्वमेव अभिनिष्पत्तिरूपसाक्षात्कारे बोध्यते। मुखं व्यादाय स्वपिति इत्यत्रापि व्यादानजनकत्वमेव स्वापे बोध्यते इति तत्त्वम्।

उपसंपत्तिः-साक्षात्कारः। अभिनिष्पत्तिः—निवृत्ताविद्यातत्कार्यस्वरूपेणावस्थितिः इति फलवाक्ये अपरं व्याख्यानम्। तत्र पक्षे उपसंपत्त्युत्तरकालिकत्वस्याभिनिष्पत्तौ सत्त्वात् नानुपपत्तिशङ्का। परन्तु, ज्ञानादज्ञानध्वंसो न जायते इति श्रीब्रह्मानन्दस्वामिनां पक्षे, नेत्रे निमील्य हसति इत्यत्रेव क्रिययोः समानकालिकत्वमेव प्रतीयते। स्वरूपाज्ञानतत्प्रयुक्तदृश्याधिकरणकालपूर्वत्वानधिकरणकालोपहितत्वमेव स्वरूपाभिनिष्पत्तिः। सा च साक्षात्कारकाले वर्तते इति बोध्यम्।

शरीरात् समुत्थानं—स्वाभेदेन ब्रह्मसाक्षात्कारः। ज्योतिरुपसंपत्तिः—सगुणब्रह्मभावः। यावत्सर्वमुक्ति बिम्बेश्वरभावाभ्युपगमात्। ततः सर्वमुक्तौ चितिमात्रस्वरूपेणाभिनिष्पत्तिः इति अप्पय्यदीक्षितव्याख्याने तु न क्त्वाप्रत्ययार्थानुपपत्तिशङ्काऽपि।

ईदृशनिर्गुणविद्याफलकथनावसरे 'जक्षत्क्रीडन् रममाणः' इत्यादि फलवचनं कथं संगच्छते इति शङ्का समुन्मिषति। सा च, (1) ज्ञानिनः वामदेववत् सर्वात्मभावे देवेन्द्रादिरूपेण जक्षणादिसंभवात् (2) ग्रन्थिभेदवतो ज्ञानिनो जीवन्मुक्तस्य जक्षणादिसंभवात्, (3) ब्रह्मानन्दे जक्षणाद्यभिव्यङ्ग्यसुखविशेषाणामन्तर्भावेण ब्रह्मानन्दानुभवे युगपत् सर्वेषां सुखविशेषाणामनुभवाच्च परिहरणीया इति **एकादशप्रसूनार्थः।**

आत्मज्ञानमेव मुक्तिसाधनम्। तच्चातिदुर्लभम्। दुर्बोधोऽयमात्मा। अतः सर्वैरपि अधिकारिभिः यथाशक्ति आत्मज्ञानाधिगमायः प्रयतितव्यम्

इति सर्वानुपदेष्टुमर्जुनं निमित्तीकृत्य भगवान्, श्रुत्युक्तसरण्या समस्त-शास्त्रार्थसारसंग्राहकं आश्चर्याणां संकलनरूपम् 'आश्चर्यवत्पश्यति कश्चि-देनम्' इत्यादिकं पद्यमुपदिदेश। तत्र ज्ञानिज्ञेयस्याऽऽत्मतत्त्वस्य, तत्साक्षा-त्कारस्य, तद्वतः आत्मदर्शिनः, आत्मतत्त्वोपदेष्टुः, तदीयात्मतत्त्ववचनस्य आचार्यमुखेन आत्मतत्त्वश्रवणादिकं कुर्वतः इहैवावगततत्त्वस्य पुरुषधौरे यस्य च आश्चर्यता अद्भुततुल्यता वर्णिता। तत्राभिहिताश्चर्यानुसन्धानेन भगवत्प्रदर्शितसोपानमार्गेण आत्मतत्त्वविद्यामधिगम्य कृतार्था भवेम इति द्वादशे प्रसूने उपसंहृतम्।

इत्थमवश्यज्ञातव्यचोद्यैः तत्परिहारैः सह न्यायवेदान्तदर्शनीय-प्रमेयजातं विवृण्वतीं तन्त्रार्थप्रसूनमालिकां बालावबोधाय स्वमति-शुद्धये च व्यरचयम्।

अबाल्यान्मामवतां प्रत्यक्षदैवतानां श्रीकाञ्चीकामकोटिपीठजुषां जगद्गुरूणां श्रीमहास्वामिनां विशेषानुग्रहेण जीर्णोऽप्यहं श्रीशङ्कर-जयन्तीपुण्यकाले सतारानगरं गतः श्रीमहास्वामिसंनिधौ पादपातैः अनन्तान् प्रणामान् विधाय, ग्रन्थस्यास्य मुद्रापणप्रकाशनाऽऽज्ञामभ्यर्थयम्। प्रार्थनासमनन्तरमेव 'ग्रन्थोऽयं काञ्चीस्थया शंकरभक्तजनसभया मुद्राप्य प्रकाशयितुं शक्यते, तत्सभानिर्वाहकाय श्रीयुत-वैद्यनाथार्याय प्रेष्यतामयं ग्रन्थः, स सर्वं समीचीनं करिष्यति' इति श्रीमहास्वामिनः अन्वगृह्णन्।

सतारानगरात् प्रतिनिवृत्तः ग्रन्थपरिशीलनं कृत्वा सभाकार्यदर्शिने ग्रन्थमिमं प्राहिणवम्। अस्मदभ्यर्थनामङ्गीकृत्य शास्त्रार्थे परिनिष्ठिताः शास्त्रचिन्तामणिबिरुदांकिताः श्रीमठीयाऽऽस्थानविद्वांसः ब्रह्मश्रीयुत-रामकृष्णशास्त्रिमहोदयाः सावधानं proof पत्राणि परिशोध्य प्रकाशन-मिदं महीकृतवन्तः। तेषां हार्दीं कृतज्ञतां निवेदयामि। समीचीनया रीत्या ग्रन्थमिमं प्रकाशितवतां काञ्ची-शङ्करभक्तजनसभानिर्वाहकाणां मदीयां

कृतज्ञतामाविष्करोमि । महास्वामिनामाज्ञां शिरसि निधाय परिष्कृतया पद्धत्या-सोत्साहं ग्रन्थमिमं मुद्रापितवते काञ्चीशंकरभक्तजनसभाकार्यदर्शिने श्रीयुत-वैद्यनाथार्याय नैका आशिषः प्रयुञ्जे । सानुग्रहया दृष्ट्या ग्रन्थमिममवलोक्य, दूरीकृत्य दोषजातं गुणलेशानुमोदनेन जनोऽयमनुग्राह्यः इति विद्वत्तल्लजान् प्रार्थये । रमणीयया सरण्या विना विलम्बं ग्रन्थमिमं मुद्रापितवतां अनन्तेश्वरा प्रिन्ट पेक्स् मुद्रणालयाधिकृतानां अभिनन्दनानि वितरामि ।

अविघ्नेन मुद्रणादिकार्यनिनिर्वर्तनायानुग्रहं कृतवतां श्रीकाञ्चीकामकोटिपीठाधिपतीनां परमहंसपरिव्राजकाचार्याणां श्रीजयेन्द्रसरस्वतीश्रीचरणानां चरणयोरनन्तान् प्रणामान् समर्पयामि ।

आबाल्यात् जनमिमं सर्वथा संरक्षतां शास्त्रज्ञलोकानुग्रहतत्पराणां प्रत्यक्षदैवतानां श्रीकाञ्चीकामकोटिपीठजुषां जगद्गुरूणां श्रीमहास्वामिनां चरणनलिनयोः पादपातैरनन्तान् प्रणामान् विधाय, अन्ते भगवत्स्मरणं जननाग्रहं चाभ्यर्थयमानः मदीयां प्रस्तावनामुपसंहरामि ।

ब्रह्मविदामनुग्रहाकाङ्क्षी

वे. सुब्रह्मण्यशास्त्री

8 रङ्गरायरग्रहारः
कुम्भघोणम्
24-9-82

श्रीगुरुभ्यो नमः

तन्त्रार्थप्रसूनमालिकायाः

विषयानुक्रमणिका

—:o:—

विषयः पुटसंख्या

स्वर्गं प्रति साधनत्वं न लिङर्थप्रवर्तनया अनुमातुं शक्यमिति न तत् प्रवर्तनालभ्यमपि । न्यायमते, समभिव्याहृतपदोपस्थापितकामनाविषयस्वर्गादिनिष्ठधर्मावच्छिन्ननिरूपितनियतपूर्ववृत्तितावच्छेदकधर्मवत्त्वरूपस्वर्गसाधनत्वं (निष्कृष्टं) लिङर्थः इति स्वीक्रियते । तथाच प्रवृत्तिप्रयोजकमिष्टसाधनत्वं लिङर्थः । चैत्यं न वन्देत इति वाक्यस्य इष्टसाधनत्वाभावबोधकतयैव प्रामाण्यमुपपादनीयमिति इष्टसाधनत्वस्य लिङर्थत्वमावश्यकम्। प्राभाकरमते धानकर्मत्वशक्तस्य धेनुपदस्य गोत्वमिव, योगरूढानङ्गीकारे पङ्कजपदस्य पद्मत्वमिव च आख्यातार्थकृतेः तत्तत्प्रवृत्तिप्राक्कालीन- तत्तल्लिङादि पदज्ञानोत्तरत्वं लिङ्पदप्रयोगोपाधिः इति स्वीकारेण, धात्वर्थस्य स्वानुकूलत्वस्वबोधकधातूत्तर-तत्तत्प्रवृत्तिप्राक्कालीनतत्तल्लिङादिपदज्ञानोत्तरत्वोभयसंबन्धेन आख्यातार्थकृतावन्वयस्वीकारेण वा, पाककृतेः वर्तमानतायां पचेदिति प्रयोगापत्तिः सुलभवारणा । चैत्रः कीदृशः इति प्रश्नस्य चैत्रः पचेदिति न सदुत्तरम् । तेन चैत्रे जिज्ञासितधर्मावच्छिन्नाभेदस्याबोधनात् । यागः इष्टसाधनं तस्मात्कुरु इति प्रयोगेणाऽऽक्षेपः सर्वपक्षसाधारणः सर्वपक्षसमानसमाधानश्च । नव्यतार्किकमते ज्योति-

विषयः पुटसंख्या

ष्टोमेन न यजेतेति न प्रयोगः, विधानोत्तरनिषेधे नातिरात्रे इत्यत्रैव धात्वर्थाभावे इष्टसाधनत्वस्य, रात्रौ श्राद्धं न कुर्वीत इत्यत्रैव धात्वर्थे इष्टसाधनत्वाभावस्य वा बोधेन, तस्य बाधात्। नञः सत्वे सर्वत्र अनिष्टसाधनताबोधानङ्गीकारात्। भवन्मतेऽपि इष्टसाधनत्वाभावाक्षेपस्वीकारात्। तस्मादिष्टसाधनत्वं लिङर्थः इति सिद्धम्। 50-64

7. मधुविषसंपृक्तान्नभोजने प्रवृत्तिवारणाय बलवदनिष्टाननुबन्धित्वज्ञानस्यापि प्रवृत्तिहेतुत्वात् बलवदनिष्टाननुबन्धित्वमपि लिङर्थः। बलवदनिष्टानुबन्धित्वज्ञानस्य प्रवृत्तौ प्रतिबन्धकत्वे, तज्ज्ञानाभाव-तादृशानुबन्धित्वव्याप्यवत्तानिश्चयाभाव-तादृशानुबन्धितावच्छेदकतया गृहीतधर्मनिश्चयाभावादीनां बहूनां हेतुत्वकल्पनापत्त्या गौरवात्। नापि द्वेषाभावेन उक्ताननुबन्धित्वज्ञानस्यान्यथासिद्धिः। कारणताग्राहकयोः स्वतन्त्रान्वयव्यतिरेकयोः सत्वात् द्वेषाभावस्यैव तज्ज्ञानेनान्यथासिद्धिप्रसङ्गात्। कदाचित् द्वेषविषयान्तरालिकदुःखजनकयागादौ नव्यमीमांसकोक्तरीत्या यागत्वसामानाधिकरण्येन बलवदनिष्टाननुबन्धित्वं बोधयितुं शक्यते। अर्थवादेन बोध्यमानं प्राशस्त्यं तु प्रकृष्टतत्तत्फल-

विषयः | पुटसंख्या

विषयः	पुटसंख्या
कार्यकारणभावानङ्गीकारात्। धातुत्वादेरखण्डोपाधित्वेऽपि, पचेत् इत्यादौ पचधातौ पाकपदत्वभ्रमकाले शाब्दापत्तेः। शाब्दाबोधे धातुत्वादिज्ञानानपेक्षणेन धातुत्वेन ज्ञानपदजन्योपस्थितेः कारणत्वस्यासंभवाच्च। स्पष्टा चेयं सरणिः व्युत्पत्तिवादे राजपुरुषवादे। सर्ववादिभिरपि तत्र तत्र बोधे तत्तत्पदसमभिव्याहाररूपाकाङ्क्षाज्ञानघटितसामग्र्याः कारणत्वं कल्पनीयमेव। मीमांसकैरपि लिङर्थव्यापारस्य कृतौ एकसंबन्धास्वीकारेण संबन्धत्वेनापि तत्तद्व्यक्तिविशेषभानाङ्गीकारात्। वस्तुतः संबन्धस्य विशेषरूपेणैव संसर्गतया भानं, न संबन्धत्वेन। कृतिसाध्यत्वमपि लिङर्थः, तज्ज्ञानस्य प्रवृत्तिहेतुचिकीर्षाकारणत्वात्। कुरु इत्यत्र बाधान्न तस्य बोधः। न कलञ्जमित्यादौ लिङर्थस्य नरकासाधनत्वस्याभावः नञा धात्वर्थे बोध्यते इति शब्दादेव निवर्तकज्ञानलाभः। अभावं न गच्छतीत्याद्यनुरोधेन नञर्थस्य प्रकृति - प्रत्ययार्थयोः मध्ये भानस्य क्लृप्तत्वात्। धात्वर्थे लिङर्थाननुबन्धित्वाभावबोधेऽपि भाष्य - भामत्यादिवाक्यानि समञ्जसानि। ततः इष्टसाधनत्वादित्रितयं लिङर्थः इति निष्कर्षः।	6 -78

विषयः	पुटसंख्या

विषयः	पुटसंख्या

पञ्चमं प्रसूनम्

विषयः	पुटसंख्या

विषयः पुटसंख्या

विषयः पुटसंख्या

शुभं भूयात्

ॐ

श्रीगुरुभ्यो नमः

॥ तन्त्रार्थप्रसूनमालिका ॥

प्रारम्भाः फलिनः प्रसन्नहृदयः यश्चेत्तिरश्चामपि
नो चेद्विश्वसृजोऽप्यलं विफलतामायान्त्युपायोद्यमाः ।
विश्वैश्वर्यमतो निरङ्कुशमभूद्यस्यैव विश्वप्रभोः
सोऽयं विश्वहिते रतो विजयते विघ्नेश्वरो विश्वकृत् ॥ १ ॥

विद्याप्रदं विश्वगुरुं प्रणमामि महेश्वरम् ।
शास्त्रार्थेष्वस्खलन्तीनां वाचामुद्भूतिसिद्धये ॥ २ ॥

तत्त्वदर्शिमुनिप्रोक्ततन्त्रार्थैः विविधैः सुमैः ।
ग्रथिता मालिका भूयात् सुमनोबृन्दतोषिणी ॥ ३ ॥

तत्त्वदर्शिनो महर्षयः दुःखपङ्कनिमग्नानामुद्धाराय दुःखोच्छेदितत्त्वज्ञानाधायकानि दर्शनानि रचयामासुः । तेषु महर्षिबादरायणप्रणीतं वेदान्तदर्शनं रमणीयतमं दर्शनम् । 'तत्त्वं तु बादरायणात्' इति अभियुक्तवचनम् । तत्र तर्काप्रतिष्ठानादिवर्णनात् तर्कविद्यात्मकं अक्षपादगौतममुनिप्रणीतं न्यायदर्शनं वेदान्तदर्शनात् सुदूरविप्रकृष्टमिति मतिरुदेति । तामपनेतुं, न्यायदर्शनं वेदान्तदर्शनस्य संनिकृष्टं दर्शनमिति दर्शनद्वयसिद्धान्तपरिशीलनेन निरूपयितुमारभ्यते ।

परमपुरुषार्थः मोक्षः, श्रेयः निःश्रेयसं, अपवर्गः, मुक्तिः इत्यादिशब्दैरभिधीयते । स चात्मतत्त्वसाक्षात्काररूपात् ज्ञानादेव संपद्यते, 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' 'तरति शोकमात्मवित्' 'ब्रह्मविदाप्नोति परम्' 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुतिभ्यः । मिथ्याज्ञानात् संसारबन्धो भवति । मिथ्याज्ञाननिवृत्तिद्वारा आत्मतत्त्वज्ञानं मोक्षं साधयति, 'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनात्कुमारः ।' इति श्रुतेः मोक्षप्रतिबन्धकनिवृत्तेः ज्ञानसाध्यत्वावगमात् । आत्मतत्त्वप्रतिपादनप्रणाल्या वेदान्तदर्शनस्यापि मोक्षः फलमिति प्रतिपादयन्ति औपनिषदाः वेदान्तिनः ।

नैयायिका अपि, आत्मतत्त्वसाक्षात्कारेण अपवर्गसंपत्तिं निरूपयन्ति । आत्मा, शरीरं, इन्द्रियं, तदर्थः, बुद्धिः, मनः, प्रवृत्तिः, दोषः, प्रेत्यभावः, फलं, दुःखं, अपवर्गश्चेति हेयोपादेयभावेन व्यवस्थितं द्वादशविधं प्रमेयम् । 'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्' इति न्यायसूत्रम् । एतस्य मिथ्याज्ञानात् संसारः, तत्त्वज्ञानादपवर्गः । तत्र शरीरादिकं दुःखान्तं हेयमेव । अपवर्गः उपादेय एव । आत्मा तु विशिष्टरूपेण हेयः, विशेषगुणशून्यतया उपादेयः । आत्मतत्त्वज्ञानमेव साक्षात् मोक्षहेतुः । आत्मैव तत्त्वतो ज्ञेयः ।' इत्यात्म**तत्त्वविवेकः** । 'दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः ।' (न्या-सू-4-2-1) इति न्यायसूत्रविवरणावसरे, मतभेदेन तत्त्वज्ञानप्रतिपादनप्रसङ्गे, 'शरीरेन्द्रियाद्यतिरिक्तनित्यात्मदर्शनमिति वृद्धाः ।' इति स्वमतं निरूपयन्ति **न्यायवार्तिकतात्पर्यटीकाकाराः** । आत्मतत्त्वज्ञानं च दुःखनिदानं मिथ्याज्ञानं निवर्तयति । ततश्च कारणनिवृत्त्या तत्कार्याणां रागद्वेषमोहानां दोषाणां निवृत्तिः । ततः तत्कार्यभूतायाः धर्माधर्माख्यप्रवृत्तेरपायः । ततः तत्कार्यजन्मनोऽपाये सति

दुःखस्य निवृत्तिः । मूलकारणहान्या पुनर्दुःखानुत्पादेन आत्यन्तिकदुःखध्वंसरूपापवर्गः संपद्यते इति ।

समन्वयसूत्रभाष्ये शंकरभगवत्पादैः, आत्मज्ञानेन मिथ्याज्ञाननिवृत्त्या मोक्षमभिधाय, तदुपष्टम्भकतया सबहुमानं न्यायसूत्रं वर्णितम्—"तथाचाचार्यप्रणीतं न्यायापबृंहितं सूत्रं, 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः।' [न्या-सू. 1-1-2] इति"।

एवं, औपनिषदानां नये, मुक्तौ ज्ञानमेकमेव कारणं, न कर्मापि । तयोर्विरोधात् । अत एव ज्ञानिनां कर्मत्यागः 'अग्निहोत्रं न जुहवांचक्रिरे' इत्यादिश्रुतिषु श्रूयते । अतः नात्मज्ञानकर्मसमसमुच्चयः । परन्तु ज्ञानोत्पत्तिप्रतिबन्धकानां चित्तदोषाणामपाकरणे कर्मोपयुज्यते । अतः कर्म आरादुपकारकम् । चित्तशुद्धये तीव्रविविदिषोत्पादपर्यन्तमेव कर्माण्यपेक्ष्यन्ते, न ततः परमपि ।

'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥' [भ. गी.] इति गीतास्मरणात् ।

'प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः ।
कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव ॥' इति **नैष्कर्म्यसिद्धौ सुरेश्वराचार्याः** निरूपयन्ति । सति प्रसङ्गे तत्र तत्र **ज्ञानकर्मसमुच्चयवादनिराकरणे** महान्निर्भरोऽवगम्यते भगवत्पादानाम् । नैयायिका अपि, इतरनिरपेक्षमेव ज्ञानं मोक्षकारणम् । तत्त्वज्ञानं हि मिथ्याज्ञानोच्छेदेन दृष्टविधयैव कारणम् । दिङ्मोहादौ कर्मविनाकृतस्य तत्त्वज्ञानस्यैव मिथ्याज्ञाननाशकत्वमवधारितम् । अतः कर्मनिरपेक्षमेव तत्त्व-

ज्ञानं मिथ्याज्ञानोच्छेदकारणम् । कर्म तु तत्त्वज्ञानजनने उपयुज्यते इति स्पष्टं प्रतिपादयन्ति । तदुक्तं **चिन्तामणौ** अनुमानपरिच्छेदावसाने मुक्तिवादे—"संसारकारणोच्छेदक्रमेण कार्योच्छेदान्मोक्षः । एवंच तत्त्वज्ञानमात्रादेव मिथ्याज्ञानोच्छेदादपवर्गः । तत्र न तस्य कर्मसहकारित्वम् । मिथ्याज्ञानोन्मूलने कर्मविनाकृतस्यैव तस्य दिङ्मोहादौ हेतुत्वावधारणात् । कर्मणामपवर्गहेतुताश्रुतिश्च तत्त्वज्ञानद्वाराप्युपपद्यते, साक्षात् तस्याश्रुतेः । तत्त्वज्ञानवतश्च नित्याकरणेऽपि दोषाभावेन प्रत्यवायाभावोपपत्तेः । अन्यथा भोगार्थं विहितनिषिद्धाचरणेन धर्माधर्मोत्पत्तौ मोक्षाभावप्रसङ्गः ।" [2078-पत्रे] इति ।

"एतेन सत्वशुद्धिद्वारेणारादुपकारकं कर्म । संनिपत्योपकारकं च ज्ञानमिति मन्तव्यम्, न तु तुल्यकक्षतया तत्समुच्चयः ।" इति **किरणावल्यामुदयनाचार्या** वर्णयन्ति ॥

अपिच, अपवर्गः संसारान्मुक्तिः । अविद्यादोषवद्भिः शरीरोपादानपूर्वकं धर्माधर्मतारतम्यनिमितं सुखदुःखतारतम्यमनुभूयते । प्रियाप्रियसंबन्ध एव संसारः । यावत्शरीरसंबन्धं प्रियाप्रियसंस्पर्शो भवति । 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति ।' (छा.) इति श्रुतेः । शरीरसंबन्धाभावे प्रियाप्रियसंस्पर्शात्मकसंसारो नास्ति । 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छा.) इति श्रुतेः । मुक्तं चाशरीरं ब्रूते 'अथायमशरीरो ब्रह्मैव तेज एव ।' इत्याद्या श्रुतिः । तस्मादशरीरः परममुक्तः ।

भगवत्पादाश्च मुक्तिमशरीरत्वपदेन व्यपदिशन्ति । 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इति प्रियाप्रियस्पर्शप्रतिषेधात् चोदनालक्षणधर्माधर्मकार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यते

इति गम्यते । 'अत एवानुष्ठेयकर्मफलविलक्षणं मोक्षाख्यमशरीरत्वमिति सिद्धम् ।', 'तदेतदशरीरत्वं मोक्षाख्यम् ।' इति च । इदमेव विदेहकैवल्यं, सत्संपत्तिरिति चोच्यते । इत्येवं वेदान्तिनः परमां मुक्तिं निरूपयन्ति ।

नैयायिका अपि, न्यायसूत्र - तद्भाष्य - प्रशस्तपाद भाष्यादिषु स्पष्टमेव मुक्तस्याशरीरत्वं वर्णयन्ति । 'तदभावश्चापवर्गः' (न्या-सू-4-2-45) इति **अक्षपादसूत्रम्** । तच्चापवर्गे शरीरेन्द्रियाद्यभावं ब्रूते । तत्र 'तस्य-बुद्धिनिमित्ताश्रयस्य शरीरेन्द्रियस्य धर्माधर्माभावादभावः अपवर्गः ।' इति **वात्स्यायनभाष्यम्** । 'तदा निरोधात् निर्बीजस्यात्मनः शरीरादिनिवृत्तिः । पुनः शरीराद्यनुत्पत्तौ दग्धेन्धनानलवदुपशमो मोक्षः ।' इति **प्रशस्तपादाचार्याणां भाष्यम्** ।

अपिच, मुक्तिः जीवन्मुक्तिः, विदेहमुक्तिरिति द्विविधा । 'विमुक्तश्च विमुच्यते ।' इति मुक्तस्य पुनर्मुक्त्यवाप्तिबोधकश्रुतेः जीवन्मुक्तस्य भोगावसाने शरीरपाते विदेहमुक्तिरिति स्पष्टं ज्ञायते । 'अथ मर्त्योऽमृतो भवति अत्र ब्रह्म समश्नुते ।' इति श्रुतिः ज्ञानानन्तरमिह जीवद्दशायामेव ब्रह्मभावात्मकमुक्तिं शास्ति । जीवन्मुक्तश्च देहाभिमानरहितः । यथा वल्मीके अहिना त्यक्तः निर्मोकः तादात्म्येन पूर्ववत् नानुभूयते तथा अयं अशरीरः शरीरतादात्म्याभिमानशून्यः ब्रह्मरूपः शेते इति, 'तद्यथा अहिनिर्ल्वयिनी वल्मीके प्रत्यस्ता शयीत, एवमेवायमशरीरः शेते ब्रह्मैव तेज एव ।' इति आम्नायो ब्रूते । वस्तुतः चक्षूरहितोऽपि चक्षुष्मानिव, श्रोत्रशून्योऽपि सश्रोत्र इव भातीति जीवन्मुक्तं वर्णयति 'सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव ।' इत्यादिकं श्रुत्यन्तरम् ।

गीतासु स्थितप्रज्ञपदेन तमभिधाय तल्लक्षणसंभाषणोपवेशनादयः प्रपञ्चिताः । वासिष्ठे—, जीवन्मुक्तेरवान्तरावस्थाभेदादिकं भारते— ब्राह्मणपदेन जीवन्मुक्तं प्रतिपाद्य तदीयस्वभावचर्यादिकं सूतसंहितायां अतिवर्णाश्रमिशब्देन तमुक्त्वा तदीयचर्यादिकं च विस्तरेण वर्ण्यते । प्रारब्धकर्मफलभोगावसाने अन्ते चरमसाक्षात्कारेण विश्वमायानिवृत्तौ सता संपद्यते, 'भूयश्चान्ते विश्वमायानिवृत्तिः' 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये' । इत्यादिश्रुतिभ्योऽवगम्यते इति औपनिषदा वर्णयन्ति ।

'शरीरे पतिते अशरीरत्वं स्यात् न जीवतः' इति आक्षेपमुद्भाव्य, मिथ्याभिमानरूपत्वात् सशरीरत्वस्य तत्त्वज्ञानेन मिथ्याज्ञाननिवृत्तौ सिद्धं जीवतोऽपि विदुषः अशरीरत्वमिति जीवन्मुक्तिं स्थापयन्ति भगवत्पादाः । तथाच भाष्यं "तस्मात् देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादावहंप्रत्ययो न गौणः । तस्मात् मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य, सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम् ।" इति । एवं स्वानुभवप्रकटनेनापि जीवन्मुक्तिं व्यवस्थापयन्ति, 'अनारब्धकार्ये एव तु पूर्वे तदवधेः ।' (ब्र. सू-4-1-15) इति सूत्रे भाष्यकाराः । तदुक्तम्—

"अपि च नैवात्र विवदितव्यं ब्रह्मविदा कंचित्कालं शरीरं ध्रियते न वा ध्रियते इति । कथं ह्येकस्य स्वहृदयप्रत्यक्षं ब्रह्मवेदनं देहधारणं चापरेण प्रतिक्षेप्तुं शक्येत ।" इति ।

नैयायिका अपि मुक्तिद्वैविध्यमभ्युपगच्छन्ति । न्यायदर्शने प्रथमसूत्रव्याख्यानावसरे- 'निःश्रेयसं पुनः दृष्टादृष्टभेदात् द्वेधा भवति ।' इति, द्वितीयसूत्रावतरणप्रसङ्गे 'निःश्रेयसस्य परापरभेदात्' । इति, चतुर्था-

ध्याये 'एतं च तं प्राहुः जीवन्नेव विद्वान् संहर्षायासाभ्यां मुच्यते ।' इति च उद्योतकराचार्याः **न्यायवार्त्तिके** निरूपयन्ति । अत्र वार्त्तिके परनिःश्रेयसपदेन विदेहमुक्तिः, अपरपदेन जीवन्मुक्तिश्चाभिहिता ।

द्वितीयसूत्रावतरणे, **तात्पर्याचार्याः**, 'अथ परिनिष्पन्नध्यानोपायः साक्षात्कारवतीं प्रतिपद्य चतुर्थीं प्रतीतिं निर्मुक्तसकलक्लेशजालः अप्रवर्तमानो धर्माधर्मसाधनेषु निरुद्धानागतधर्माधर्मप्रबन्धोत्पादः भूतेन्द्रियविजयी प्रज्ञाज्योतिः जीवन्नेव मुक्तः इत्युच्यते ।' इति सन्दर्भेण जीवन्मुक्तिं विवृण्वन्ति ।

वर्धमानोपाध्यायाश्च कुसुमाञ्जलिप्रकाशे, 'स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।' इति श्लोकव्याख्याने, "स्वर्गयोः—उत्कटरागगोचरयोः अपवर्गयोः - अपरपरयोः मुक्त्योः मार्गं - उपायमित्यर्थः । तथाच परापरमुक्त्योरेकानुष्ठानसाध्यतां दर्शयता, जीवन्मुक्तिसहिता परममुक्तिः साध्येति दर्शितम्" इति मुक्तिद्वैविध्यं स्पष्टं विवेचयन्ति । अपि च, ब्राह्मणोऽहम्, स्थूलोऽहमित्यादिप्रत्ययाः देहात्मैक्याध्यासरूपाः, न गौणाः । सिंहो माणवकः इत्यादिगौणस्थले सिंहमाणवकयोरिव देहात्मनोर्विवेकग्रहाभावात् । मम देहः इति षष्ठ्यन्तोल्लेख्यमपि ज्ञानं नावश्यं भेदविषयकम्, अभेदेऽपि राहोः शिरः, घटस्य स्वरूपमित्यादौ षष्ठ्यन्तोल्लेखात् । शरीरे बाल्ययौवनाद्यवस्थाभेदेन व्यावर्तमानेऽपि अहमित्येवमात्मनोऽनुवृत्तत्वदर्शनेन युक्त्या जनितमपि भेदज्ञानं न साक्षात्काररूपस्य ब्राह्मणोऽहमित्यध्यासस्य बाधकं भवति । प्रत्यक्षात्मकं च भेदज्ञानं नास्ति । वस्तुतः, भिन्नरूपेणाभेदग्रहे विभिन्नरूपेण भेदग्रहो न बाधकः । तथाच देहत्वादिना भेदग्रहः न ब्राह्मणत्वादिनाऽभेदाध्यासविरोधी । नाहं ब्राह्मण इत्यादिविवेकग्रहश्च नास्ति । अतः अहं ब्राह्मणः इत्यादिप्रत्ययः देहात्मैक्याध्यास एव ।

यावदयं प्रमाता प्रमाणान्युपादाय व्यवहरति, तावत् देहात्मैक्याध्यासवानेव । अजाविपालानामिव व्युत्पन्नचित्तानामपि पण्डितानां शरीरादौ निरुपचारेण अहमिति प्रत्ययो भवति । पश्वादीनां व्यवहारस्याविवेकपुरस्सरत्वात् विदुषामपि व्यवहारः व्यवहारत्वसामान्यात् अविवेकपुरस्सर एव । ईदृशाध्यासः सर्वानर्थहेतुः, आत्मतत्त्वसाक्षात्कारेणैव निवर्तते । मुक्तिप्रयोजकज्ञानोत्पत्तिपर्यन्तमनुवर्तमानः ब्राह्मणोऽहमित्यादिप्रत्ययः अध्यासरूप एव । तथापि लोके तस्य प्रमाणतया कल्पनमस्ति । न हि ब्राह्मणोऽहं गच्छामि इति जानन्तं, तथा वदन्तं वा पुरुषं भ्रान्ततया व्यवहरन्ति लौकिकाः । एवमेव प्रपञ्चस्य बाधितत्वेन अप्रमाणमपि तज्ज्ञानं प्रमाणतया परिकल्प्य लोकव्यवहारो भवति इति औपनिषदमतसारार्थः । इमानि च भगवत्पादभाषितानि— 'न चानध्यस्तात्मभावेन देहेन कश्चित् व्याप्रियते । न चैतस्मिन् सर्वस्मिन्नसति असङ्गस्यात्मनः प्रमातृत्वमुपपद्यते ।'

'पश्वादीनां च प्रसिद्धः अविवेकपुरःसरः प्रत्यक्षादिव्यवहारः । तत्सामान्यदर्शनात् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारः तत्कालः समान इति निश्चीयते ।'

'आत्मानात्मविवेकिनामपि पण्डितानामजाविपालानामिवाविविक्तौ शब्दप्रत्ययौ भवतः । तस्माद्देहातिरिक्तात्मास्तित्ववादिनां देहादावहंप्रत्ययो मिथ्यैव न गौणः ।

'एवमयमनादिरनन्तः नैसर्गिकोऽध्यासः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः । अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते ।' इत्यादीनि ।

'देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः ।
लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात् ।।'

इति ब्रह्मविदां गाथाप्युद्धृता भाष्ये ।

नैयायिका अपि 'अनात्मनि शरीरादौ आत्मबुद्धिः अहमस्मीति बुद्धिः अहङ्कारः । स च बन्धमुत्पादयति । स चात्मतत्वज्ञानान्निवर्तते । प्रसंख्यानात् सम्यग्दर्शनं यथाभूतार्थावबोधो जायते । समाने विषये मिथ्याज्ञानसम्यग्ज्ञानयोर्विरोधात् सम्यग्दर्शनेन शरीरादौ अहमस्मीति आत्माभिमानस्य मिथ्याज्ञानस्य निवृत्तौ अध्यात्मं बहिश्च विविक्त-चित्तो विहरन् मुक्तः इत्युच्यते' इति निरूपयन्ति । तथाच 'दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः' (न्या-सू-4-2-1) इति न्यायसूत्रस्य भाष्यम्—

किं पुनस्तत् मिथ्याज्ञानम्? अनात्मन्यात्मग्रहः अहमस्मीति मोहः अहङ्कारः इति । किं पुनस्तदर्थजातं, यद्विषयोऽहङ्कारः शरीरेन्द्रियमनो-वेदनाबुद्धयः ।...एवं चतसृभिर्विधाभिः प्रमेयं विभक्तमासेवमानस्य अभ्यस्यतः-भावयतः सम्यग्दर्शनं - यथाभूतावबोधः तत्त्वज्ञानमुत्पद्यते । एवंच शरीरादि दुःखान्तं प्रमेयं दोषनिमित्तम्, तद्विषयत्वान्मिथ्या-ज्ञानस्य । तदिदं तत्त्वज्ञानं तद्विषयमुत्पन्नमहङ्कारं निवर्तयति, समान-विषये तयोर्विरोधात् । तन्निवृत्तौ अध्यात्मं शरीरादि प्रसञ्चक्षीत । तत्प्रसंख्यानादध्यात्मविषयोऽहङ्कारो निवर्तते । सोऽयमध्यात्मं बहिश्च विविक्तचित्तः विहरन् मुक्त इत्युच्यते ।" इति ।

अत्र "आसेवमानस्य, अभ्यस्यतः, भावयतः, इति पर्यायकथनं भावनादाढर्योपदर्शनार्थम् । प्रसंख्यानं - समाधिजं तत्त्वज्ञानम् ।" इति तात्पर्यटीका अनुसन्धेया ।

इत्थं च मोक्षहेतुभूतेन समाधिभावनजन्यात्मतत्त्वदर्शनेन देहादावनात्मनि आत्मबुद्धिरूपः मिथ्याज्ञानापरपर्यायः अहङ्कारः निवर्तते इति फलितम् । **श्रीगदाधरभट्टाचार्या** अपि, **हेत्वाभाससामान्यनिरुक्तौ** अत्रवदन्तिकल्पविवरणावसरे, नाहं गौरः इत्यादियौक्तिकज्ञानसत्त्वेऽपि, शरीरे आत्माभिमानरूपमिथ्याज्ञानजन्यवासनारूपदोषबलेन अहं गौरः इति अनाहार्यमानसप्रत्यक्षस्योत्पत्तिं वदन्तः मोक्षहेतुतत्त्वदर्शनेन मिथ्याज्ञानवासनानिवृत्तिपर्यन्तं देहात्मैक्याध्यासमनुवर्तमानं मन्यन्ते ।

एवं, जगतः उपादानं सदसद्विलक्षणं तमःशब्दितं भावरूपं अनादि अज्ञानाविद्यामायानीहारादिशब्दैः श्रुतिषु निरूप्यमाणं सृष्टेः प्रागासीत् । 'नासदासीन्नो सदासीत्तदानीं तम आसीत्' । 'मायां तु प्रकृतिं विद्यात्' 'अविद्यायामन्तरे वर्तमानाः' 'नीहारेण प्रावृताः ।' इत्यादिश्रुतिभ्यः । तच्च तमः आत्मसाक्षात्कारेण प्रकाशेन निवर्तते । अनादिभूतस्य निवृत्तिः, 'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनात्कुमारः' 'त्वं हि नःपिता योऽस्माकमविद्यायाः परं पारं तारयसि' 'क्षरं प्रधानम्' 'भूयश्चान्ते विश्वमायानिवृत्तिः' इत्यादिश्रुतिसिद्धा । अनादेः प्रागभावस्य घटोत्पादे नाशो दृश्यते, न तु अनादेर्भावस्य । तस्मादनादिभावत्वात् अविद्याया निवृत्तिर्न घटते इति न शङ्कनीयम् । अनादिरत्यन्ताभावः न नश्यति, तद्वत् अनादिरभावात्मकः प्रागभावोऽपि न नश्येत्, अनाद्यभावत्वस्य अत्यन्ताभाव इव तत्रापि सत्वात् । यदि प्रागभावस्य नाशाभावे घटोत्पादकव्यापाराणां व्यर्थता स्यादिति अनादेरपि प्रागभावस्य नाशः स्वीक्रियते, तदा अज्ञानस्यानादेरनिवृत्तौ प्रमाणव्यापारव्यर्थता आपद्येत, अज्ञाननिवृत्तेरेव तत्फलत्वात् । अतः अनादेरपि भावस्याज्ञानस्य निवृत्तिरुपेया । तथाच अनाद्यभावत्वं यथा अविनाशित्वे न प्रयोजकं, तथा अनादिभावत्वमपि । तथा जन्यत्वमपि

न विनाशित्वे प्रयोजकम्, जन्यस्य ध्वंसस्याविनाशात् । तस्मात् विनाश-सामग्रीसंनिपातः विनाशित्वप्रयोजकः । तदभावश्चाविनाशित्वप्रयोजकः । एवं नाशकसामग्रीसत्त्वेन अविद्याया अनादेरपि निवृत्तिरुपपद्यते इति औपनिषदा वर्णयन्ति । अत्रानादिबन्धस्य ज्ञानेन निवृत्तिप्रति-पादनावसरे, पार्थिवाणुगतस्यानादेः रूपस्य पाकेन नाशः स्वीक्रियते इति पक्षप्रदर्शनेन अनादिभावस्य निवृत्तिः उपपादिता नैयायिकैः । 'अणु-श्यामताऽनित्यत्ववद्वा' (न्या-सू -4-1-67) इति न्यायसूत्रम् । पार्थिवपर-माणुर्नित्यः । तस्य श्यामरूपम्, 'यत्कृष्णं तदन्नस्य' इति श्रुतेः । तच्च रूपमनाद्यपि अग्निसंयोगेन नश्यति । तद्वत् क्लेशसन्ततेरना-दित्वेऽपि निवृत्तिर्भवतीति सूत्रार्थः । तथाचानादिभावभूताविद्या-निवृत्तिर्नानुपपन्नेति निश्चिनुमः ।

अपि च, आत्मसाक्षात्कारात्मकविद्यया आविद्यकस्य नामरूपा-त्मकसर्वदृश्यस्य निवृत्तिं 'विद्वान्नामरूपाद्विमुक्तः' इति श्रुतिर्बोधयति । आत्मसाक्षात्कारोऽपि अन्तःकरणवृत्तिभेदः नामरूपात्मकदृश्यान्तर्गतः । तस्य परिशेषे विद्यया दृश्यसामान्यनिवृत्तिर्न घटते इति नाशङ्कनीयम् । कलुषे जले प्रक्षिप्तं कतकरजः जलगतं रजोऽन्तरं निवर्तयति, स्वयं च नश्यति । एवं रोगनाशाय सेव्यमानमौषधं रोगं नाशयति, स्वयमपि नश्यति । तथा साक्षात्काररूपः दृश्यः दृश्यान्तराणि निवर्त्य स्वयमेव निवर्तते । तस्मात् दृश्यपरिशेषाभावात् श्रुतिबोधितायाः विद्यया दृश्यसामान्यनिवृत्तेः न बाधः इति वेदान्तिनो ब्रुवते ।

न्यायमते मोक्षे आत्मनः अशेषविशेषगुणोच्छेदः सिद्धान्तितः । मोक्षपूर्ववर्तिज्ञानस्योच्छेदः स्वयमेव भवति नान्येन क्रियते । यथा बह्निः दाह्यं काष्ठं विनाश्य स्वयमपि नश्यति तद्वदिति वह्निदृष्टान्तः निरूप्यते 'वह्नेः दाह्यं विनाश्यानुविनाशवत्तद्विनाशः' इति न्यायसूत्रे ।

'यथैधांसि समिद्धोऽग्निः भस्मसात्कुरुतेऽर्जुन ।
'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥'

इति **गीतायां** ज्ञानस्य अग्निसादृश्योक्तेः, स्वयं निवृत्तौ अग्नेरेव दृष्टान्ततयाऽभिधानमतिसमीचीनम् ।

"सा चावस्था न हेया, मोक्षनगरगोपुरायमाणत्वात् । निर्वाणं तु तस्य स्वयमेव, यामाश्रित्य न्यायमतोपसंहारः ।" इति **बौद्धाधिकारे न्यायाचार्याः** । "आत्मविषयकनिर्विकल्पकावस्था पूर्वावस्थावत् न हेया मोक्षप्रत्यासत्तेः । ननु न्यायदर्शने सकलवैशेषिकगुणोच्छेदो मोक्षः, कथं तत्र निर्विकल्पकज्ञाननिवृत्तिः, तत्राह - **निर्वाणं त्विति** यथा वह्निः दाह्यं विनाश्य स्वयमेव निर्वाणं, एवं ज्ञानस्य स्वयमेव निर्वाणं - नाश इति ।' इति तत्र **नारायणार्यटीका** बोध्या ।

अपि च, ब्रह्म चिद्रूपं ज्ञानमित्युच्यते । घटाद्यर्थस्य प्रकाशः ज्ञानम् । 'ज्ञातुरर्थप्रकाशस्य ज्ञानत्वात्' इत्युक्तं विवरणे । संसारदशायां अर्थविशिष्टः प्रकाशः । मुक्तिदशायां दृश्याभावात् अर्थोपलक्षितप्रकाशरूपः ज्ञानं ब्रह्मेति औपनिषदा वदन्ति ।

नैयायिकमते, आत्मा चेतनः न ज्ञानरूपः, किंतु ज्ञानाश्रयः । संसारदशायां ज्ञानविशिष्टोऽपि मुक्तौ न ज्ञानाश्रयः ज्ञानहेतोरभावात्, अशेषविशेषगुणोच्छेदस्यैव मोक्षे स्वीकारात् । तथापि ज्ञानोपलक्षितः आत्मा मुक्तिदशायां चेतनः इति व्यवस्थापितम् ।

अपिच, न ब्राह्मणो हन्तव्यः इत्यादिनिषेधवाक्यानां कार्यपरतां विनापि प्रामाण्यवत्, वेदान्तानामपि सिद्धे ब्रह्मणि तात्पर्यवत्त्वं प्रामाण्यं च वर्णयन्ति भगवत्पादाः समन्वयसूत्रभाष्ये । विधिप्रत्ययस्य

न कार्यमर्थः । अपितु बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनता । तदभावः नञा ब्राह्मणहनने बोध्यते । इष्टसाधनत्वरूपविशेष्यबति हनने विशिष्टेष्टसाधनत्वाभावः विशेषणाभावे बलवदनिष्टाननुबन्धित्वाभावे पर्यवसन्नः । तद्बोधात् हननान्निवर्तते पुरुषः । अतः निषेधवाक्यं निवर्तकं भवति । इति वेदान्तिनां सरणिः । तथाच परिमलः — "न हन्यादित्यनेन हननगतबलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वाभावावगतिः, ततो बलवदनिष्टानुबन्धित्वकल्पनं, तेनोद्यतं खड्गादिकं परावर्तनीयमिति बुद्धिः, ततस्तत्परावर्तनवैशिष्ट्येन लब्धपरिपालनतया निवृत्तिरूपापन्नौदासीन्यप्राप्तिरिति क्रमः इति । इयमेव सरणिः नैयायिकानामभिमता ।

किंच, औपनिषदाः, 'स वा एष महानज आत्मा, योऽयं विज्ञानमयः प्राणेषु ।' इति श्रुत्यनुसारेण जीवं विभुमामनन्ति । 'एषोऽणुरात्मा' इत्यादिकं अणुव्यपदेश्यं बुद्धिगुणसारत्वेन संगमयन्ति । ब्रह्मात्मैकत्वप्रतिपक्षिणस्तु जीवस्याणुत्वमिच्छन्ति । नैयायिकास्तु, अस्मदादिभिरुपभोग्यायाः जलधरादेः वर्षणादिक्रियायाः तद्भोगजनकादृष्टवता अस्मदाद्यात्मना सुदूरस्थितजलधरसंयोगेन उत्पादं ब्रुवाणाः दूरस्थितजलधरादिसंयोगिनं विभुमाचक्षते जीवात्मानम् । जीवस्याणुत्वे तेनैव ज्ञानायौगपद्यादिमनःकार्याणां निर्वाहात् मनसोऽणुत्वासिद्धिप्रसङ्गमुद्भावयन्ति । 'महतो महीयांसम्' इति श्रुतिमपि प्रमाणयन्ति ।

"विभवान्महानाकाशस्तथाचात्मा' इति वैशेषिकसूत्रम् । "अणुरेवासौ विज्ञानासमवायिकारणसंयोगाश्रयत्वात् मनोवत् । 'अणोरणीयांसम्' इति बाधविरोधौ इति कश्चित् । तदयुक्तम्-आत्मन्यविभौ मनसोऽणुत्वासिद्धेः, तत्संयोगक्रमादेव क्रियाक्रमोपपत्तेः ।

आगमस्तु महतो महीयांसमिति प्रथमपादमपहायोपन्यस्तः । तदलमनेन ।" इति **बौद्धाधिकारे न्यायाचार्याः** । जीवविभुत्ववादश्चौपनिषदमतसंनिकृष्टो बोध्यः ।

एवं, 'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः ।' इति श्रुतिः ईश्वरास्तित्वसाधकमनुमानप्रमाणं वर्णयति इति वेदान्तिनः । "अनेकविशेषणप्रतिषेधप्रयासादस्तित्वं तावदक्षरस्यापगमितं श्रुत्या । तथापि लोकबुद्धिमपेक्ष्याशङ्क्यते यतः, अतोऽस्तित्वायानुमानं प्रमाणमुपन्यस्यति "एतस्य वा अक्षरस्येति।" इति **बृहदारण्यकभाष्यम्** । नैयायिकाः क्षित्यादीनां धृत्या विधारकः कश्चिदस्तीति परमेश्वरमनुमिमते । **न्यायाचार्याः** 'क्षित्यादि ब्रह्माण्डपर्यन्तं जगत् साक्षात् परम्परया वा विधारकप्रयत्नाधिष्ठितं, गुरुत्वे सत्यपतनधर्मकत्वात् वियति विहङ्गमशरीरवत् तत्संयुक्तद्रव्यवच्च इत्यनुमानमुपन्यस्य, अत्राप्यागमः 'एतस्य वा अक्षरस्य प्रशासने द्यावापृथिव्यौ विधृते तिष्ठतः इति । निरूपयन्ति **न्यायकुसुमाञ्जलौ** पञ्चमस्तबके ।

'यतो वा इमानि भूतानि जायन्ते ।' इति श्रुतौ जगत्कारणमीश्वरोऽभिहितः । छान्दोग्ये 'अन्नेन शुङ्गेनापो मूलमन्विच्छ, अद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ ।' इत्यादिना पृथिव्यादिकार्यकारणानुमानद्वारा जगन्मूलं सद्रूपमवधारितम् । एतत्सर्वमनुसृत्य क्षित्यादिकार्येण तत्कारणमीश्वरमनुमिमते नैयायिकाः । तदुक्तं भाष्ये-'एतदेवानुमानं संसारिव्यतिरिक्तेश्वरास्तित्वसाधनं मन्यन्ते ईश्वरकारणिनः ।' इति । शास्त्रार्थनिश्चयाय **केनोपनिषद्वाक्यभाष्ये** कार्यलिङ्गकानुमानमपि निरूपयन्ति भगवत्पादाः ।

"श्रुतिस्मृतिप्रसिद्धिभिः नित्यसर्वविज्ञाने ईश्वरे सर्वात्मनि सर्वशक्तौ सिद्धेऽपि शास्त्रार्थनिश्चयार्थमुच्यते। तस्येश्वरस्य सद्भावसिद्धिः कुतो भवतीत्युच्यते। यदिदं जगत् देवगन्धर्वयक्षरक्षःपितृपिशाचादिलक्षणं द्युवियत्पृथिव्यादित्यचन्द्रग्रहनक्षत्रं विचित्रं विविधप्राण्युपभोगयोग्यस्थानसाधनसंबन्धि, तत् अत्यन्तकुशलशिल्पिभिरपि दुर्निर्माणं देशकालनिमित्तानुरूपनियतप्रवृत्तिनिवृत्तिक्रमं एतद्भोक्तृकर्मविभागज्ञप्रयत्नपूर्वकं भवितुमर्हति, कार्यत्वे सति यथोक्तलक्षणत्वात्, गृहप्रासादरथशयनासनादिवत् इति।"

"वेदैश्च सर्वैरहमेव वेद्यः वेदान्तकृत् वेदविदेव चाहम्।' इति भगवद्गीता। वेदान्तकृत् इति पदेन वेदान्तार्थसंप्रदायकृत्त्वं, वेदवित् इत्यनेन वेदार्थवित्त्वं चोक्तमिति वेदान्तिनो वदन्ति। इमं गीतार्थमनुसृत्य, आयोजनात् ईश्वरानुमानं वर्णयन्ति नैयायिकाः।

'न हि वेदादव्याख्यातात् कश्चिदर्थमधिगच्छति। न चैकदर्शिनो व्याख्यानमादरणीयम्। 'पौर्वापर्यापरामृष्टः शब्दोऽन्यां कुरुते मतिम्' इति न्यायेनानाश्वासात्। त्रिचतुरपदकादपि वाक्यादेकदेशश्राविणोऽन्यथार्थप्रत्ययः स्यात्। किमुतातीन्द्रियादन्तरान्तरवाक्यसंभेददुरधिगमात्। अतः सकलवेदतदर्थदर्शी कश्चिदेवाभ्युपेयः। अन्यथाऽन्धपरम्पराप्रसङ्गात्। स च श्रुताधीतावधृतस्मृतसाङ्गोपाङ्गवेदार्थः तद्विपरीतो वा न सर्वज्ञादन्यः संभवति। को हि अप्रत्यक्षीकृतविश्वतदनुष्ठानः एतावानेवायमाम्नायः इति निश्चिनुयात्। कश्चार्वाग्दृक् निःशेषाः श्रुतीर्ग्रन्थतोऽर्थतो वा अधीयीत, अध्यापयेद्वा। अत्रापि प्रयोगः— वेदाः कदाचित् व्याख्याताः अनुष्टातृमतिचलनेऽपि निश्चलार्थानुष्ठानत्वात् यथा मन्वादिसंहितेति।" इति कुसुमाञ्जलिः।

अयं तु विशेषः, वेदान्तिभिः स्वोक्तार्थे श्रुतिं प्रमाणमुपन्यस्य तदुपबृंहणतया अनुमानं निरूप्यते। नैयायिकास्तु स्वाभिमतार्थसाधकतया अनुमानं प्रमाणीकृत्य तदनन्तरमाम्नायार्थसंग्रहं कुर्वन्तीति। स्वाभिमतार्थविरुद्धार्थस्य श्रुतिभिर्बोधने, अर्थवादानां सामरस्येन प्राशस्त्ये इव, तादृशश्रुतिवाक्यानां सामस्त्येनान्यत्र तात्पर्यं वर्णयन्ति। न तु श्रुत्यक्षराणि अन्यथा व्याचक्षते।

"निष्प्रपञ्च आत्मा ज्ञेयो मुमुक्षुभिरिति तात्पर्यं प्रपञ्चमिथ्यात्वश्रुतीनाम्। आत्मन एवैकस्य ज्ञानमपवर्गसाधनमिति अद्वैतश्रुतीनाम्, बहिःसंकल्पत्यागे निर्मनस्कश्रुतीनाम्, आत्मैवोपादेयः इत्यानन्दश्रुतीनामिति नेयम्।" इत्यात्मतत्त्वविवेकः।

अपि च, नैयायिकानामौपनिषदमतदूषणे महानभिनिवेशो नास्ति। मुक्तिस्वरूपविचारे, **वल्लभाचार्यो**दीरितं ब्रह्मसंवेदनस्य ब्रह्मस्वरूपत्वेन प्रपञ्चबाधकत्वानुपपत्तिदूषणं अन्तःकरणवृत्तेः प्रपञ्चबाधकत्वप्रदर्शनेन, मणिकारोक्तं सुख-दुःखाभावेतरत्वेन अविद्यानिवृत्तेः अपुरुषार्थत्वदूषणं आत्यन्तिक-दुःखजनकदुरितध्वंसस्येव दुःखसाधनाभावत्वात् पुरुषार्थत्वप्रदर्शनेन च निराकृत्यैव, औपनिषदसंमतमुक्तिस्वरूपं स्वीये मुक्तिवादे **श्रीगदाधरभट्टाचार्याः** वर्णयन्ति।

न्यायसारव्याख्यानेऽपि **अपरार्कमहाराजाना**मौपनिषदमते आदरो लक्ष्यते।

'विद्यासन्ध्योदयोद्रेकादविद्यारजनीक्षये।
यदुदेति नमस्तस्मै कस्मैचिद्विश्वतस्त्विषे॥'

इति **न्यायाचार्याणां** मङ्गलश्लोकः,

'ओं नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।

अखण्डानन्दबोधाय पूर्णाय परमात्मने ।।' इति **दीधितिकाराणां रघुनाथशिरोमणीनां** मङ्गलश्लोकश्च औपनिषददर्शनानुसारी स्वरसतः प्रतिभाति । अत एव, नित्यसुखज्ञानरूपायेति व्याख्यानं वेदान्तिनामेव शोभते इत्यभिधाय, समासान्तरस्वीकारेण 'अखण्डानन्दबोधाय इति पद व्याचक्षते **श्रीगदाधरभट्टाचार्याः** । न्यायमतपरिष्काराय रचितेषु उदयनाचार्याणां स्वतन्त्रग्रन्थेषु अद्वैतब्रह्मवादिदर्शने बहुमानोऽवगम्यते । तथाहि - न्यायकुसुमाञ्जलौ उपक्रमे भगवतो भवस्य सर्ववादिसिद्धत्वनिरूपणावसरे, आदौ 'नित्यशुद्धबुद्धमुक्तस्वभावः इत्यौपनिषदाः' इति सबहुमानमौपनिषदपदेन अद्वैतब्रह्मवादिनो व्यवहरन्ति । पञ्चमस्तबके 'प्रपञ्चं पुरस्कृत्य निष्प्रपञ्चतयोपनिषत्सु' (परमेश्वरो गीयते) इति निष्प्रपञ्चं ब्रह्म उपनिषद्भिर्बोध्यते इति वदन्ति । सर्वदा प्रपञ्चनिर्माणैदम्पर्याभावात् तत्कृतलेपाभावाच्च अन्ततः कार्यविरहात् निष्प्रपञ्चत्वमिति व्याख्याने चोदक्षरता अतिस्फुटा । न च तृतीयस्तबके 'तथा सति शङ्कैव न स्यात्, सर्वं मिथ्या भविष्यतीतिवत्' इति मिथ्यात्वपक्षदूषणप्रतिभानात्, कथं तेषामद्वैतवादे बहुमान इति वाच्यम् । माध्यमिकाः शून्यवादिन एव सर्वमिथ्यात्ववादिनः नौपनिषदाद्वैतब्रह्मवादिनः । अतः तत्र माध्यमिकमतदूषणमेव प्रतीयते, नौपनिषदमतदूषणम् ।

यत्तु, विशिष्टाद्वैतिमर्यादां मनसि कृत्वैव क्वचिदाह—"सर्वावेशनिबन्धनश्च सर्वतादात्म्यव्यवहारः "आत्मैवेदं सर्वमिति" इति वचनम् । तदुत्तानोल्लपितम् । यतः चिदचिदात्मकस्य सर्वस्य प्रपञ्चस्य ब्रह्मशरीरत्वं, शरीरवाचकानां शरीरिपर्यन्तता चाङ्गीकृत्य तर्वस्य ब्रह्मशरीरत्वात् शरीरशरीरिभावं पुरस्कृत्य, सर्वतादात्म्यव्यवहारमुप-

पादयन्ति विशिष्टाद्वैतिनः। महता संरम्भेण कर्ता शरीर्येव इति नियमं पराकृत्य प्रपञ्चकर्तुः अशरीरतां व्यवस्थापयतामुदयनाचार्याणां शरीर-शरीरिभावनिबन्धनं आत्मैवेदं सर्वमिति सामानाधिकरण्यं इति कथम-भिमतं भवेदिति कृतबुद्धयो विवेचयन्तु। प्रत्युत, तद्वाक्यसमनन्तरं प्रवृत्ते 'यथा एक एव मायावी अश्वो वराहो व्याघ्रो वानरः किन्नरो भिक्षुस्तापसो विप्रः इत्यादि।' इति वाक्ये मायाविदृष्टान्तोपादानात् औपनिषदाभिमत एव आत्मैवेदं सर्वमिति सामानाधिकरण्यनिर्वाहः साधुरिति तेषामभिसन्धिरिति वक्तुं युक्तमिति बोध्यम्।

अपि च, बौद्धाधिकारे, प्रथमे परिच्छेदे क्षणभङ्गवादो निराकृतः। द्वितीये, विज्ञानव्यतिरेकेण बाह्यार्थो न सन्निति वादं विज्ञान-व्यतिरिक्तार्थस्थापनेन निराकृत्य, अन्ते—

'न ग्राह्यभेदमवधूय धियोऽस्ति वृत्तिः तद्बाधके बलिनि वेदनये जयश्रीः।' इति विज्ञानवादिदूषणोपसंहारपद्यमस्ति।

ग्राह्यभेदं—घटादिबाह्यार्थं अवधूय - तिरस्कृत्य धियः वृत्तिर्न संभवति। प्रत्यक्षप्रमाणसिद्धघटादीनामलीकत्वोपगमासंभवात्। श्रुति-प्रमाणेन परोक्षस्य मिथ्यात्वनिश्चयस्य सत्त्वेऽपि, मूलाज्ञानरूपोपादान-स्यानिवृत्त्या घटादिप्रत्यक्षभ्रमस्यानुवृत्त्या ऐन्द्रजालिकवत् तेषां ज्ञान-व्यावर्तकत्वं भवति। बाह्यार्थबाधके मूलाज्ञाननिवर्तके ब्रह्मसाक्षा-त्कारे जाते सति परमपुरुषार्थसिद्धिरिति, अनिर्वचनीयवादे वेदसंमते बलिनि - सर्वमतेभ्यो बलवति जयश्रीः - जयोत्कर्षकाष्ठा इति पद्यार्थः। अत्र अनिर्वचनीयवादे वेदसंमतत्वस्य बलवत्त्वस्य जयश्रीमत्त्वस्य च कथनं तत्र बहुमानातिशयं सूचयति। यत्तु, नीलपीतादीनां वस्तूनां

बाधपक्षे वैलक्षण्याभावात् ज्ञानक्षणिकत्वसाधकयुक्त्यभावात् स्थिरज्ञानवादिवेदान्तिपक्ष एव विजयेतेति, क्षणिकविज्ञानसन्ततिरूपात्मवादिनः पक्षात् अद्वैतपक्षस्य बलवत्त्वमुच्यते, न सर्वमतापेक्षयेति । तदपि न— क्षणभङ्गस्य प्रथमपरिच्छेदे निराकृतत्वात् बाह्यार्थभङ्गेन विज्ञानवादिनः आक्षेपे प्रसक्ते, तद्दूषणस्य पूर्वमभिधानात् तदुपसहारश्लोके क्षणिकविज्ञानसन्ततिवादापेक्षया स्थिरैकविज्ञानवादे बलवत्त्वकथनस्यानुपयुक्तत्वात् । अनिर्वचनीयवादस्य वेदनयत्वोक्त्या तत्र बहुमानातिशयस्य स्फुटत्वाच्च । यदपि, अस्मात् पश्चात् पूर्वतनं 'प्रविश वा अनिर्वचनीयख्यातिकुक्षिं, तिष्ठ वा मतिकर्दममपहाय न्यायमतानुसारेण नीलादीनां पारमार्थिकत्वे' । इति वाक्यमनिर्वचनीयतावादेऽपि मतिकर्दममावेदयतीति । तदप्यसंगतम् । 'अस्तु शून्यतैव निर्वाणम्' इत्युपक्षिप्तं शून्यवादं औपनिषदमनिर्वचनीयवादं ब्रह्मवादिसंमतं पुरस्कृत्य निराकुर्वन्त्याचार्याः । अन्ते, 'तत्किमार्द्रकवणिजः वहित्रचिन्तया' इति ग्रन्थेन वेदान्तदर्शने महान्तमादरं दर्शयन्ति । शूर्पादिपात्रे सकलजनसाधारणे आर्द्रकाणि स्थापयित्वा विक्रीणतः वणिजः यथा महानौकादिकमनुपयुक्तम्, महावणिजामेवोपयोगि, तथा सकलसाधारणद्वैतप्रपञ्चसत्यतामतं परिष्कुर्वतः मम, पुरुषधौरेयाणामुपयोगि वेदान्तदर्शनमनुपयुक्तमिति तद्ग्रन्थार्थः । तेन महानौकास्थानीये वेदान्तदर्शने महान्तमादरं दर्शयन्ति । अतः बाह्यार्थभङ्गवादे एव स्थितं मतिकर्दममपहायेति आचार्यैरभिसंहितम् । अत्रेदं चिन्तनीयम् । न्यायसिद्धान्तत्वेन सर्वदार्शनिकैरभ्युपगतं न्यायदर्शनव्याख्यातृभिः व्याख्यातं सूत्रस्वरसंसिद्धमर्थं परित्यज्य, स्वाभिमतानुसारेण न्यायसूत्राणि योजयन्तः, क्लेशेन सूत्रयोजनायाः निर्वाहे अन्यत्र बहुषु स्थलेषु व्याख्यातृणां संमतिं वदन्ति केचित् । दिङ्मात्रमुदाहरामः ।

शब्दार्थयोः समयः— संकेतः संबन्ध इति न्यायसिद्धान्तः । 'न सामयिकत्वादर्थसंप्रत्ययस्य' इति न्यायसूत्रमपि स्वरसतः तथैवावगमयति । सर्वेऽपि दार्शनिकाः संकेतः शब्दार्थयोः संबन्धः इति न्यायसिद्धान्तः इत्यभ्युपगच्छन्ति । सति चैवं, अनुमानस्थले यादृशो व्याप्तिलक्षणः संवन्धः तद्विलक्षणः शब्दार्थयोः संवन्धः । डित्थादिशब्दाः सांकेतिका इति सर्वैः संप्रतिपन्नम् । तत्रानुमानादिस्थलसिद्धसंबन्धविलक्षणसंकेतसंबन्धता दृष्टा । तद्वत् विलक्षणः संबन्धः 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः' इति जैमिनिसूत्रोक्तः नित्यसंबन्धः शब्दार्थयोरित्यत्र सूत्रतात्पर्यमिति न्यायपरिशोधका व्याचक्षते ।

एवं, अवयवसमुदायातिरिक्तः अवयवैरारब्धः अवयवी नैयायिकसंमतः । न्यायदर्शनस्य द्वितीयेऽध्याये चतुर्थाध्याये च सूत्रेषु वारद्वयमैदंपर्येण साधितोऽवयवी । तत्र सूत्रे सेनावनादिव्यावृत्तः अवयव्यारम्भकसमवायिकारणतयाऽभिमतावस्थाविशेषापन्नः सङ्घातविशेष एव अवयविपदेन निर्दिश्यते इति महता क्लेशेन सूत्रं योजयन्ति । एवं, 'गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः, अप्तेजोवायूनां पूर्वंपूर्वमपोह्याकाशस्योत्तरः' इति न्यायसूत्रे पञ्चभूतानां गुणव्यवस्थानमभिहितम् । शब्दः आकाशमात्रगुणः न पृथिव्यादीनामिति न्यायसिद्धान्तः इति सर्वसंप्रतिपन्नम् । अत्र स्पर्शपर्यन्ताः पृथिव्याः सन्त्येव इत्येकदेशमयोगव्यवच्छेदेन, आकाशस्य उत्तरः शब्द एवेति अन्ययोगव्यवच्छेदेन अपरमंशञ्च योजयन्ति । एवमादियोजनायाः स्वारसिकताविरहमनुसन्धाय, 'कति कति चैवं सूत्राणि क्लिष्टानि परैरपि निरुह्यन्ते' । इति च वदन्ति ।

किंच, प्रत्यक्षानुमानोपमानशब्दाः चत्वारि प्रमाणानि इति न्यायसिद्धान्तः इति सर्वसंप्रतिपन्नम् । 'न चतुष्ट्वमैतिह्यार्था-

पत्तिसंभवाभावप्रामाण्यात्' इति सूत्रेणाक्षेपमुद्भाव्य, अर्थापत्त्यादीनां चतुर्ष्वेवान्तर्भावप्रतिपादनेन चतुष्ट्वं स्थापितं सूत्रे। उपमानस्य प्रमाणान्तरत्वमपि समर्थितं सूत्रेषु। सति चैवं, उपमानस्य प्रमाणान्तरत्वे न सूत्राणां तात्पर्यम्, अपि तु अनुमानान्तर्भावनिरासे इति वर्णयन्ति।

किं बहुना, वर्णा अनित्या इति न्यायविदां सिद्धान्तः। नित्याः इति मीमांसकसिद्धान्तः इति सर्वदार्शनिकानां संप्रतिपत्तावपि, जैमिनीयं शब्दाधिकरणं न वर्णनित्यताव्यवस्थापनपरम्, परन्तु असांकेतिकवाचकाकारनित्यत्वप्रतिपादनपरम्। वर्णनित्यत्वसमर्थनपरतया तदधिकरणीयजैमिनिसूत्रव्याख्यानं तु व्याख्यातॄणामेवापराधः इति घोषयन्ति।

एतेषां मार्गसञ्चारिणः कुसुमाञ्जलिविवरणप्रवृत्ताः केचन, दिगन्तविश्रान्तकीर्तीनां न्यायाचार्याणां न्यायसिद्धान्तव्यवस्थापनपराणामपि औपनिषदाद्वैतदर्शने श्रद्धां तदीयवाक्यानां स्वारसिकार्थवर्णनेन निरूपयन्तीमस्मत्पूर्वाचार्याणां सूक्तिं न सहन्ते। तत्र च स्ववासनाहितः औपनिषददर्शने प्रद्वेष एव मूलम्।

एवं, एकस्यैव परमेश्वरस्य नानाशरीरयोगं कथयतामाचार्याणां शिवविष्णुवैमत्याभावेऽपि शिवे भक्तिः प्रतीयते। ग्रन्थोपक्रमे 'भगवति भवे सन्देह एव कुतः' इति शिवे रूढं भवपदं, चतुर्थस्तबकावसाने 'तन्मे प्रमाणं शिवः' इति शिवपदं, पञ्चमे 'पदात्' इति कारिकांशविवरणावसरे, 'श्रूयते च प्रणवेशानदिपदम्' इति ईशानपदं च परमेश्वरतात्पर्येण प्रयुञ्जानास्ते शिवभक्ताः इति निक्षिनुमः। न हि तैः ईशानशिवभवादिपदानि शिवान्तर्यामिविष्णुविवक्षया प्रयुक्तानीति संभावयितुमपि शक्यते। शिवविष्ण्वादिमूर्तिषु वैषम्यबुद्धेरभावेन, गीतासु भगवद्वचनोदाहरणमपि तेषां न शिवभक्त-

तापरिपन्थि भवति । दृश्यन्ते च बहुलमौपनिषदमतावलम्बिनः विष्णुभक्ताः, शिवभक्ताश्च स्ववासनानुसारात् । तस्मान्न किंचिदेतदिति ।।

'अपरिग्रहाच्चात्यन्तमनपेक्षा' इति ब्रह्मसूत्रेण, तर्कशास्त्रस्य प्रक्रियांशे न प्रामाण्यम्, किन्तु आत्मनः देहादिभिन्नत्वे इति प्रतिपाद्यते । "शिष्टैः मन्वादिभिः अपरिगृहीतत्वात्, तत्स्मृतेः प्रत्यक्षश्रुतिविरुद्धत्वात् देहादिभिन्नत्वेनात्मप्रतिपादनमात्रे तात्पर्येण पृथिव्यादीनां नित्यत्वादौ अनपेक्षा - प्रामाण्याभावः ।" इति **वेदान्तसूत्रमुक्तावलिः** ।

तर्काश्च श्रुत्यविरोधिनः उपादेयाः । ते च पदार्थशोधनायोपयुज्यन्ते । अत एव 'वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा प्रस्तूयते' । इति भाष्यकारा वर्णयन्ति । श्रुत्यर्थनिश्चायकयुक्तिनिरूपणव्यग्रत्वादेव भगवत्पादानामनुमार्धविग्रहत्वमभिहितं पञ्चपादिकाचार्यैः । श्रुतिः, अनुमानमिति भागद्वयात्मकविग्रहवन्तः आचार्याः इति तदाशयावगमात् ।

तस्मात् नैकानां औपनिषदसिद्धान्तानुकूलसिद्धान्तानां प्रणयनात् औपनिषदसंमतार्थयुक्तीनां निरूपणात् पदार्थशोधकत्वाच्च वेदान्तदर्शने श्रद्धावद्भिः परिष्कृतं न्यायदर्शनं औपनिषददर्शनसंनिकृष्टमिति सिद्धमिति शिवम् ।

इति वेदान्तदर्शनसंनिकृष्टदर्शनसमालोचनं नाम

(प्रथमो विकासः)

प्रथमं प्रसूनम् ।

विधिविमर्शनम्

द्वितीयं प्रसूनम्

परहितैषिणः तत्तद्वाक्यं प्रयुञ्जानाः तेषु तेषु कार्येषु परान् प्रवर्तयन्तः तान् श्रेयोभागिनः कुर्वन्ति । तच्च वाक्य 'यजेत, पचेत्' इत्यादिकं विधिरिति व्यपदिशन्ति विद्वांसः । यदाहुः- **गदाधरभट्टाचार्याः**- प्रवर्तकं वाक्यं विधिः इति । तत् पुरुषप्रवृत्तिहेतु बोधमुत्पादयत् प्रवर्तकं भवति । तत्र च वाक्ये लिङादिना प्रवृत्तिप्रयोजको धर्मविशेषो बोध्यते । तमपि विधिं संप्रचक्षते । अत एव लिङादिकं विधिप्रत्ययः इति व्यपदेशं भजते । तत्र कोऽसौ विधिः यं ज्ञात्वा पुरुषः प्रवर्तते क्रियासु इत्यत्र विवदन्ते दार्शनिकाः । तत्र प्रवृत्तिसाधनज्ञानाक्षेपकः प्रवर्तनापदाभिधेयः पुरुषाभिप्रायः लोके विधिः, अपौरुषेये वेदे तु लिङादिनिष्ठः अलौकिको व्यापारः इति संगिरन्ते नव्यमीमांसकाः । नव्यवैयाकरणाः प्रवृत्तिसाधनाक्षेपकं प्रेरणापरपर्यायं लिङाद्यन्तशब्द-प्रयोगं, प्रयुज्यमानं तादृशं शब्दं वा विधिं मन्यन्ते । प्राचीनाः वैया-करणाः साक्षात् प्रवृत्तिसाधनज्ञानविषयः इष्टसाधनत्वमेव सः इति प्रतिपन्नाः । नैयायिकास्तु, इष्टसाधनत्वं, कृतिसाध्यत्वं, बलवदनिष्टा-ननुबन्धित्वं च विधिः । एषां यथातात्पर्यं बोधे भानमिति प्रतिपाद-यन्ति । तदत्र स्वमतिशुद्धये तेषां मतभेदः चिन्त्यते ।

नव्यमीमांसकाः, गामानयेत्यादि राज्ञो वचनं श्रुत्वा गवानयने प्रवृत्तः राजानं प्रवर्तकं ब्रूते । यस्याभिप्रायं विदित्वा पुरुषः प्रवर्तते सः प्रवर्तकः । न च प्रवृत्तिकारणेष्टसाधनताबोधकलिङाद्युच्चार-यितृत्वमेव प्रवर्तकत्वमिति वाच्यम् । यत्र राजप्रेरितः पदातिः आनयेति शब्दमुच्चारयति, तत्र निरुक्तं प्रवर्तकत्वं पदातेरेव स्यात् । तथाच राजप्रेरितोऽहं गामानयामि, न पदातिप्रेरितः इति पदातौ प्रवर्तकत्वा-

भावव्यवहारो नोपपद्येत। न च अन्याप्रेरितत्वे सति तादृशलिङाद्युच्चारयितृत्वमेव प्रवर्तकत्वमिति न राजप्रेरितपदातेः प्रवर्तकत्वापत्तिरिति वाच्यम्। तथा सति पित्रा पिशुनेन वा प्रेरितस्य राज्ञोऽपि प्रवर्तकत्वं न स्यात्। तस्मात् प्रवृत्तिकारणीभूतज्ञानविषयेच्छाश्रयत्वमेव प्रवर्तकत्वम्। प्रवर्तकेच्छाज्ञानं च लिङादिनैव जायते इति लिङ्वाच्या इच्छा। सा च अयमत्र प्रवर्ततामित्याकारिका प्रवर्तनेत्यभिधीयते। 'विधिनिमन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्' इति पाणिनीयसूत्रादपि अयमेवार्थो लिङः इति गम्यते। विधिः— निकृष्टस्य प्रेरणम्। निमन्त्रणं - आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम्। आमन्त्रणं- कामचारानुज्ञा। अधीष्टं - सत्कारपूर्वकमुत्तमं प्रति प्रेरणम्। एतेषु चतुर्षु प्रवर्तनात्वस्यानुगतत्वात् तेन रूपेणैका शक्तिः। अन्यांशस्य तु प्रमाणान्तरलभ्यत्वान्न शक्यता। संप्रश्नप्रार्थनयोस्तु अतिरिक्ता शक्तिः। अथवा आनुशासनिकी निरूढलक्षणा। तत्सिद्धं लिङर्थः प्रवर्तनेति। तया च धात्वर्थे इष्टसाधनत्वमनुमीयते। अयमत्र प्रवर्ततामित्याकारकाप्तेच्छाविषयप्रवृत्तिविषयत्वस्य इष्टसाधनत्वव्याप्तत्वात्। पाकयागादिकं इष्टसाधनं, निरुक्ताकाराप्तेच्छाविषयप्रवृत्तिविषयत्वात् इत्यनुमानं फलितम्। निरुक्ताप्तेच्छाविषयत्वमात्रस्य हेतुत्वे, इष्टसाधनत्वरूपसाध्याभाववति पुरुषादौ अयमत्र प्रवर्ततामित्याकारकेच्छाविषयत्वस्य सत्वात् व्यभिचारः इति आप्तेच्छाविषयप्रवृत्तिविषयत्वं हेतुत्वेनाभिहितम्। पुरुषादौ प्रवृत्तिविषयत्वासत्वान्न व्यभिचारः। एवं चानुमानलभ्यमिष्टसाधनत्वं न लिङर्थः, अनन्यलभ्यः शब्दार्थः इति न्यायात्। न चैवं प्रवर्तना इष्टसाधनत्वेनानुमातुं शक्या, येन इच्छा अन्यलभ्येति लिङर्थो न स्यात्, विषयविशेषस्य इष्टसाधनत्वेऽपि आप्तेच्छाविषयत्वाभावेन व्यभिचारात्। अतः अनन्यलभ्या प्रवर्तनैव लिङर्थः।

प्रवर्तनात्वं च प्रवृत्त्यनुकूलव्यापारत्वम् । तच्च पुरुषाशये वैदिकलिङादिनिष्ठालौकिकव्यापारे च वर्तते । तत्रानुकूलत्वं न कारणत्वम्, अभिप्रायाभावेऽपि तद्भ्रमेण प्रवृत्तेरुत्पत्तेः । नापि प्रवृत्तिकारणज्ञानविषयत्वम्, इष्टसाधनताज्ञानस्यैव प्रवृत्तौ कारणत्वेन पुरुषाभिप्रायज्ञानस्यान्यथासिद्धत्वात् । अपितु प्रवृत्तिप्रयोजकत्वमेव । पुरुषाभिप्रायस्य इष्टसाधनत्वानुमितिद्वारा प्रवृत्तिप्रयोजकत्वमुपपादितम् । यजेतेत्यादिवैदिकशब्दश्रवणोत्तरं इष्टसाधनत्वमनुमायैव यागादौ प्रवर्तते । इष्टसाधनत्वानुमापकेच्छा च अपौरुषेये वेदे नास्ति । अतः कार्यानुमेयः लिङादिनिष्ठः अलौकिको धर्मः लिङादिवाच्यः कल्प्यते । तस्येष्टसाधनत्वानुमापकत्वमपि कल्प्यते इति अलौकिकव्यापारस्यापि प्रवृत्तिप्रयोजकत्वरूपं प्रवर्तनात्वमक्षतमेव । प्रवृत्तिप्रयोजकव्यापारत्वं न लिङादिशक्यतावच्छेदकम्, गौरवात्, प्रवृत्तेराख्यातेन, प्रयोजकत्वस्य संसर्गमर्यादया च लाभेनान्यलभ्यत्वाच्च । अपितु अनन्यलभ्यं लघुभूतं च व्यापारत्वमेव ।

पचेदित्यादौ लिङादिना व्यापारत्वेनोपस्थितः व्यापारः स्वज्ञानजन्यानुमितिप्रयोज्यत्वेन तादृशप्रयोज्यत्वत्वेनानुपस्थितेन संबन्धेनाख्यातार्थकृतावन्वेति । 'भावप्रधानमाख्यातम्' इति स्मृत्या भावनातिरिक्ताख्यातार्थं प्रति आख्यातार्थभावनाया एव विशेष्यत्वबोधनाम् । यथा घटवद्भूतलमित्यत्र घटपदादुपस्थितस्य घटत्वावच्छिन्नस्य योग्येन संबन्धेन भूतले अन्वयबोधे जाते, तादृशसंबन्धः कः इति जिज्ञासायां मानान्तरेण संयोगत्वावच्छिन्नसंसर्गलाभः, भूतलादिपदसमभिव्याहारात् भूतलवृत्तिघटविशेषलाभश्च भवति । तथा चैत्रः पचेदिति वाक्यात् व्यापारवती चैत्रनिष्ठा पाककृतिः इति शाब्दबोधो जायते । ततः लिङर्थव्यापारस्य कृतौ कः संबन्धः

इति संबन्धस्य तत्त्वेन जिज्ञासायां, मैत्रप्रेरितोऽहं पचामीति व्यवहारात् व्यापारः इच्छारूपः इत्यवगम्यते । प्रवृत्तिप्रयोजकज्ञानविषयेच्छाश्रयत्वस्यैव प्रवर्तकत्वरूपतायाः प्रागभिहितत्वात् । पचेदिति समभिव्याहारेण पाककृतिसंबन्धात् पाकेऽयं प्रवर्ततामित्याकारिका सेति ज्ञायते । तादृशेच्छाश्रये मैत्रादौ क्वचनेङ्गितादिना आप्तत्वे गृहीते, पाकादौ, पाकेऽयं प्रवर्ततामित्याकारकाप्तेच्छाविषयप्रवृत्तिविषयत्वरूपहेतुज्ञानं मानसं समुत्पद्यते । अथ च तत्र हेतौ इष्टसाधनत्वव्याप्तिस्मरणात् पाके इष्टसाधनत्वानुमितिर्जायते । तस्याश्च प्रवृत्तिप्रयोजकत्वं सिद्धमेवेति रीत्या संसर्गविशेषलाभः व्यापारविशेषलाभश्च संभवति । एवमेव यजेतेत्यादिवैदिकवाक्यात् पूर्वोक्तसंबन्धेन व्यापारवती यागकृतिः इति शाब्दबोधे जाते, संबन्धस्य तत्त्वेन जिज्ञासायां, वेदस्थलिङादिप्रेरितोऽहं यागादि करोमि इति व्यवहारात् तस्य व्यापारस्य लिङादिनिष्ठत्वं, यजेतेति धातुप्रत्ययसमभिव्याहारलब्धयागकृतिसंबन्धात् यागेऽयं प्रवर्ततामित्याकारकत्वं चावगम्यते । अपौरुषेये तत्र लिङादौ निर्दोषत्वज्ञानेन अनाप्तभिन्नत्वे अवगते, प्रतारणाद्यजन्यहिताहितोपदेशजनकत्वरूपमाप्तत्वमवधारितं भवति । ततो मनसा, प्रतारणाद्यजन्यहिताहितोपदेशजनकनिष्ठः यः यागेऽयं प्रवर्ततामित्याकारकव्यापारः तद्विषयप्रवृत्तिविषयत्वरूपहेतुज्ञानमुत्पद्यते । अथ च तत्र इष्टसाधनत्वव्याप्तिस्मरणेन लोके इव प्रवृत्तिप्रयोजिका इष्टसाधनत्वानुमितिर्भवतीति संसर्गविशेषः व्यापारविशेषश्च लभ्यते ।

अथवा, स्वतःसिद्धप्रवृत्तौ प्रेरणाया अप्रयोजकत्वात्, प्रेरणाप्रयोज्यतावच्छेदकतया प्रवृत्तित्वव्याप्यधर्मविशेषः सिद्ध्यति। तदवच्छिन्नप्रयोजकतावच्छेदकं प्रेरणात्वमखण्डो धर्मः आप्तेच्छाऽलौकिक व्यापारो-

भयसाधारणः। तादृशमखण्डं प्रेरणात्वमनतिप्रसक्तं लिङादिपदशक्यतावच्छेदकं ब्रूमः।

अथवा, अयमत्र प्रवर्ततामित्याकारकत्वरूपविषयिताविशेषः पुरुषाभिप्रायालौकिकव्यापारोभयसाधारणः। तदवच्छिन्नस्यैव प्रवृत्तिप्रयोजकतेति तादृशविषयिताविशेष एव लिङादिशक्यतावच्छेदकः। यदि च तादृशी विषयिता इच्छामात्रवृत्तिरिति मन्यते, तदा वैदिकलिङादिष्वपीच्छामङ्गीकुर्मः। शब्दस्यास्मन्मते द्रव्यत्वेन तत्रेच्छारूपगुणसत्त्वे बाधकाभावात्।

यदि चेच्छा आत्ममात्रनिष्ठा नाचेतनशब्दनिष्ठेति विभाव्यते। तदा औपनिषदमीश्वरमप्यङ्गीकृत्य तदीयेच्छैव लिङर्थः इति स्वीकुर्मः। वस्तुतस्तु पूर्वोक्तविषयिताविशेषापेक्षया लाघवादिच्छात्वं जातिरेव लिङादिपदशक्यतावच्छेदिका। चैत्रः पचेदित्यादिलौकिकवाक्यघटकलिङा इच्छात्वावच्छिन्नस्योपस्थितिर्जायते। तस्य निरुक्तसंबन्धेन कृतावन्वये बुद्धे, इच्छाविशेषलाभः संबन्धविशेषलाभश्च पूर्ववत् भवति। वैदिकं लिङादिकं सर्वमपि अलौकिकप्रेरणां लक्षणया बोधयति। सापि तेनैव संबन्धेन कृतावन्वेति।

ननु, यत्र स्वत एव पाकादाविष्टसाधनतां ज्ञात्वा चैत्रः पाकं करोति, तदीयकृतौ प्रेरणाप्रयोज्यत्वस्वरूपयोग्यत्वस्याप्यभावेन तत्र चैत्रः पचेदिति प्रयोगापादनासंभवेऽपि, यत्र अन्यदीयप्रेरणया चैत्रः पाके प्रवर्तते, तत्र पाककृतेर्वर्तमानतादशायां चैत्रः पचेत् इति प्रयोगापत्तिर्दुर्वारैव, चैत्रनिष्टायां पाककृतौ प्रेरणाप्रयोज्यत्वसत्त्वादिति चेन्न। लिङर्थप्रेरणा स्वज्ञानविशेषजन्यानुमितिप्रयोज्यत्व

संबन्धेन कृतावन्वेति । तत्तत्प्रवृत्तिप्राक्काले तत्तल्लिङादिपदज्ञाने-नोत्पादितं प्रेरणाज्ञानमेव ज्ञानविशेषः तद्व्यक्तित्वेन संबन्धकुक्षौ निविशते । चैत्रीयपाककृतिप्रयोजकं अन्यदीयप्रेरणाज्ञानं तत्प्रवृत्ति-प्राक्काले विद्यमानमपि नापाद्यमानवाक्यघटकतल्लिङादिपदज्ञाना-धीनमिति, निरुक्तप्रेरणाज्ञानविशेषाधीनेष्टसाधनत्वानुमितिप्रयोज्यत्वं कृतौ नास्ति । अतश्च तेन संबन्धेन प्रेरणाभाववत्यां कृतौ प्रेरणावगाहि-भ्रमात्मकबोधजनकं तद्वाक्यमप्रमाणं संपद्यते ।

न कलञ्जं भक्षयेदित्यत्र लिङा निवर्तना बोध्यते । लिङादि-शक्यतावच्छेदकस्य विषयिताविशेषस्य निवर्तनासाधारण्ये मानाभावात् लिङः निवृत्तिविषयित्वावच्छिन्ने लक्षणा स्वीक्रियते । नञ्पदं तात्पर्यग्राहकम् । निवर्तना स्वज्ञानविशेषाधीनानुमितिजन्यप्रवृत्ति-कारणतावच्छेदकसंबन्धनाशकालीनाभावप्रतियोगित्वसंबन्धेन तत्त्वेनानु-पस्थितेन आख्यातार्थकृतावन्वेति । संसर्गविशेषलाभः मानान्तरादेव ।

अत्र निवर्तनाज्ञानात् कलञ्जभक्षणेऽयं निवर्ततामित्याप्तेच्छावि-षयीभूताभावप्रतियोगिकृतिविषयत्वरूपहेतुज्ञानं मानसं जायते । तत्र अनिष्टसाधनत्वव्याप्तिं स्मरतः पुंसः तेन हेतुना कलञ्जभक्षणे अनिष्टसाधनत्वानुमितिर्जायते । प्रवृत्तौ बलवदनिष्टसाधनताज्ञानं प्रतिबन्धकम् । अतः तदभावघटिता प्रवृत्तिसामग्री । अनिष्टसाधनत्वे अनुमिते, प्राचीनकर्मवशात् द्वेषगतबलवत्त्वे सति, बलवदनिष्टसाधन-ताज्ञानं संपद्यते । प्रतियोगिसत्वस्य अभावसंबन्धनाशकत्वात् अनिष्टसाधनत्वानुमित्या प्रवृत्तिकारणतावच्छेदकीभूतस्य बलवदनिष्ट-साधनत्वज्ञानाभावायदैशिकविशेषणतासंबन्धस्य नाशो जायते । ततश्च प्रवृत्तिसामग्रीविघटनात् प्रवृत्त्यभावः इति, तादृशानुमितिजन्यसंबन्ध-

नाशकालीनाभावप्रतियोगित्वं कृतावक्षतमेव । निवारणाप्रयोज्यप्रवृत्त्यभाववर्तमानतादशायां न कलञ्जं भक्षयेदिति प्रयोगवारणाय निवारणायाः संबन्धमध्ये. प्रवृत्तिकारणतावच्छेदकीभूतसंबन्धध्वंसासमानकालीनं तत्तल्लिङादिज्ञानाधीननिवर्तनाज्ञानमेव तद्व्यक्तित्वेन निवेश्यते। निवारणाधीनप्रवृत्त्यभाववर्तमानतादशायां तत्तल्लिङादिपदज्ञानाधीनं निवर्तनाज्ञानं तादृशसंबन्धनाशकालीनमेवेति तादृशज्ञानविशेषघटितनिरुक्तसंबन्धेन निवारणावत्त्वस्य प्रवृत्तौ बाधात् तत्र तेन संबन्धेन निवारणावत्त्वबोधकं तद्वाक्यमप्रमाणं भवति । एवंच न कलञ्जं भक्षयेदित्यत्र, प्रवृत्तिकारणतावच्छेदकसंबन्धनाशासमानकालीनतत्तल्लिङादिपदज्ञानाधीनस्वज्ञानाधीनानुमितिजन्यसंबन्धनाशकालीनाभाव - प्रतियोगित्वसंबन्धेन निवारणावत्ती अभावप्रतियोगिनी कलञ्जभक्षणकरणिका कृतिः इति शाब्दबोधः संपद्यते ।

यत्तु तार्किका वदन्ति, लिङादिश्रवणोत्तरं प्रवृत्तेर्दर्शनात् लिङादिज्ञानं प्रवर्तकं ज्ञानमुत्पादयति । न हि निष्फले चैत्यवन्दनादौ, कृत्यसाध्ये चन्द्रस्पर्शादौ, बलवदनिष्टानुबन्धिनि मधुविषसंपृक्तान्नभोजने च प्रेक्षावन्तः प्रवर्तन्ते । अतः प्रवृत्तौ इष्टसाधनताज्ञानं कृतिसाध्यताज्ञानं बलवदनिष्टाननुबन्धित्वज्ञानं च हेतुः । तच्च लिङादिना जायते इति लिङः इष्टसाधनत्वं कृतिसाध्यत्वं बलवदनिष्टाननुबन्धित्वं चार्थः, न तु बलवदनिष्टाननुबन्धित्वविशिष्ट-कृतिसाध्यत्वविशिष्टेष्टसाधनत्वम्, बलवदनिष्टाननुबन्धित्वादीनां मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण गुरुधर्मावच्छिन्ननानाशक्तिकल्पनापत्तेः । लिङर्थश्चाश्रयतया धात्वर्थे अन्वेति । लिङर्थान्वितो धात्वर्थः प्रथमान्तपदार्थविशेषणे आख्यातार्थकृतावनुकूलतासंबन्धेनान्वेति । एवंच यजेत स्वर्गकामः इति वाक्यात् बलवदनिष्टाननुबन्धि-कृतिसाध्येष्टसाधनीभूतयागानुकूलकृतिमान् स्वर्गकामः इत्यन्वयबोधः । न कलञ्जं

भक्षयेदित्यत्र लिङर्थस्य बलवदनिष्टाननुबन्धित्वस्य नञर्थाभावे प्रतियोगितासंबन्धेनान्वयः। स च धात्वर्थभक्षणेऽन्वेति। लिङर्थयोरपि इष्टसाधनत्वकृतिसाध्यत्वयोरभावः नञा धात्वर्थे न बोध्यते। कलञ्ज-भक्षणे तृप्तिसाधनत्वकृतिसाध्यत्वयोः सत्त्वेन तदभावबाधात्। तथाच बलवदनिष्टाननुबन्धित्वाभाववत्कलञ्जभक्षणानुकूलकृतिमानिति शाब्दबोधो जायते। निषेधवाक्येन कलञ्जभक्षणे बलवदनिष्ट-साधनतां जानानः प्रवर्तकज्ञानाभावान्न प्रवर्तते कलञ्जभक्षणे। श्येने-नाभिचरन् यजेतेत्यत्र लिङर्थोऽपि बलवदनिष्टाननुबन्धित्वं न धात्वर्थे बोध्यते। मानान्तरेण श्येनजन्यवैरिवधेन नरको जायते इत्यवगमात् श्येनस्य बलवदनिष्टप्रयोजकत्वेन तदननुबन्धित्वस्य तत्र बाधात्। अपि तु लिङर्थः इष्टसाधनत्वं कृतिसाध्यत्वं च बोध्यते। कृतिसाध्येष्ट-साधनश्येनयागानुकूलकृतिमान् वैरिवधकामः इति तद्वाक्याधीनो बोधः, इति।

तदसंगतम्—बलवदनिष्टाननुबन्धित्वादिषु त्रिषु शक्तित्रयकल्पने गौरवात्। किंच प्रवृत्तौ बलवदनिष्टानुबन्धित्वज्ञानं प्रतिबन्धकम्। अत एव प्रतिबन्धकात् मधुविषसंपृक्तान्नभोजने न प्रवर्तते। इष्टसाधन-ताज्ञाने सति, असति च बलवदनिष्टानुबन्धित्वज्ञाने प्रवर्तते एव क्रियासु पुरुषः। न तु बलवदनिष्टाननुबन्धित्वज्ञानमपि अपेक्षते। एवंच बलवदनिष्टाननुबन्धित्वज्ञानं न प्रवृत्तिकारणमिति तद्विषयस्य बल-वदनिष्टाननुबन्धित्वस्य लिङर्थता नोपपद्यते। बलबदनिष्टानुबन्धि-त्वज्ञानाभावश्च प्रतिबन्धकाभावविधया प्रवृत्तौ स्वरूपतो हेतुः। न तु तस्य ज्ञानमपेक्ष्यते इति तदभावस्य लिङ्वाच्यत्वमनावश्यकम्। न च बलवदनिष्टाननुबन्धित्वस्य लिङर्थतास्वीकार आवश्यकः। अन्यथा लिङर्थयोरिष्टसाधनत्वकृतिसाध्यत्वयोः कलञ्जभक्षणे अबाधितत्वेन तत्र

तद्बोधकं तृप्तकामः कलञ्जं भक्षयेदिति वाक्यं प्रमाणमापद्येत। तस्य लिङर्थतायां तु तत्र बाधितं बलवदनिष्टाननुबन्धित्वं बोधयत् तद्वाक्यमप्रमाणं भवतीति वाच्यम् । इष्टसाधनत्वस्य लिङर्थतामते तद्वाक्यप्रामाण्यापादनसंभवेऽपि प्रवर्तनायाः लिङर्थतावादिनामस्माकं मते त तदसंभवात् । लिङर्थः प्रवर्तना स्वज्ञानाधीनानुमितिप्रयोज्यत्वसंबन्धेन कृतावन्वेति । यत्र धात्वर्थे यागादौ इष्टसाधनत्वं मानान्तरेणानवगतं, तत्र प्रेरणाज्ञानात् इष्टसाधनत्वस्यानुमितिः । यत्र दीक्षितान्नभोजनादौ इष्टसाधनत्वं मानान्तरेणावगतं, न दीक्षितान्नमश्नीयादिति निषेधेन अनिष्टसाधनत्वमपि विदितम्, तत्र निषेधविषयविषयकेन हुतायां वपायां दीक्षितस्यान्नमश्नीयात् इत्यभ्यनुज्ञाविधिना जन्येन प्रवर्तनाज्ञानेन भोजने अनिष्टसाधनत्वाभावस्यैवाऽनुमितिर्जायते, नेष्टसाधनत्वस्य । मानान्तराधीनतत्सिद्धिकाले सिषाधयिषाया विरहे तदनुमितेरसंभवात् । तादृशानिष्टसाधनत्वाभावज्ञानमपि प्रवृत्तिप्रतिबन्धके अनिष्टसाधनताज्ञाने अप्रामाण्यज्ञानमुत्पादयति । अप्रामाण्यज्ञानानास्कन्दितानिष्टसाधनताज्ञानस्यैव प्रवृत्तिप्रत्तिबन्धकत्वात् तादृशप्रतिबन्धकाभावसंपादिकायाः अनिष्टसाधनत्वाभावानुमितेरपि प्रवृत्तिप्रयोजकत्वमुपपद्यते इति वस्तुस्थितिः । तद्वदत्रापि न कलञ्जं भक्षयेदिति निषेधविषयविषयकेन तृप्तिकामः कलञ्जं भक्षयेदिति विधिनोत्पादितप्रवर्तनाज्ञानेन अनिष्टसाधनत्वाभावस्यैवाक्षेपो भवेत् । अनिष्टसाधनत्वाभावश्च कलञ्जभक्षणे न कलञ्जं भक्षयेदिति श्रुतिविरोधात् बाधितः इति निरुक्तवाक्यमप्रमाणं भवतीति न तत्प्रामाण्यवारणाय बलवदनिष्टाननुबन्धित्वस्य लिङर्थता स्वीकरणीया ।

अपि च, किमिदं प्रवृत्त्युपयोगि बलवदनिष्टाननुबन्धित्वं, यल्लिङा बोध्यते । न तावदिष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वम् । यागे इष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वं

यजेत स्वर्गकामः इति वाक्यात् जानन्नपि स्वीयद्रव्यव्ययस्य द्वेष्टा अलसः पुरुषः न प्रवर्तते । अतो न तज्ज्ञानं प्रवृत्तिं जनयति । न वा तादृशदुःखजनकत्वज्ञानं प्रवृत्तिं प्रतिबध्नाति । यतः न कलञ्जं भक्षयेदिति निषेधेन तादृशदुःखजनकत्वं ज्ञात्वापि प्रवर्तते एव रागी कलञ्जभक्षणे । अतः अनिष्टे बलवत्त्व उत्कटद्वेषविषयत्वम् । द्वेषे औत्कटयं जातिविशेषः फलबलकल्पनीयः । एवंच प्राचीनकर्मवशेन यस्य यागजन्यान्तरालिकश्रमे बलवान् द्वेषो जातः सः बलवद्द्वेषविषया साधनत्वज्ञानाभावान् न यागे प्रवर्तते । यस्य तु शुभकर्मवासनया तत्र दुःखे न बलवान् द्वेषोऽजनि, सः तत्र बलवद्द्वेषविषयासाधनतां बुध्वा प्रवर्तते । एवमेव यो रागी नरके न बलवद्द्वेषवान् सः बलवद्द्वेषबिषयसाधनताज्ञानरूपप्रतिबन्धकाभावात् प्रवर्तते कलञ्ज-भक्षणे । यस्तु नरकं बलवत् द्वेष्टि सः प्रतिबन्धकज्ञानवान्न प्रवर्तते इत्युपपद्यते । ईदृशं च बलवदनिष्टाननुबन्धित्वं यजेतेत्यत्र यागे न लिङा बोधयितुं शक्यते । तस्य समयविशेषे बलवद्द्वेषविषयान्तरा-लिकदुःखजनकत्वेन तदभावस्य बाधात् । एवं न कलञ्जं भक्षयेदि-त्यत्रापि कदाचित् बलवद्द्वेषविषयाजनकत्ववति कलञ्जभक्षणे तदभावबोधनं न संभवति । तस्मात् न बलवदनिष्टाननुबन्धित्वं लिङर्थः ।

अपिच, श्येनेनाभिचरन्यजेत इत्यत्र लिङर्थस्यापि बलवदनि-ष्टाननुबन्धित्वस्य धात्वर्थे यागे कुतो नान्वयबोधः? श्येनस्य तत्फलस्य वा हिंसात्वात् तत्र न हिंस्यादिति श्रुत्या बलवदनिष्टानुबन्धित्वबोध-नात् तदभावो बाधितः इति यागे न तद्बोध इति चेन्न । न हिंस्या-दिति सामान्यशास्त्रं यथा यागीयवैधपशुहिंसायां न प्रवर्तते, तस्य रागतः प्राप्तहिंसाविषयत्वेनापि चरितार्थत्वात् । तथैव श्येनेनाभि

चरन्यजेत इति विधिना बलवदनिष्टाननुबन्धित्वबोधनात् तन्निर्वाहाय श्येनेऽपि न प्रवर्तयिष्यते । अतश्च निषेधशास्त्रविषयत्वं न बाधकं भवति । प्रवर्ततां वा कथंचित् श्येनेऽपि । तथापि श्येनजन्यनरकस्याधिक्यं न कल्प्यते । न हिंस्यादिति निषेधेन श्येने अनिष्टसाधनत्वं, श्येनेनाभिचरन् यजेत इति विधिना बलवदनिष्टासाधनत्वं च बोध्यते इत्युभयमप्युपपद्यते । तस्मात् श्येने बाधात् न बलवदनिष्टाननुबन्धित्वबोधः इत्युक्तिः न संगच्छते ।

किंच तेषां मते न कलञ्जं भक्षयेदित्यत्र लिङर्थेषु त्रिषु बलवदनिष्टाननुबन्धित्वस्यैवाभावः नञा धात्वर्थे बोध्यते, इष्टसाधनत्वं कृतिसाध्यत्वं च धात्वर्थे अन्वेति । अतश्च बलवदनिष्टाननुबन्धित्वाभाववत् कृतिसाध्यमिष्टसाधनं च यत् कलञ्जभक्षणं तदनुकूलकृतिमानिति बोधः संपद्यते । तत्र लोकावगतं तृप्तिसाधनत्वमेव यदि वेदेन कलञ्जभक्षणे बोध्यते, तदा अज्ञातार्थाबोधकतया वैयर्थ्यं स्यादिति विश्वजिन्न्यायेन स्वर्गसाधनत्वमेव लिङा बोध्यताम् । न चैवं तस्य स्वर्गफलकत्वे बलवदनिष्टानुबन्धित्वं व्याहन्येतेति शङ्कनीयम् । स्वर्गादधिकस्य नरकस्य कल्पनेन बलवदनिष्टसाधनत्वस्याप्युपपत्तेः । तस्मात् निषेधस्थले लिङा इष्टसाधनत्वबोधने विश्वजिन्न्यायेन निषिद्धानां स्वर्गफलकत्वमापद्येत ।

किंच, तन्मते अनेककार्यकारणभावकल्पनागौरवमपि दुर्वारम् । (1) विशेष्यतया नञ्समभिव्याहृतलिङर्थबलवदनिष्टाननुबन्धित्वप्रकारकशाब्दबोधं प्रति विशेष्यतया नञ्पदजन्योपस्थितिः कारणम् । नञ्समभिव्याहारे बलवदनिष्टाननुबन्धित्वविशेष्यतया नञर्थभानात् । (2) विशेष्यतया बलवदनिष्टाननुबन्धित्वातिरिक्त-नञ्समभिव्याहृतलिङर्थप्रकारकशाब्दबोधं प्रति विशेष्यतया धातुपदजन्योपस्थितिः

कारणम् । इष्टसाधनत्वादिविशेष्यतया धात्वर्थभानात् । (3) विशेष्यतया नञसमभिव्याहृतलिङर्थप्रकारकशाब्दबोधं प्रति विशेष्यतया धातुपदजन्योपस्थितिः कारणम् । यजेतेत्यादौ सर्वस्यापि लिङर्थस्य विशेष्यतया धात्वर्थभानात् । (4) विशेष्यतया लिङसमभिव्याहृतनञर्थप्रकारकशाब्दबोधं प्रति विशेष्यतया प्रथमान्तपदजन्योपस्थितिः कारणम् । चैत्रो न पचतीति वाक्यजन्ये पाककृत्यभाववान् चैत्रः इति बोधे नञर्थाभावविशेष्यतया प्रथमान्तार्थस्य चैत्रादेर्भानात् । (5) विशेष्यतया लिङ्समभिव्याहृतनञर्थप्रकारकशाब्दबोधं प्रति विशेष्यतया धातुजन्योपस्थितिः कारणम् । न भक्षयेदित्यादौ बलवदनिष्टाननुबन्धित्वाभावविशेष्यतया धात्वर्थभक्षणादेर्भानात् । (6) विशेष्यतया नञसमभिव्याहृताख्यातार्थकृतिप्रकारकशाब्दबोधं प्रति विशेष्यतया प्रथमान्तपदजन्योपस्थितिः कारणम् । चैत्रः पचतीत्यादिवाक्याज्जायमाने पाककृतिमान् चैत्रः इति शाब्दबोधे कृतिविशेष्यतया प्रथमान्तार्थचैत्रादेर्भानात् । (7) विशेष्यतया नञ्समभिव्याहृताख्यातार्थकृतिप्रकारकशाब्दबोधे विशेष्यतया नञ्पदजन्योपस्थितिः कारणम् । चैत्रो न पचतीत्यादौ कृतिविशेष्यतया नञर्थाभावभानात् । इत्येवं सप्त कार्यकारणभावाः कल्पनीयाः ।

एवं नञ्समभिव्याहारे बलवदनिष्टाननुबन्धित्वरूपलिङर्थस्यैव नञर्थाभावे अन्वयः । तद्भिन्नलिङर्थस्येष्टसाधनत्वादेः धात्वर्थे एवान्वयः । नञसमभिव्याहारे तु सर्वस्यापि लिङर्थस्य धात्वर्थेऽन्वयः । लिङसमभिव्याहारे नञर्थस्य प्रथमान्तार्थेऽन्वयः । लिङ्समभिव्याहारे तु धात्वर्थेऽन्वयः । इत्येवं तत्तद्बोधं प्रति तादृशतादृशसमभिव्याहारज्ञानानां अनन्ताः कार्यकारणभावाः कल्पयितव्या इति च गौरवमापतति ।

अस्मन्मते तु, लिङर्थः नञः असत्त्वे प्रयोज्यतासंन्बधेन, नञः सत्त्वे च स्वप्रयोज्याभावप्रतियोगित्वसंबन्धेन, प्रथमान्तार्थः आधेयतासंबन्धेन, नञर्थः प्रतियोगितासंबन्धेन च आख्यातार्थकृतावन्वेतीति चत्वार एव कार्यकारणभावाः। अथवा, विशेष्यतया सुबर्थलिङ्गसंख्याव्यतिरिक्तप्रातिपदिकार्थव्यतिरिक्तार्थप्रकारकशाब्दबोधं प्रति भावनाविशेष्यतासंबन्धेन लिङ्गानन्वयिपदजन्योपस्थितिः कारणमित्येक एव कार्यकारणभावः कल्प्यते इति लाघवं स्फुटमेव ।

अपिच, यजेतेत्यत्र धात्वर्थयागस्यानुकूलतासंबन्धेन कृतावन्वयात् तुल्यवित्तिवेद्यतया धात्वर्थे कृतिसाध्यत्वं भासते। अतः कृतिसाध्यत्वमप्यन्यलभ्यं न लिङर्थः।

यदप्युच्यते नव्यतार्किकैः, इष्टसाधनत्वमात्रं लिङर्थः। न कलञ्जं भक्षयेदित्यादौ तृप्तिसाधने धात्वर्थे लिङर्थस्येष्टसाधनत्वस्याभावबोधो न संभवतीति लिङः अनिष्टसाधनत्वे लक्षणा। तादृशार्थे लक्षणातात्पर्यग्राहकमेव नञ्पदम्। अनिष्टसाधनत्वं चाश्रयतया धात्वर्थे अन्वेतीति।

तदप्यसंगतम् - राजप्रेरितोऽहं गामानयामि इति राज्ञि प्रवर्तकत्वव्यवहारोऽस्ति। निरूपितं च प्रवर्तकत्वं प्रवृत्तिकारणज्ञानविषयेच्छाश्रयत्वमेवेति। तस्याश्चेच्छायाः लिङादिनैव बोधः इति सैव लिङ्वाच्या। तया चेष्टसाधनत्वमनुमातुं शक्यमिति अन्यलभ्यमिष्टसाधनत्वं न लिङर्थः, अनन्यलभ्यः शब्दार्थः इति न्यायात्।

अपिच यत्र चैत्रः पाकमिष्टसाधनं बुध्वा पचति, तत्र पाककृतेर्वर्तमानतादशायां चैत्रः पचेदिति प्रयोगापत्तिः। इष्टसाधनपाकानुकूलकृतिमांश्चैत्रः इत्याकारके तद्वाक्यजबोधे विषयस्य तादृश-

पाककृतेः चैत्रे अबाधात् । अस्मन्मते तु तादृशचैत्रीयपाककृतेः लिङर्थ-प्रेरणाप्रयोज्यत्वाभावेन विषयबाधान्न तादृशप्रयोगापत्तिः । अन्यदीय-प्रेरणाप्रयोज्यप्रवृत्तिवर्तमानतादशायां चैत्रः पचेदिति प्रयोगस्तु प्रेरणायाः अख्यातार्थकृतौ संबन्धविशेषनिरूपणेनैव निरस्तः ।

यच्चोक्तं निषेधस्थले लिङः अनिष्टसाधनत्वे लक्षणेति । तदपि न । तथा सति ज्योतिष्टोमेन न यजेत इति वाक्यप्रयोगोऽपि प्रामाणिकः स्यात् । तद्वाक्यजन्ये अनिष्टसाधनज्योतिष्टोमयागानु-कूलकृतिमानिति बोधे विषयस्याबाधात् । यागे तात्कालिकप्रमादि-रूपानिष्टसाधनत्वस्य सत्वात् । न च नरकरूपानिष्टसाधनत्वमेव निषेध-स्थले लिङा बोध्यते । तच्च ज्योतिष्टोमे बाधितमिति न तस्य प्रामा-ण्यापत्तिरिति वाच्यम् । तथा सति अग्नि न स्पृशेत् इति वाक्यस्या-प्रामाण्यापत्तेः, अग्निस्पर्शे नरकसाधनत्वस्य बाधात् ।

किंच नातिरात्रे षोडशिनं गृह्णाति इत्यत्र नरकसाधनत्वमप्रामा-णिकत्वात् न बोधयितुं शक्यते । नापि तात्कालिकश्रमादिरूपानिष्ट-साधनत्वं, तथात्वे तद्वाक्यस्यानुवादकतासंभवेऽपि, अतिरात्रे षोडशिनं गृह्णाति इति विधिना इष्टसाधनत्वबोधनात् सर्वदा अतिरात्ते षोडशि-ग्रहणं कर्तव्यमित्यापतति । यदि चानुवादकतापरिहाराय ऋतुवैगुण्य-रूपानिष्टसाधनत्वमेव नातिरात्रे इति वाक्येन बोध्यते इत्युच्यते । तदा एकस्यैव षोडशिग्रहणस्य ऋतुसाद्गुण्यजनकत्वं ऋतुवैगुण्यजन-कत्वं च विरुद्धं न संभवतीति तद्वाक्यमप्रमाणं स्यात् । तस्मात् निषेधस्थले अनिष्टसाधनत्वं लिङा बाध्यते इत्युक्तिः न समञ्जसा ।

अस्मन्मते तु, यत्र विध्युत्तरं निषेधः तत्र लिङ्बोध्यनिवर्तनया धात्वर्थे इष्टसाधनत्वाभावस्याक्षेपः । विधिनिषेधयोः द्वयोरपि वैदिकत्वे

षोडशिग्रहणे इष्टसाधनत्वं तदभावश्च प्रयोगभेदेनोपपद्येते । एवंच ज्योतिष्टोमेन यजेत इति विध्युत्तरं प्रवृत्तेन ज्योतिष्टोमेन न यजेत इति निषेधवाक्येनावगतनिवर्तनया तत्र इष्टसाधनत्वाभावः आक्षिप्येत । ज्योतिष्टोमे चेष्टसाधनत्वाभावः श्रुतिविरोधेन बाधितः इति तद्वाक्यमप्रमाणं भवति ।

अपिच, चैत्रः कीदृशः इति प्रश्ने, चैत्रो न कलञ्जं भक्षयेत् इत्युत्तरयितुः असंबद्धप्रलापित्वं न स्यात् । बलवदनिष्टजनककलञ्जभक्षणानुकूलकृतिमानिति वाक्यं तस्य प्रश्नस्योत्तरं भवति । तत्समानार्थकं च न कलञ्जं भक्षयेदिति वाक्यमिति तस्य सदुत्तरत्वापत्तेः। अस्मन्मते तु न कलञ्जमित्यादि वाक्यं कलञ्जभक्षणप्रवृत्तौ स्वज्ञानविशेषाधीनानुमितिप्रयोज्याभावप्रतियोगित्वसंबन्धेन निवर्तनावत्त्वं बोधयतीति तस्योत्तरत्वमेव न प्रसज्यते । किंच चैत्रः कीदृशः इति प्रश्नस्य चैत्रमुख्यविशेष्यकबोधजनकमेवोत्तरं भवितुमर्हति । न ह्यस्मन्मते निरुक्तवाक्यात् चैत्रमुख्यविशेष्यको बोधः । अपितु कृतिमुख्यविशेष्यक एवेति न तस्योत्तरत्वं प्रसज्यते । न च तर्हि कीदृशी कृतिः इति प्रश्ने न कलञ्जं भक्षयेदित्युत्तरं वक्तुः असंबद्धप्रलापित्वं न स्यात्, तस्य कृतिमुख्यविशेष्यकबोधजनकत्वादिति वाच्यम् । कीदृशी कृतिः इति प्रश्नः स्त्रीलिङ्गविशिश्टकृतिविषयकः कृतिशब्देन लिङ्गविशेषस्याप्युपस्थापनात् । स्त्रीलिङ्गविशिष्टकृतिमुख्यविशेष्यकबोधजनकमेव तस्योत्तरं भवितुमर्हति । आख्यातोपात्तकृतिस्तु न लिङ्गान्वयिनी, आख्यातस्य लिङ्गाबोधकत्वात् । एवंच स्त्रीलिङ्गविशिष्टकृतिमुख्यविशेष्यकबोधाजनकं न कलञ्जमित्यादि वाक्यं न तस्य प्रश्नस्योत्तरम् । तस्मात् लिङर्थः प्रवर्तना । सा च लोके पुरुषाभिप्रायः, अपौरुषेये वेदे लिङादिनिष्ठः अलौकिको व्यापारः इति सिद्धमिति निरूपयन्ति ।।

महाभाष्यस्वरसप्रमाणकाः नव्यवैयाकरणाः, 'विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्' इति सूत्रात् विध्यादयो लिङोऽर्थाः। तत्र विधिः प्रेरणा। यथा निकृष्टस्य भृत्यादेः स्वामिना स्वाभिलषिते प्रेरणम्। इयमेवाज्ञा। यथा स्वर्गकामो यजेत, अनेन पथा याहि इत्यादिः। महाभाष्यकारः विधिनिमन्त्रणेत्यादिसूत्रे 'विधिः प्रेरणम्' इति बभाषे। न्यायभाष्यकारः वात्स्यायनोऽपि 'विधिर्नियोगः' इत्याह। नियोगः नियोजनम् नियोजयतीत्यादिप्रतिपाद्यः प्रवर्तकनिष्ठव्यापारविशेषः। अत एव भगवान् पाणिनिः विधिपदार्थं तद्विशेषनिमन्त्रणादिभिः विधिनिमन्त्रणेति सूत्रे विवृणोति। निमन्त्रणं नाम श्राद्धादिभोजनानुकूलः प्रयोजकनिष्ठो व्यापारः, निमन्त्रयते इति वाक्यात् तथा प्रतीतेः। विधिपदार्थस्य प्रवर्तकनिष्ठप्रवृत्त्यनुकूलव्यापाररूपत्वे एव निमन्त्रणादेः विधिपदार्थत्वं संभवति। हरिरप्याह—

'अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि'। इति।

प्रवर्तकत्वं च लिङाद्युच्चारयितृत्वे सति स्वतन्त्रत्वम्। स्वतन्त्रत्वोपादानात् न लिङुच्चारयितुः राजप्रेरितस्य पदातेः प्रवर्तकत्वापत्तिः। लोके गामानयेत्यादिशब्दोच्चारयितुः प्रवर्तकस्य व्यापारः तादृशशब्दप्रयोगः प्रेरणा। अथवा प्रयुज्यमानः लिङन्तशब्दः प्रेरणा। सैव लिङर्थः। स च स्वप्रयोक्तृत्वसंबन्धेन प्रवर्तकपुरुषवृत्तिः। वेदे तु प्रवर्तकः यजेतेत्येवमादिः लिङन्तशब्द एव। अपौरुषेयत्वाद्वेदस्य पुरुषविशेषस्य प्रवर्तकत्वासंभवात्। लिङर्थः प्रेरणापि स एव लिङन्तशब्दः। न च प्रवर्तकनिष्ठस्यैव प्रवृत्त्यनुकूलव्यापारस्य प्रेरणात्वात् वैदिकलिङन्तशब्दस्य चातथाभूतस्य कथं प्रेरणात्वम्? न हि स्वात्मकप्रवर्तकनिष्ठत्वं स्वस्य संभवतीति वाच्यम्। यथा अधिकरणस्वरूपस्यापि घटाभावादेः घटाभावत्वादिना भूतलवृत्तित्वम्, तथैव

प्रेरणात्वेन रूपेण स्वात्मकप्रवर्तकनिष्ठत्वं वैदिकलिङन्तशब्दरूप-प्रेरणायाः संभवति। लिङ्पदप्रवृत्तिनिमित्तं प्रेरणात्वं च प्रेरयत्यादि-धात्वर्थतावच्छेदकतया सिद्धः अखण्डो धर्मः। इमां प्रेरणां शब्द-रूपत्वात् शाब्दी भावनेति व्यवहरन्ति। प्रेरणात्वेन रूपेण सविषया चेयं शब्दरूपा प्रेरणा लिङ्गसंख्यान्वयायोग्यत्वात् व्यापारव्यपदेशं भजते। एवंच पचेदित्यादौ प्रेरणाविषयः पाकः इति शाब्दबोधः।

यत्तु प्रवृत्तिहेतुज्ञानविषयः प्रवर्तना, प्रेरणा इति चोच्यते। प्रवृत्तौ इष्टसाधनताज्ञानं हेतुरिति तद्विषयः इष्टसाधनत्वमेव प्रेरणा। न च भवत्प्रेरणया अहमध्यापयामि, न किंचिन्ममेष्टमिति व्यवहारात् इष्टसाधनत्वातिरिक्ता सेति वाच्यम्। क्वचित् साक्षात् इष्टसाधन-ताज्ञानात् प्रवृत्तिः, क्वचित्परम्परया। न मे अध्यापनेन साक्षात् किं-चिदिष्टमित्यभिप्रायकः निरुक्तव्यवहारः। तस्मादिष्टसाधनत्वमेव प्रेरणात्वेन लिङर्थः इति।

तदसंगतम्— प्रवृत्तौ एतत्फलसाधनमिदं कृतिसाध्यं भवतु इतीच्छारूपा चिकीर्षैव हेतुः। तया चेष्टसाधनताज्ञानमन्यथासिद्ध-मिति न प्रवृत्तिहेतुः। अतः इष्टसाधनत्वं न प्रवर्तना प्रवृत्तिहेतु-ज्ञानाविषयत्वात्। न चेष्टसाधनताज्ञानं चिकीर्षाद्वारैव प्रवृत्तिहेतुः। व्यापारेण व्यापारिणो नान्यथासिद्धिरिति न्यायात् व्यापारेण चिकीर्षया व्यापारिणः इष्टसाधनताज्ञानस्य नान्यथासिद्धत्वमिति वाच्यम्। यत्र व्यापारिणः मानान्तरेणावगतकारणत्वनिर्वाहाय व्यापारः कल्प्यते, तत्रैव व्यापारेणेत्यादिन्यायः प्रवर्तते। यथा यजेत स्वर्गकामः इति श्रुत्या स्वर्गसाधनत्वेनावगतस्य यागस्य आशुविनाशिनः कालान्तर-भाविस्वर्गाव्यवहितपूर्ववृत्तित्वरूपकारणत्वानुपपत्त्या अपूर्वं व्यापारः

कल्प्यते। तत्र अपूर्वेण व्यापारेण यागस्य व्यापारिणः न स्वर्गेऽन्यथा-सिद्धता, नान्यत्र मानाभावात्। तस्मादिष्टसाधनताज्ञानं प्रवृत्तावन्यथा-सिद्धमेव।

किंच यागः इष्टसाधनं, कृतिसाध्यः, नात्र दुःखम्, तस्मात् त्वं कुरु इति स्वारसिको व्यवहारः प्रामाणिकानां दृश्यते। यदि लिङा इष्टसाधनत्वं बोध्यते, तदा यागः इष्टसाधनमिति वाक्येनैव तस्य बोधितत्वात् पुनः त्वं कुरु इति विधिप्रत्ययेन तद्बोधने पौनरुक्त्यं प्रसज्यते। न च वारद्वयमभिहितमिष्टसाधनत्वं दृढीकृतं भवतीति सर्वथा इष्टसाधनत्वबोधनाय त्वं कुरु इत्युक्तिरिति वाच्यम्। तथापि, तस्मादित्यनेन हेतुहेतुमद्भावबोधनासंगतेर्दुर्वारत्वात्। नह्यभेदे हेतुहेतुमद्भावः क्वचिदपि संभवति।

अपिच राज्ञा प्रवर्तितोऽहं करोमि इति व्यवहारात् प्रवर्तना प्रवर्तकनिष्ठेत्यवसीयते। प्रवर्तनैव लिङर्थः इति भाष्येण स्पष्टं प्रतीमः। इष्टसाधनत्वं यागपाकादौ वर्तते, न प्रवर्तकपुरुषे। तस्मान्नेष्टसाधनत्वं लिङर्थः प्रवर्तना। न चेष्टसाधनताज्ञापनं प्रवर्तकपुरुषनिष्ठमिति वाच्यम्। तावता तस्यैव प्रवर्तनात्वं संभवति न भवदभिमतेष्टसाधनत्वस्य। प्रवर्तनारूपमिष्टसाधनताज्ञाप-नमेव लिङर्थः इत्यभिधाने चास्मदभिमत एवार्थः विधान्तरेणोक्तो भवति। इष्टसाधनताज्ञापनं नाम इष्टसाधनताज्ञानानुकूलो व्यापारः। स च लिङन्तशब्दरूप-एव। तस्य चेष्टसाधनताज्ञानानुकूलत्वमनुपदं वक्ष्यते। अपिच, यथा पाकः इष्टसाधनमिति ज्ञानं प्रवृत्तिहेतुः, तथा साध्येष्टकः पाकः इति ज्ञानमपि। तज्ज्ञानादिव निरुक्तज्ञानादपि प्रवृत्तेरनुभवसिद्धत्वात्। तथाच विनिगमनाविरहात् इष्टसाधनत्वे

इव साध्येष्टकत्वेऽपि लिङः शक्तिकल्पनया गौरवम्। नच साधनत्वमखण्डोपाधिः, साध्यत्वं च साधनघटितं गुरुभूतमिति कारणतावच्छेदकगौरवात् साध्येष्टकत्वज्ञानस्य न कारणता, किंतु इष्टसाधनताज्ञानस्यैवेति वाच्यम्। साधनत्वस्येव साध्यत्वस्याप्यखण्डस्य संभवात् साध्येष्टकत्वज्ञानस्य कारणत्वे कारणतावच्छेदकगौरवविरहात् विनिगमनाविरहतादवस्थ्यात्। एवं, कृतिसाध्यत्वज्ञानस्येव कृतिसाधनकत्वज्ञानस्यापि प्रवृत्तौ कारणत्वात् विनिगमनाविरहेण कृतिसाध्यत्वे इव कृतिसाधनकत्वेऽपि शक्तिकल्पनागौरवं बोध्यम्।

तथाच लिङाद्यन्तशब्दरूपा प्रेरणा। सा च विषयतया धात्वर्थे अन्वेति। पचेत् इत्यादौ प्रेरणाविषयः पाकः इति शाब्दबोधो जायते। ततः दोषाभावविशिष्टया आप्तोक्तया प्रेरणया स्वविषये पाकादौ इष्टसाधनत्वमनुमीयते। विना इष्टसाधनताज्ञानं पुरुषप्रवृत्तेरनुदयात्। तथाच भाष्यम्—'सर्वे इमे स्वभूत्यर्थं प्रवर्तन्ते'। इति।

अत्र हेतुकोटौ आप्तत्वानुपादाने इष्टसाधनत्वरूपसाध्याभाववति विषभक्षणे विषं भुंक्ष्वेति शत्रुप्रोक्तवाक्यघटकलिङर्थप्रेरणाविषयत्वसत्त्वेन व्यभिचारः। अतस्तद्वारणायाप्तत्वं निवेशितम्। भ्रमादिदोषरहितत्वे सति तत्तत्क्रियाविषये स्वेष्टप्रतिबन्धानिष्टोत्पत्त्युभयानुकूलव्यापाराभाववत्त्वमाप्तत्वम्। यत्राप्तेन गृहविशेषे भोजनमत्यन्तानिष्टसाधनमिति बोधनाय, विषं भुंक्ष्व मा चास्य गृहे भुंक्थाः इत्युक्तम्, तत्र न विषभक्षणे इष्टसाधनत्वाक्षेपः, न वा श्रोता तत्र प्रवर्तते। इत्थं च इष्टसाधनत्वाभाववति विषभक्षणे आप्तोक्तप्रेरणाविषयत्वसत्वेन व्यभिचारः इति दोषाभावविशिष्टत्वं प्रेरणाविशेषणमुपात्तम्। तत्रानिष्टसाधत्वनिश्चयप्रयुक्तद्वेषस्य प्रतिबन्धकस्य सत्त्वेन दोषा-

भाववैशिष्ट्यघटितहेतोः तत्राभावान्न व्यभिचारः। एवंच पचेदित्यादौ पचिना पाकत्वेनोपस्थिते भाविपाके पक्षे निरुक्तप्रेरणाविषयत्वेन हेतुना इष्टसाधनत्वमनुमाय पाके प्रवर्तते।

बहुलायाससाध्ये यागादौ तु सामान्यतः इष्टसाधनताज्ञानं न प्रवर्तकम्। अपितु विशिष्य स्वर्गत्वादिना स्वर्गादिसाधनताज्ञानम्। यजेतेत्यादिवैदिकप्रेरणाविषयत्वे स्वर्गसाधनताव्याप्तिज्ञानं उपदेशेन शाब्दबोधरूपमुत्पद्यते। ततश्च स्वर्गसाधनत्वानुमानात् यागादौ प्रवर्तते पुरुषः। प्रथमोपदेष्टुः पुरुषस्य तादृशं व्याप्तिज्ञानं योगाज्जायते।

न च ज्योतिष्टोमादिव वाजपेयादितोऽपि स्वर्गो जायते। वाजपेयादिजन्यस्वर्गसाधारणस्य च स्वर्गत्वस्य ज्योतिष्टोमकार्यतातिप्रसक्तस्य तत्कार्यतावच्छेदकत्वं न संभवतीति कथं ज्योतिष्टोमादौ स्वर्गसाधनत्वग्रहः इति वाच्यम्। वाजपेयादिना स्वर्गोत्पत्तिबोधकवाक्यान्तरपर्यालोचनवान् पुरुषः प्रेरणाविषयत्वेन विजातीयस्वर्गसाधनत्वमेवानुमिनोति। वैजात्यं चानतिप्रसक्तं कार्यतावच्छेदकं संभवति। ध्वनितश्चायमर्थः 'न चान्तरेण यजिं यजिफलं लभन्ते।' इति भाष्ये।

अहरहः सन्ध्यामुपासीत इत्यादिनित्यकर्मविधायकवाक्यघटकलिङर्थप्रेरणया प्रत्यवायाभावरूपेष्टसाधनत्वमिव अवश्यकर्तव्यत्वमप्याक्षिप्यते। ततश्च तदकरणे प्रत्यवायः सिद्ध्यति।

न कलञ्जं भक्षयेदित्यत्र आरोपितं कलञ्जभक्षणं प्रेरणाविषयः इति शाब्दबोधः। प्रतियोग्यारोपस्याभावबुद्धौ हेतुत्वात् तदनन्तरं कलञ्जभक्षणाभावः प्रेरणाविषयः इति मानसं ज्ञानमुत्पद्यते। न

चेदमेव शाब्दबोधरूपमिति शङ्कनीयम् । प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति नियमविरोधेन लिङर्थप्रेरणायाः लिङ्प्रकृत्यर्थेनान्वयायोगात् । ततः यदभावत्वेन यदभावः प्रेरणाविषयतया बोध्यते तत्प्रतियोगि क्लृप्तेष्टाधिकानिष्टसाधनमिति व्याप्तेः प्रेरणाविषयतया बोधिताभावप्रतियोगिनि कलञ्जभक्षणे अनिष्टसाधनत्वमनुमिनोति । ततश्च निवर्तते कलञ्जभक्षणात् ।

'तत्तु समन्वयात्' इति सूत्रे भाष्ये 'न ब्राह्मणं हन्यादित्यादौ हन्त्यर्थानुरागी नञ् । नञश्चैष स्वभावः यत्स्वसंबन्धिनोऽभावं बोधयतीति । निषेध्याभावबुद्धिश्च निषेध्यविषयौदासीन्ये कारणम्' इति वदतां शङ्करभगवत्पादानामपि अयमेव निषेधवाक्यार्थः अभिमतः इति प्रतीमः । अत्र हि भाष्ये धात्वर्थाभावे लिङर्थप्रेरणाविषयतेति लभ्यते । यत्तु अत्र वाचस्पतिमिश्राणां निषेध्ये अनिष्टसाधनताबुद्धिरेव निषेध्याभावबुद्धिरिति व्याख्यानं, तदसंगतमक्षरास्वारस्यात् । न हि निषेध्याभावबुद्धिपदेन निषेध्ये अनिष्टसाधनताबुद्धिरिति स्वरसतः प्रतीयते । निषेध्याभावस्य प्रेरणाविषयत्वेन बुद्धिः निषेध्यविषयौदासीन्ये कारणमिति अस्मद्व्याख्यानन्तु अक्षरानगुण्यं भजते । किंच, अनिष्टजनकत्वबुद्धिरिति व्याख्याने, नञः लिङर्थस्य तदर्थैकदेशस्य वाऽनुरागः प्राप्तः, न तु हन्त्यर्थानुरागः इति, हन्त्यर्थानुरागी नञिति भाष्यविरोधः । 'भावं तु बादरायणोऽस्ति हि' इति सूत्रे भाष्ये, न सुरां पिबेदिति वाक्ये पदत्रयसंबन्धात् सुरापानप्रतिषेध एव गम्यते इति प्रतिपादयन्ति आचार्याः, न तु विध्यर्थप्रतिषेधो गम्यते इति । तस्मात् निषेधवाक्यानामस्मदुक्तार्थ एवाचार्यसंमतः इति स एव युज्यते । तस्मात् लिङन्तशब्दप्रयोगरूपा, प्रयुज्यमानलिङन्तशब्दरूपा वा प्रेरणा लिङर्थः इति निरूपयन्ति ॥

प्राचीनाः वैयाकरणाः, विधिनिमन्त्रणेति सूत्रात् विध्यादयः लिङोऽर्थाः । विधिः—प्रवर्तनं अप्रवृत्तप्रयोज्यस्य अज्ञातस्वाभिलषितोपाये इष्टसाधनताबोधनम् । निमन्त्रणं - आवश्यके श्राद्धभोजनादौ दौहित्रादेरिष्टसाधनताबोधनम् । आमन्त्रणं - स्वाभिलषिते कामचारेण प्रवृत्तस्य इष्टसाधनताबोधनम् । यथा इहासीतेति । अधीष्टं - संमानपूर्वकमध्यापनादौ इष्टसाधनताबोधनम् । एतच्चतुष्टयानुगतं प्रवर्तनात्वमिति तदेव लिङः शक्यतावच्छेदकम् । प्रवर्तनायां लिङिति निष्कर्षः । यदाहुः—

‘अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि ।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया ।।
न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा ।
विध्यादीनामुपादानं चतुर्णामादितः कृतम् ।।’ (वा-प) इति ।

प्रवर्तनारूपं—प्रवर्तनात्वम् । भेदस्य—तत्तद्रूपेण पार्थक्यस्य । प्रवर्तनात्वं च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम् । इष्टसाधनत्वावच्छिन्नपाकविषयकज्ञानस्य पाकप्रवृत्तौ कारणत्वात् तत्त्वमिष्टसाधनत्वे वर्तते इति इष्टसाधनत्वं लिङर्थः इति फलितम् ।

‘कर्ता शास्त्रार्थवत्त्वात्’ इत्यधिकरणे भामत्यां ‘शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्’ इति जैमिनिसूत्रं, ‘शास्त्रफलं-स्वर्गादि प्रयोक्तरि - कर्तरि, कुतः? प्रयोक्तृफलसाधनतालक्षणत्वाद्विधेः । कर्त्रपेक्षितोपायता हि विधिः ।’ इति व्याचक्षाणाः वाचस्पतिमिश्राः कण्ठरवेणैव इष्टसाधनत्वस्य लिङर्थविधिरूपतां निरूपयन्ति । मण्डनमिश्रा अप्याहुः—

‘पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्तकः ।

प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम् ।।' इति। न च कृतिसाध्यत्वज्ञानस्यापि प्रवृत्तौ हेतुतया तद्विषयस्य कृतिसाध्यत्वस्यापि निरुक्तं प्रवर्तनात्वमस्तीति तदपि लिङर्थः स्यादिति वाच्यम् । कृतिसाध्यताज्ञानमात्रं न प्रवर्तकं, अशक्तस्यापि कार्यविशेषे प्रवृत्त्यापत्तेः। किन्तु मदीयकृतिसाध्यमिति ज्ञानम् । मदंशान्तर्भावेण कृतिसाध्यत्वं न लिङा बोधयितुं शक्यते । परन्तु, यागः मत्कृतिसाध्यः मत्कृतिसाध्यत्वविरोधिधर्मानधिकरणत्वात् इत्यनुमानेन तज्ज्ञानं जायते । एवंच तेनैव कृतिसाध्यताज्ञानसंभवेन लिङः तत्र शक्तिकल्पनं न युज्यते । एवं लौकिकप्रमाणादेव कृतिसाध्यताबोध उपपद्यते । एवं धात्वर्थयागस्य आख्यातार्थकृतावनुकूलतासंबन्धेनान्वयबोधानन्तरं यागः कृतिसाध्यः इति मानसमपि ज्ञानं संभवति । अतोऽन्यलभ्यं कृतिसाध्यत्वं न लिङर्थः अनन्यलभ्यः शब्दार्थ इति न्यायात् । अपिच कृतिसाध्यताज्ञानं न प्रवर्तकम् । कृत्यसाध्ये चन्द्रस्पर्शादौ कुतो न प्रवर्तते इति चेत् । ततः इष्टाभावेन वृथाश्रमजनकत्वेन तत्र द्वेषादेव । तस्मात् कृतिसाध्यत्वस्य लिङर्थता न स्वीकरणीया ।

न च मधुविषसंपृक्तान्नभोजने प्रवृत्तेर्वारणाय बलवदनिष्टाननुबन्धित्वज्ञानस्य प्रवृत्तिहेतुताया वक्तव्यत्वात्, बलवदनिष्टाननुबन्धित्वमपि लिङर्थः इति वाच्यम् । तज्ज्ञानस्य प्रवर्तकत्वे बहुलायाससाध्ये यागे प्रवृत्तिर्न स्यात् । ततो बहुतरदुःखानामान्तरालिकानामुत्पत्त्या बलवदनिष्टानुबन्धित्वज्ञानस्यैव सत्वात् । एवमल्पस्यापि दुःखस्य कुतश्चित् दुःखात् बलवत्त्वेन अनुगतं बलवत्त्वमपि दुर्वचम् । तस्मान्न निरुक्ताननुबन्धित्वज्ञानं प्रवर्तकम् । अपि च, तद्विषयकप्रवृत्तौ तद्विषयकद्वेषस्य प्रतिबन्धकतया तदभावस्य प्रतिबन्धकाभावविधया

हेतुत्वं क्लृप्तमिति द्वेषाभावेन बलवदनिष्टाननुबन्धित्वज्ञानमन्यथासिद्धं भवति। न च कारणताग्राहकस्य अन्वयव्यतिरेकसहचारज्ञानस्य द्वेषाभावे इव बलवदनिष्टाननुबन्धित्वज्ञानेऽपि सत्वात् तेनैव द्वेषाभावस्यान्यथासिद्धिः स्यादिति वाच्यम्। परकीयसुन्दरीगमनं नरकमुत्पादयतीति जानन्नप्यास्तिकः तज्जन्यसुखे उत्कटेच्छया तत्र द्वेषाभावदशायां परकीयसुन्दरीगमने प्रवर्तते। न चायं तत्र बलवद-निष्टाननुबन्धित्वं जानाति। ततश्च व्यतिरेकव्यभिचारात् न तज्ज्ञानं प्रवृत्तौ हेतुः। अपितु द्वेषाभाव एव। स चास्त्येव तस्येति न व्यभिचारः। न च द्विष्टसाधनताबुद्धेः द्वेषहेतोः सत्त्वात् कुतो न तत्र तस्य द्वेषः इति वाच्यम्। तत्र द्वेषं प्रति तज्जन्यसुखादौ उत्कटेच्छा-सामग्रीविरहविशिष्टद्विष्टसाधनताज्ञानस्यैव हेतुतया इच्छासामग्री-सत्वे द्वेषहेतोरभावात्। अथवा, द्वेषं प्रति तादृशेच्छासामग्री स्वातन्त्र्येण प्रतिबन्धिका। उत्कटत्वं च जातिविशेषः, विषयिताविशेषो वा। अतो न तत्र द्वेष इति द्वेषाभाव एव हेतुः, न बलवदनिष्टाननुबन्धित्वज्ञान-मिति न तत् लिङः शक्यम्।

एतेन—बलवदनिष्टानुबन्धित्वज्ञानं प्रवृत्तौ प्रतिबन्धकम्। तद-भाव एव प्रतिबन्धकाभावविधया हेतुः, न बलवदनिष्टाननुबन्धित्व-ज्ञानमिति वदन्तः परास्ताः। अगम्यागमनं नरकसाधनत्वेन जान-तोऽप्यास्तिककामुकस्य असति द्वेषे तत्र प्रवृत्तेर्जायमानत्वेन तादृशानु-बन्धित्वज्ञानस्य प्रतिबन्धकत्वासंभवात्। द्वेषप्रतिबन्धकतयैवोपपत्तौ तज्ज्ञानप्रतिबन्धकतायां मानाभावाच्च।

यत्तु, यागीयपशुहिंसा न नरकं जनयति। न हिंस्यादिति निषेधशास्त्रं रागतः प्राप्तहिंसाविषयतया संकोच्यते इति प्रामाणिकाः मन्यन्ते। पशु-मालभेत, न हिंस्यात् इति शास्त्रयोः विरोधे एव शास्त्राप्रामाण्यभिया

सामान्यशास्त्रस्य विशेषपरतया संकोचो युज्यते । इष्टसाधनत्वमात्रस्य लिङर्थतायां निषेधशास्त्रेण आलभेतेति विधिः न विरुध्यते । पश्वालम्भे इष्टसाधनत्वस्य निषेधबोधितानिष्टसाधनत्वस्य च संभवात् परकीयसुन्दरीगमने उभयोः समावेशेन विरोधाभावात् । अतः इष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वरूपं बलवदनिष्टाननुबन्धित्वमपि लिङर्थः इति स्वीकरणीयम् । एवंच बलवदनिष्टानुबन्धित्वाननुबन्धित्वयोः विरोधेन तद्बोधकयोः निरुक्तशास्त्रयोर्विरोधे न हिंस्यादिति शास्त्रं विषयविशेषे संकोच्यते इति नैयायिका वदन्ति ।

तन्न, नान्तरीयकत्वस्य दुर्वचत्वेन तद्घटितस्य बलवदनिष्टाननुबन्धित्वस्य लिङर्थत्वासंभवात् । इष्टजनकजन्यत्वं इष्टोत्पत्तिनान्तरीयकत्वमिति न युक्तम् । ब्रह्महननादिजन्यनरकस्यापि इष्टजनकतादृशहननजन्यत्वेन नान्तरीयकत्वापत्त्या तदतिरिक्तदुःखाजनकत्वाभावेन न ब्राह्मणं हन्यादिति निषेधानुपपत्तिः । इष्टव्याप्यत्वं तदिति चेन्न । यदि व्याप्यत्वं कालिकं, तदा यागादेरपि न निरुक्ताननुबन्धित्वं संभवति । आन्तरालिकदुःखस्यापि इष्टस्वर्गसमानकालिकत्वाभावेन इष्टोत्पत्तिनान्तरीयकातिरिक्तत्वात् । यदि दैशिकं व्याप्यत्वं विवक्षितं, तदा ब्राह्मणहननादिजन्यनरकस्यापि इष्टोत्पत्त्यधिकरण एव जायमानत्वेन इष्टव्याप्यत्वात् इष्टोत्पत्तिनान्तरीयकत्वात् तदतिरिक्तदुःखजनकत्वस्य ब्राह्मणहनने बाधात् तेषां निषेधानुपपत्तिः । इष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वमित्यनेन बलवद्द्वेषविषयदुःखाजनकत्वमेव विवक्षितमिति न दोषः इति चेन्न । रागिणः कलञ्जभक्षणजन्यनरके बलवद्द्वेषानुदयेन तत्पुरुषीयबलवद्द्वेषविषयदुःखाजनके तद्भक्षणे निरुक्तदुःखाजनकत्वाभावो बाधितः इति न कलञ्जं भक्षयेदिति निषेधानुपपत्तिस्तदवस्था । नरकाजनकत्वमेव निरुक्ताननुबन्धित्वमित्यनेन विवक्षितमिति चेन्न । लिङर्थाभावस्य नरक-

जनकत्वस्य कलञ्जभक्षणादौ सत्त्वेन न कलञ्जं भक्षयेदित्यादीनामुपपत्तावपि, ज्वरितः न भुञ्जीत इति निषेधानुपपत्तिः, नरकजनकत्वस्य भोजने बाधात् । तस्मात् बलवदनिष्टाननुबन्धित्वं दुर्वचमिति न लिङर्थः ।

अपिच, तस्य लिङर्थत्वेऽपि न हिंस्यादिति निषेधस्य संकोचो न लभ्यते । यथा न्यायमते लिङर्थस्यापि तस्य श्येनेनाभिचरन् यजेतेत्यत्र बाधात् धात्वर्थे नान्वयः स्वीक्रियते, तथा लिङर्थस्यापि तस्य आलभ्भे धात्वर्थे अबोधनेऽपि इष्टसाधनतामात्रबोधनेन आलभेत इति विधेरुपपत्तेः । न च तत्र लिङर्थैकदेशबाधो दुर्वारः इति वाच्यम् । निषेधशास्त्रस्य यागीयपश्वालम्भादौ सर्वथा अप्रवृत्तिरूपात् बाधात् अस्य न्यूनत्वात् । तस्मात् निषेधशास्त्रसंकोचलाभाय बलवदनिष्टाननुबन्धित्वं लिङर्थः इति वचनं नोपपद्यते । तस्मादिष्टसाधनत्वमात्रं लिङर्थः ।

न च ज्योतिष्टोमादिव वाजपेयादितोऽपि स्वर्गोत्पत्त्या स्वर्गत्वावच्छिन्नसाधनत्वं बाधितं ज्योतिष्टोमे लिङा कथं बोधयितुं शक्यमिति वाच्यम् । विजातीयस्वर्गसाधनत्वे एव लिङः शक्तिस्वीकारेण तस्याबाधितस्य तत्र बोधनसंभवात् । न चाफले नित्यकर्मणि सन्ध्योपासनादौ इष्टसाधनत्वं नास्तीति, अहरहः सन्ध्यामुपासीत इति विधिः कथं संगच्छते इति वाच्यम् । तस्यापि प्रत्यवायपरिहाररूपफलवत्त्वात् । तदुक्तं भगवता—

यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ।।

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ।।' (भ-गी)

इति । पावनत्वोक्त्या अनुद्दिष्टोऽपि प्रत्यवायपरिहारः फलमिति गम्यते । एवमार्थवादिकमपि फलं तस्यास्त्येव । अत एव 'सर्वशक्तौ प्रवृत्तिः स्यात् तथाभूतोपदेशात्' इति सूत्रं 'काम्यं यथा फलायोपदिष्टं तथा नित्यमपीति सूत्रार्थः' इति भट्टाचार्या विवृण्वन्ति । ननु न कलञ्जं भक्षयेदित्यादौ लिङर्थस्येष्टसाधनत्वस्याभावः कलञ्जभक्षणे नञा न बोधयितुं शक्यते । तत्र तृप्तिरूपेष्टसाधनत्वस्य सत्त्वेन तदभावस्य बाधादिति चेन्न ।

निषेधस्थले लिङः अनिष्टसाधनत्वे लक्षणा । नञ्पदं तात्पर्यग्राहकम् । लिङर्थश्चाश्रयतया धात्वर्थे अन्वेति । कलञ्जभक्षणमनिष्टसाधनमिति बोधः इति न काप्यनुपपत्तिः ।

इष्टसाधनत्वं लिङर्थः । असुराः, अविद्या इत्यादाविव नञः विरोधिनि लक्षणा । एवं चेष्टविरोध्यनिष्टसाधनत्वं धात्वर्थे बोध्यते । न चाविद्या इत्यादाविव समासापत्तिः शङ्कनीया । विभाषाधिकारेण तस्य वैकल्पिकत्वादित्यन्ये ।

प्रत्यवायाभावरूपेष्टसाधनत्वं लिङर्थः । तदभावश्च नञा धात्वर्थे बोध्यते । एवं चार्थात् तद्भक्षणे सति प्रत्यवायः सिद्ध्यतीति केचित् । धात्वर्थकलञ्जभक्षणान्विते नञर्थे अभावे लिङर्थः प्रत्यवायाभावरूपेष्टसाधनत्वं अन्वेति । कलञ्जभक्षणाभावः प्रत्यवायाभावसाधनमिति बोधः । तेन कलञ्जभक्षणे प्रत्यवायसाधनत्वं सिद्ध्यतीति परे ।

तथाचेष्टसाधनत्वमात्रं लिङर्थं इति निरूपयन्ति ।

नैयायिकास्तु पचेदिति वाक्यार्थं बुध्वा पाके पुरुषः प्रवर्तते । प्रवृत्तौ अव्यवहितकारणं चिकीर्षा । सा स्वरूपसत्येव प्रवृत्तिं जनयति, न ज्ञाता । अतः तज्ज्ञानानुपयोगात् न लिङा तस्या बोधनमुपयुज्यते । तस्मात् तां यस्य ज्ञानं जनयति, स एव लिङर्थो विधिः । तदुक्तमाचार्यैः—'यस्य ज्ञानं प्रयत्नजननीमिच्छां प्रसूते, सोऽर्थविशेषो विधिः ।' इति । तादृशं च ज्ञानमिष्टसाधनताज्ञानं कृतिसाध्यताज्ञानं बलवदनिष्टाननुबन्धित्वज्ञानं चेति, तद्विषयः इष्टसाधनत्वं, कृतिसाध्यत्वं, बलवदनिष्टाननुबन्धित्वं चेति त्रितयं लिङर्थः ।

प्रेरणाया लिङर्थतावादिभिरपि इष्टसाधनत्वानुमानद्वारेणैव प्रवृत्तेरुपपादनेन इष्टसाधनताज्ञानावश्यकतायाः सर्वसिद्धत्वात् इष्टसाधनत्वं लिङर्थः, न तु वक्तुरिच्छा, अलौकिकप्रेरणा वा । न च राजादेः प्रवर्तकत्वव्यवहारानुरोधेन तदिच्छाज्ञानमावश्यकमिति अनन्यलभ्या इच्छैव शक्या, न तु तया आक्षेपलभ्यमिष्टसाधनत्वमित्युक्तमिति वाच्यम् । राज्ञा उक्तात् पचेत् इति वाक्यात् लिङर्थेष्टसाधनतां पाके बुध्वा पाके प्रवर्तते पुरुषः । अतो राजा प्रवर्तक इत्यभिधीयते । यदा चैत्रः मैत्रः पचेदिति शब्दं नोच्चारयति, मैत्रस्तु इङ्गितादिना तस्येच्छामनुमाय पाकं करोति, तदा केन प्रेरितः त्वं पाकं करोषि इति पृष्टः मैत्रः, नाहं चैत्रेण प्रेरितः, किंतु तदभिप्रायं विदित्वा पचामीति ब्रूते । एवं, चैत्रोऽपि न मयाऽयं प्रेरितः, किन्तु स्वबुद्धिचातुर्येण मदाशयं ज्ञात्वा पचति इति वदति । प्रवृत्तिप्रयोजकज्ञानविषयेच्छाश्रयत्वस्य प्रवर्तकतारूपत्वे, तस्य चैत्रे अक्षतत्वात् निरुक्तव्यवहारो नोपपद्येत । अतः न तादृशेच्छाश्रयत्वं प्रवर्तकत्वम्, अपितु प्रवृत्तिकारणेष्टसाधनताबोधजनकलिङाद्युच्चारयितृत्वमेव । न च

तादृशलिङादिकमुच्चारयितुः राजप्रेरितपदातेरपि प्रवर्तकत्वापत्तिः, अन्याप्रेरितत्वविशेषणे च, पित्रादिप्रेरितस्य राज्ञोऽपि प्रवर्तकत्वं न स्यादिति वाच्यम्। तादृशलिङाद्युच्चारयितृत्वे सति स्वतन्त्रत्वस्यैव प्रवर्तकत्वरूपत्वात्। पित्रादिप्रेरितस्यापि राज्ञः स्वातन्त्र्यमस्तीति प्रवर्तकत्वमुपपद्यते। पदातेरभिप्रायज्ञानं न प्रवृत्तिप्रयोजकं, अपितु राज्ञः इत्यत्र स्वातन्त्र्यस्यैव नियामकत्वात् तस्य प्रवर्तकत्वशरीरानुप्रवेशेन सर्वसामञ्जस्यात्। तस्मात् प्रवर्तकत्वव्यवहारानुरोधेनेच्छाज्ञानमावश्यकमिति सा लिङ्वाच्येति न संगच्छते।

एवं यागादिप्रवृत्तौ नेष्टत्वेनेष्टसाधनताज्ञानं कारणम्। अपि तु स्वर्गत्वादिना स्वर्गादिसाधनताज्ञानमेव। अयमत्र प्रवर्ततामित्याकारकाप्तेच्छाविषयप्रवृत्तिविषयत्वे स्वर्गसाधनत्वव्याप्त्यभावेन तेन हेतुना स्वर्गसाधनत्वं नानुमातुं शक्यते। अपितु सामान्यतः इष्टसाधनत्वमेव। तच्च यागादिप्रवृत्तावनुपयुक्तमिति प्रवृत्त्युपयोगिनः स्वर्गसाधनत्वस्यानुमानलभ्यत्वाभावेन अनन्यलभ्यमिष्टसाधनत्वं लिङर्थः। न च लिङाऽपि सामान्यतः इष्टसाधनत्वमेव बोध्यते इति शङ्का कार्या। समभिव्याहृतपदोपस्थापितकामनाविषयतावच्छेदकत्वोपलक्षिततत्तद्धर्मावच्छिन्नसाधनत्वे विधिप्रत्ययशक्तिस्वीकारेण यजेत स्वर्गकामः इति वाक्यघटकलिङा स्वर्गत्वावच्छिन्नसाधनत्वस्यैव बोधनात्। अपिच, अनन्यलभ्यः शब्दार्थः इत्यस्य प्रमाणान्तरगम्यस्य न शब्दार्थता इत्यत्र न तात्पर्यम्। अनुमानादिप्रमाणगम्यस्य वह्न्यादेरपि पर्वतो वह्निमान् इत्यादौ वह्निपदार्थताविलोपप्रसङ्गात्। अपितु समभिव्याहृतपदेन तत्समभिव्याहारेण वा लभ्यस्य न शब्दार्थता इत्यत्रैव। द्वितीयायाः कर्मत्वमर्थः। तच्च क्रियाजन्यफलशालित्वम्। तच्च संपूर्णं न द्वितीयाशक्यम्। क्रियायाः समभिव्याहृतेन धातुना

लाभात् जन्यत्वस्य विनैव पदार्थतां द्वितीयार्थधात्वर्थयोः संसर्गतया भानसंभवात्, व्यापारमात्रस्य धात्वर्थत्वेन अनन्यलभ्यं फलमात्रं द्वितीयाशक्यमिति प्राचीना नैयायिकाः निरूपयन्ति । द्वितीयार्थः क्रियाजन्यफलाश्रयरूपं कर्म । तत्र धातोः फलव्यापारोभयवाचकत्वात् उभयोरपि धातुना लाभात् आश्रयमात्रं द्वितीयार्थः इति प्राचीना वैयाकरणाः मन्यन्ते । भवद्भिरपि नव्यमीमांसकैः, प्रवृत्तिप्रयोजक-व्यापारः प्रवर्तना लिङर्थः, तादृशव्यापारत्वं न लिङादिशक्यतावच्छेदकं, प्रवृत्तेराख्यातेन, प्रयोजकत्वस्य संसर्गमर्यादया च भानसंभवात् । अपितु अनन्यलभ्यं व्यापारत्वमात्रम् इति न्यरूपि । ईदृशेष्वेव स्थलेषु अनन्यलभ्यः शब्दार्थः इति न्यायः प्रवर्तते । स्पष्टश्चायमर्थो **व्युत्पत्तिवादरामरुद्रीये** । तस्मात् अनुमानलभ्यत्वादिष्टसाधनत्वं न लिङर्थः इत्युक्तिः न युज्यते ।

अपिच, यजेत स्वर्गकामः इत्यादौ लिङादिनिष्ठालौकिक-व्यापारे मानाभावः । नच वेदस्थलिङ् मां प्रेरयति इति व्यवहारात् तत्र प्रवृत्तिप्रयोजकव्यापारविशेषः सिद्ध्यतीति वाच्यम् । प्रवृत्ति-प्रयोजकेष्टसाधनताबोधकत्वस्यैव लिङादिनिष्ठप्रवर्तकतारूपत्वस्वीकारात् निरुक्तव्यवहारेण तत्रालौकिकव्यापारसिद्धेरसंभवात् । न चेदं प्रवर्तकत्वं न प्रवर्तकपुरुषसाधारणमिति वाच्यम् । अयमत्र प्रवर्ततामित्याकार-कत्वरूपविषयिताविशेषस्य लिङादिशक्यतावच्छेदकस्य आत्ममात्रसम-वेतेच्छामात्रवृत्तित्वे ईश्वरेच्छैव वैदिकलिङो वाच्या इति निरूपयद्भिः भवद्भिरपि वैदिकलिङः प्रवृत्तिप्रयोजकेच्छाबोधकत्वस्यैव प्रवर्तकत्वरूप-ताया वक्तव्यत्वात्, पुरुषनिष्ठस्य च तस्य तादृशेच्छाश्रयत्वरूपत्वेन ततोऽन्यत्वात् । अन्यथा राजवाक्यं प्रेरयतीति व्यवहारदर्शनात् तद्घटकलिङादावपि प्रवृत्तिप्रयोजको व्यापारविशेषः कल्प्यताम् ।

स्वीक्रियतां च तस्यैव लौकिकलिङ्वाच्यता । वस्तुतस्तु अस्मन्मते यागादावपि ईश्वर एव प्रवर्तकः तत्प्रणीतत्वाद्वेदस्य । तत्र च प्रवर्तकत्वं पूर्वोक्तमेव । तच्च लौकिकपुरुषेश्वरोभयसाधारणम् । लिङादेस्तु सर्वस्यापि प्रवर्तकत्वं प्रवृत्तिप्रयोजकेष्टसाधनताबोधकत्वरूपमेवेति बोध्यम् । किंचान्यत्, ईश्वरेच्छाया लिङ्बोध्यत्वे तद्विषयप्रवृत्तिविषयत्वेन यागादाविष्टसाधनतानुमानं न संभवति । विद्यमानसर्वविषयिणी ईश्वरेच्छा निष्फले प्रवर्तमानस्य प्रवृत्तिमपि सतीमवगाहते । तथाच तद्विषयप्रवृत्तिविषयत्वात्मकहेतुमति चैत्यवन्दनादौ इष्टसाधनत्वरूप-साध्याभावेन व्यभिचारात् । न च हेतुकोटिप्रविष्टक्रतौ इष्टसाधनत्वविशेषणे दत्ते न व्यभिचारः, इष्टासाधने ईश्वरेच्छाविषयी-भूतेष्टसाधनप्रवृत्तिविषयत्वाभावात् निष्फलचैत्यवन्दनादिविषयकप्रवृत्ते-रपि निष्फलत्वादिति वाच्यम् । हेतुज्ञानस्यैव दुर्लभत्वापातात् । कथञ्चित् हेतुज्ञाने यागादिगतस्यापीष्टसाधनत्वस्य ज्ञानसंभवेन निरुक्त-हेतुना यागादाविष्टसाधनतानुमानस्य विफलत्वात् । एवं, वैदिकलि-ङादौ अलौकिको व्यापारः, तस्य प्रवृत्तिप्रयोजकेष्टसाधनतानुमापकत्वं लिङ्वाच्यत्वं चेति त्रितयस्य कल्पनामपेक्ष्य प्रवृत्तिप्रयोजकत्वेन यागादिगतत्वेन च सर्वसिद्धे इष्टसाधनत्वे लिङर्थत्वमात्रकल्पनमेव लाघवादुचितम् ।

•

अपिच, ईश्वरमनभ्युपगम्य वस्तुतस्तु इत्यादिना प्रतिपादिते इच्छात्वजातेः लिङादिशक्यतावच्छेदकत्वकल्पे, सर्वेषां वैदिकलिङा-मलौकिकप्रेरणायां, सर्वत्र च निषेधस्थले लिङः निवृत्तिविषयि-त्वावच्छिन्ने च लक्षणाकल्पनया तज्जन्यतत्तदर्थोपस्थितीनां तत्र तत्र शाब्दबोधे हेतुत्वकल्पनया च गौरवं दुष्परिहरमेव । एवंच न विधौ परः शब्दार्थः इति वचनं सुदूरमुत्सारितं भवति ।

एवं, सर्वत्र बिधिवाक्यजन्यशाब्दबोधानन्तरं इष्टसाधनत्वानुमितिप्रयोजिकायाः पूर्वोक्तहेतौ इष्टसाधनत्वव्याप्ति-पक्षधर्मतादिज्ञानघटितायाः सामग्र्याः कल्पनागौरवं वज्रलेपायते ।

अपिच, संसर्गभासकाकाङ्क्षाज्ञानयोग्यतातात्पर्यज्ञानादिशाब्दसामग्र्यामपि सत्यां, यजेतेति वाक्यात् व्यापारवती यागकृतिरिति शाब्दबोधे जाते प्रमाणान्तरादिना संसर्गविशेषज्ञानसंपादने, इष्टसाधनत्वानुमितये आप्तत्वघटितहेतुज्ञानव्याप्तिज्ञानादिसंपादने च क्लेश एव पर्यालोचितः इष्टसाधनत्वे लिङः शक्तिं व्यवस्थापयति । किंच तन्मते चैत्यं वन्देत इति वाक्यस्य प्रामाण्यापत्तिः । तद्वाक्याद्धि स्वज्ञानाधीनानुमितिप्रयोज्यत्वसंबन्धेन प्रेरणावती चैत्यवन्दनकृतिः इति बोधस्तेषामभिमतः । बोधविषयस्य कस्याप्यबाधेन शाब्दबोधस्य प्रमात्वात् तत्करणे निरुक्तवाक्ये प्रामाण्यस्य दुर्वारत्वात् । न च लिङर्थप्रवर्तनया आक्षिप्तं इष्टसाधनत्वं चैत्यवन्दने बाधितमिति वाच्यम् । तावता प्रेरणाधीनानुमितेः भ्रमत्वेऽपि प्रेरणाज्ञानाधीनानुमितिप्रयोज्यत्वस्य प्रवृत्तावबाधितत्वेन शाब्दबोधस्य कथंचिदपि भ्रमत्वोपपादनासंभवात् ।

न चेष्टसाधनत्वस्य लिङर्थत्वे चैत्रीयपाककृतेर्वर्तमानताज्ञानदशायां इष्टसाधनपाकानुकूलवर्तमानकृतिमादाय चैत्रः पचेदिति प्रयोगः स्यादिति वाच्यम् । धात्वर्थानुकूलकृतेः भविष्यत्ता स्वरूपसती लिङः साधुत्वे नियामिका । तस्याः भविष्यत्त्वे एव लिङन्तप्रयोगदर्शनेन तथा शब्दशक्तिस्वभावावगमात् । यदाहुः हरिवल्लभाः 'विध्यर्थप्रत्ययप्रकृत्यर्थस्य स्वाभाव्येन भविष्यत्तया प्रतीतिः ।' इति । वस्तुतः भविष्यन्ती क्रिया तत्र प्रतीयते इति तदाशयः । न तु भविष्यत्वमपि

क्रियायां शाब्दबोधे भासते इति । विधिलिङः कालाबोधकतया तथाबोधासंभवात् । वैयाकरणनये धात्वर्थस्यैव वर्तमानत्वादिना भानमिति वैयाकरणैस्तैः विध्यर्थप्रत्ययप्रकृत्यर्थस्य इत्यभिहितम् । तस्मात् पाककृतेर्वर्तमानतादशायां तादृशकृतितात्पर्येण चैत्रः पचेदिति प्रयोगः न साधुः ।

एवं धानकर्मताविशिष्टवाची धेनुशब्दः । गोत्वं प्रयोगोपाधिः । अतः न धानकर्ममहिष्यां धेनुशब्दः प्रयुज्यते । एवं नव्यमीमांसकैः, पङ्कजपदस्य यौगिकत्वमेव । पङ्कजनिकर्तृत्वेनैव बोधः । तथापि तेन रूपेण न कुमुदस्य बोधः । पद्मत्वस्य प्रयोगोपाधित्वादिति स्वीक्रियते । तथा आख्यातार्थकृतेः तत्तत्प्रवृत्तिप्राक्कालीनतत्तल्लिङादिपदज्ञानोत्तरत्वं लिङादेः प्रयोगोपाधिः इति स्वीक्रियते । अतः कृतेर्वर्तमानतादशायां न लिङः प्रयोगापत्तिः, उक्तोपाधेरसत्त्वात् । यद्वा, पचेदित्यत्र धात्वर्थस्य पाकस्य, स्वानुकूलत्व - स्वप्रतिपादकधातुसमभिव्याहृततत्तत्प्रवृत्तिप्राक्कालीन तत्तल्लिङादिपदज्ञानोत्तरत्वोभयसंबन्धेन आख्यातार्थकृतावन्वयः । पाककृतेः वर्तमानतादशायां आपाद्यमानवाक्यघटकलिङादिपदज्ञानोत्तरत्वरूपद्वितीयसंबन्धस्य बाधितत्वात् तादृशसंबन्धद्वयावगाहिबोधस्याप्रमात्वेन, तद्वाक्यप्रामाण्यापत्तिर्न घटते । तदुक्तं श्रीमहादेवपुणताम्बेकरमहोदयैः न्यायकौस्तुभे—

'तादृशप्रयोगवारणे भवतां यद्याग्रहः, तदा भावनानिष्ठस्य तत्तत्प्रवृत्तिप्राक्कालीनतत्तल्लिङादिपदज्ञानोत्तरत्वस्य तादृशप्रयोगोपाधित्वमङ्गीकृत्य, स्वानुकूलत्व-स्वप्रतिपादक धातुसमभिव्याहृत तत्तत्प्रवृत्तिप्राक्कालीनतत्तल्लिङादिपदज्ञानोत्तरत्वोभयसंबन्धेन पाकस्य कृतावन्वयमङ्गीकृत्य वा स वारणीयः ।' इति ।

अत्र द्वितीयसंबन्धनिरूपणसरणिः भाट्टरहस्यकाराणां परेषां संबन्धनिवेशपरिपाटचनुगुणेति बोध्यम् ।

एवं येषां मते लिङन्तशब्दप्रयोगः, प्रयुज्यमानः तादृशशब्दो वा प्रेरणा लिङर्थः, तैरपि सविषयकत्वेन सर्वसंप्रतिपन्नादात्मविशेषगुणाद्भिन्नस्य शब्दस्य तत्तद्धात्वर्थविषयकत्वं सर्वतन्त्रविरुद्धं कल्पनीयमिति गौरवम् । न च नैयायिकैरपि शब्दस्य सविषयकत्वं स्वीकृतम् । गुरुं धर्मं पृच्छतीत्यत्र जिज्ञासाज्ञानोद्देश्यकप्रवृत्त्यधीनः शब्दः पृच्छतेरर्थः, शब्दे धर्मविषयकत्वान्वयः इति गदाधरभट्टाचार्यैरेवोक्तत्वादिति वाच्यम् । शब्दस्य च विषयता व्यापारानुबन्धिनी इत्यनुपदं तैरभिधानात्, शब्दजन्यं ज्ञानं धर्मविषयकमिति शब्दः धर्मविषयकः इत्यभिधीयते इति तदाशयात् । अतः शब्दस्य पाकादिविषयकत्वकल्पनागौरवं दुर्वारम् । एवं प्रेरणात्वमखण्डो धर्मः लिङादिशब्दे कल्प्यते तैः । इष्टसाधनत्वे प्रवृत्तिप्रयोजकत्वरूपं प्रेरणात्वं क्लृप्तमेवेति नास्माभिः कल्पनीयं प्रेरणात्वम् । अपिच तन्मते स्वर्गकामो यजेतेत्यादिवाक्यघटकलिङादिशब्दरूपप्रेरणाविषयत्वेन यागे स्वर्गसाधनत्वमनुमेयम् । तादृशानुमितिहेतोः वैदिकप्रेरणाविषयत्वे स्वर्गसाधनत्वव्याप्तिज्ञानस्य उपदेशाधीनशाब्दबोधरूपत्वे, यागे स्वर्गसाधनत्वज्ञानमेवोपदेशाधीनमिति स्वीकर्तुमुचितम्, किं विधिवाक्यार्थबोधेन प्रेरणाविषयत्वावगाहिना । तस्माद्वेदे लिङा इष्टसाधनत्वं बोध्यते इति वक्तव्यम् ।

तथाच सर्वत्र लिङः इष्टसाधनतावाचकत्वमेव युज्यते । इष्टसाधनत्वमेव प्रवृत्तिहेतुज्ञानविषयतया प्रवर्तनाव्यपदेशं लभते । न चेष्टसाधनताज्ञानं चिकीर्षया अन्यथासिद्धमिति न प्रवृत्तिकारणमिति नेष्टसाधनत्वं लिङर्थः इति वाच्यम् । यतः इष्टसाधनज्ञानस्य चिकीर्षाद्वारा प्रवृत्तिकारणत्वात् व्यापारेण चिकीर्षया व्यापारिणः इष्टसाधन-

ताज्ञानस्य नान्यथासिद्धिः संभाव्यते । न च प्रमाणबोधितकारणत्वनिर्वाहार्थं यत्र व्यापारः कल्प्यते, तत्रैव व्यापारेण व्यापारिणो नान्यथासिद्धिरिति न्यायः प्रवर्तते इति वाच्यम् । इष्टसाधनताज्ञानेऽपि कारणताग्राहकस्वतन्त्रान्वयव्यतिरेकयोः सत्वेन कारणत्वस्य प्रमाणसिद्धत्वात् । अन्यथा चाक्षुषप्रत्यक्षे चक्षुःसंनिकर्षेण चक्षुषः अन्यथासिद्धत्वसंभवेन प्रत्यक्षप्रमाणत्वं भज्येत । चक्षुषि प्रमाकारणत्वस्य प्रमाणाबोधितत्वात् । स्वतन्त्रान्बयव्यतिरेकाभ्यां चक्षुषः कारणत्वं गृहीतमिति चेत्तुल्यं प्रकृतेऽपि । तथापि चिकीर्षायाः इष्टसाधनताज्ञानकारणत्वनिर्वाहायैव न हेतुता कल्प्यते, अपितु स्वतन्त्रान्वयव्यतिरेकाभ्यामिति चेत् । चक्षुःसंनिकर्षस्यापि न चक्षुषः कारणत्वनिर्वाहायैव हेतुता कल्प्यते, स्वतन्त्रान्वयव्यतिरेकयोः सत्त्वादिति तुल्यम् । न चैवं प्राचीननैयायिकाभिमतस्य मङ्गले समाप्तिकारणतावादस्य विघ्नध्वंसेन मङ्गलस्यान्यथासिद्धिदोषेण दूषणं न्यायग्रन्थेषूक्तं कथं संगच्छते इति वाच्यम् । विनापि मङ्गलं यत्र भोगादिना विघ्नध्वंसः, यत्र च स्वत एव विघ्नाभावः, तत्र समाप्तेर्दर्शनात् विघ्नाभावः प्रतिबन्धकाभावविधया हेतुत्वेन क्लृप्तः इति तेन मङ्गलजन्यविघ्नध्वंसस्थलेऽपि मङ्गलस्यान्यथासिद्धिकथनं युज्यते । एवं विनाऽपीष्टसाधनताज्ञानं चिकीर्षया यदि प्रवृत्तिः संभवति, तदा अत्रापि तन्न्यायेन इष्टसाधनताज्ञानसत्त्वेऽपि चिकीर्षया तस्यान्यथासिद्धिरुद्भाव्येत । तदेव न । इष्टसाधनताज्ञानं बिना प्रवृत्तेरनुदयस्य सर्वसंप्रतिपन्नत्वात् । तस्मात् स्वतन्त्रान्वयव्यतिरेकाभ्यां इष्टसाधनताज्ञानं प्रवृत्तौ कारणमिति तद्विषयः इष्टसाधनत्वमेव प्रवर्तना लिङर्थः ।

अपिच, प्रवृत्तौ साक्षात्कारणीभूतज्ञानविषयः प्रवर्तना, प्रेरणा इति वक्तुं न शक्यते । प्रेरणात्वेन भवदभिमतलिङन्त-

शब्दस्यापि तत्त्वाभावात् । इष्टसाधनत्वाक्षेपद्वारैव प्रवृत्त्यनुकूलत्वस्य भवद्भिरुपपादनात् । अपितु प्रवृत्तिप्रयोजकज्ञानविषयः । तथाच प्रवृत्तिहेतुर्या चिकीर्षा तात्कारणज्ञानविषयो विधिः, प्रेरणा, प्रवर्तना, नियोगः इत्येवमादिपदैः व्यपदिश्यते । तदुक्तं जगदीशभट्टाचार्यैः—

'प्रवर्तकचिकीर्षाया हेतुधीविषयो विधिः ।' इति । आहुश्चोदयनाचार्या :—

'प्रवृत्तिः कृतिरेवात्र सा चेच्छातो यतश्च सा ।
तज्ज्ञानं विषयस्तस्य विधिः .... ।।' इति ।

तस्मादिष्टसाधताज्ञानस्य प्रवृत्तौ प्रयोजकस्यान्यथासिद्धत्वेऽपि इष्टसाधनत्वस्य लिङर्थत्वे न काचित् क्षतिः ।

न च यागः इष्टसाधनं, तस्मात्त्वं कुरु इति स्वारसिकप्रयोगात् नेष्टसाधनत्वं लिङर्थः इत्युक्तमिति वाच्यम् । यागः इष्टसाधनमिति वाक्येन यागे इष्टसाधनत्वं बोध्यते । त्वं कुरु इति वाक्यं धात्वर्थे कृताविष्टसाधनत्वं लिङर्थं बोधयति । यागगतमिष्टसाधनत्वं तद्विषयककृतिनिष्ठेष्टसाधनत्वे हेतुर्भवत्येव । तस्य ततोऽन्यत्वात् । न हि कृतिरपि यागपदार्थः, येन कृतिगतमिष्टसाधनत्वमपि यागः इष्टसाधनमिति वाक्यार्थो भवेत् । तस्मादयं प्रयोगः नेष्टसाधनत्वस्य लिङर्थतां प्रतिक्षिपति । अन्यथा आचार्यप्रेरणाविषयः पाकः तस्मात् त्वं कुरु इति प्रयोगात् प्रेरणाया अपि लिङर्थता हीयेत । यदि तत्र अवश्यकर्तव्यत्वमेव तेन विवक्षितमित्युच्यते । तर्हि ममापि तथैवास्तु । सर्वपक्षसमानोऽयं दोषः समानपरिहारश्च । अयमेव स्वारसिकः प्रयोगः नान्यः इति वचनं तु न विदुषां हृदयङ्गमम् ।

नच 'विधिः प्रेरणम्' इति भाष्यात् प्रेरणं लिङर्थः। तच्च प्रवर्तकनिष्ठः प्रवृत्त्यनुकूलो व्यापारः। न चेष्टसाधनत्वं प्रवर्तकनिष्ठम्, अपितु धात्वर्थयागादिगतमिति न तत् लिङर्थः इति वाच्यम्। इष्टसाधनत्वस्य स्वबोधकशब्दप्रयोक्तृत्वसंबन्धेन प्रवर्तकपुरुषनिष्ठत्वेन प्रेरणात्वोपपत्तेः। न चास्य संबन्धस्य परम्परात्मकस्य वृत्त्यनियामकत्वेन न प्रवर्तकनिष्ठत्वमिष्टसाधनत्वस्येति वाच्यम्। तथा सति भवदभिमतप्रेरणाया अपि प्रवर्तकनिष्ठत्वं न स्यात्। तथाहि - यदि लिङन्तशब्दप्रयोगः प्रेरणा, तदा तस्य प्रवर्तके पुरुषे स्वकर्तृत्वं संबन्धः वृत्त्यनियामकः इति न तेन प्रवर्तकनिष्ठत्वमुपपद्यते। यदि लिङ्शब्दः प्रेरणा, तदा तस्यापि प्रवर्तके पुरुषे स्वप्रयोगानुकूलकृतिमत्त्वं वृत्त्यनियामकः संबन्ध इति न तेन प्रवर्तकवृत्तित्वं संभवति। एवं, वेदे प्रेरणायाः लिङ्शब्दस्य प्रवर्तके तस्मिन्नेव शब्दे तादात्म्यमेव संबन्धः। स च वृत्त्यनियामक इति तेन तन्निष्ठत्वानुपपत्तिः। तस्मात् स्वबोधकशब्दप्रयोक्तृत्वसंबन्धेन प्रवर्तकपुरुषवृत्तेरिष्टसाधनत्वस्य प्रेरणात्वं न विरुध्यते। अपिच स्वज्ञानवत्त्वमपि पुरुषे इष्टसाधनत्वस्य संबन्धः संभवति। न च श्रोतुरेव तच्छाब्दबोध इति वाच्यम्। प्रयोक्तरि प्रयोगहेतुभूतवाक्यार्थज्ञानस्यावश्यकत्वेन प्रवर्तके तस्मिन् इष्टसाधनताज्ञानवत्त्वसत्त्वात्।

न चेष्टसाधनताज्ञानस्येव साध्येष्टकत्वज्ञानस्यापि प्रवर्तकत्वात् विनिगमनाविरहेण साध्येष्टकत्वमपि लिङर्थः स्यादित्युक्तमिति वाच्यम्। साधनत्वस्येव साध्यत्वस्याखण्डधर्मत्वेऽपि, साध्येष्टको यागः इति ज्ञाने बहुव्रीह्यर्थसंबन्धः अधिको भासते। इष्टसाधनताज्ञानस्य हेतुत्वे इष्टसाधनत्वप्रकारकत्वं कारणतावच्छेदकम्। साध्येष्टकत्वज्ञानस्य तथात्वे तु साध्येष्टसंबन्धप्रकारकत्वं कारणताव-

च्छेदकमिति तत्र बहुव्रीह्यर्थसंबन्धविषयताया निवेशेन गौरवात् साध्येष्टकत्वज्ञानस्य प्रवर्तकत्वाभावेन विनिगमनाविरहानवकाशात् इष्टसाधनत्वस्यैव लिङर्थता युज्यते । न चेष्टगतं साध्यत्वं लिङर्थोऽस्तु, स च निरूपकतासंबन्धेन धात्वर्थे अन्वेतु इति वाच्यम् । तथा सति चैत्यं न वन्देत इत्यादौ धात्वर्थे वन्दने लिङर्थस्य इष्टगतसाध्यत्वस्य निरूपकतासंबन्धेनाभावो बोधनीयः । तच्च न संभवति निरूपकतासंबन्धस्य वृत्त्यनियामकस्याभावप्रतियोगितानवच्छेदकत्वेन तत्संबन्धावच्छिन्नाभावस्याप्रसिद्धेः । न च तत्रापि न कलञ्जं भक्षयेदित्यत्रेव बलवदनिष्टाननुबन्धित्वाभावः वन्दने बोध्यते इति शङ्कनीयम् । तस्य निष्फलत्वेऽपि अनिष्टसाधनत्वे मानाभावात् । अत एव 'चैत्यं न वन्देत' इति वाक्यप्रामाण्यरक्षणाय इष्टसाधनत्वस्य लिङर्थतास्वीकारः आवश्यकः ।' इति गदाधरभट्टाचार्या निरूपयन्ति । इष्टसाधनत्वाभावबोधकतयैव तद्वाक्यप्रामाण्यमिति तेषामाशयः । तस्मात् प्रकारान्तरासंभवादिष्टसाधनत्वमेव लिङर्थः ॥

ननु इष्टसाधनत्वस्य लिङर्थत्वे, तरति ब्रह्महत्यां योऽश्वमेधेन यजते इत्यर्थवादेन ब्रह्महत्यातरणकामः अश्वमेधेन यजेत इति विधिः कुतः कल्प्यते, विधिना बोधनीयस्येष्टसाधनत्वस्य अर्थवादेनैव बोधितत्वादिति चेन्न । कुत इति हेतुर्वा पृच्छ्यते, प्रयोजनं वा । आद्ये श्रुतिबोधितेष्टसाधनत्वं यत्र यत्र तत्र सर्वत्र विधेयत्वस्य दर्शनेन तादृशेष्टसाधनत्वाविनाभावात् विधिः कल्प्यते । द्वितीये, श्रौतेष्टसाधनत्वव्यापकस्य विधेयत्वस्याभावेन व्याप्यस्य श्रौतेष्टसाधनत्वस्य अभावः स्यादिति तद्बाधोद्धाराय विधिः कल्प्यते । अपिच लिङः इष्टसाधनत्वमिव बलवदनिष्टाननुबन्धित्वमप्यर्थः । इष्टसाधनत्वमात्रस्य अर्थवादेन बोधनात् तदबोधितबलवदनिष्टाननुबन्धित्वप्रत्यायनाय विधिकल्पनं

सार्थकं भवत्येव । इत्थंच कृतिसाध्यत्वादेरभावस्य चैत्यवन्दने बाधितत्वेऽपि लिङर्थेष्टसाधनत्वाभावस्याबाधितस्य बोधकतया चैत्यं न वन्देत इति वाक्यं प्रमाणपदवीमधिरोहति ।

एतेन— इष्टसाधनत्वमात्रं लिङर्थः । न कलञ्जं भक्षयेदित्यादौ लिङा लक्षणया अनिष्टसाधनत्वं बोध्यते इति नव्यतार्किकमते, आन्तरा-
लिकश्रमजनकत्वस्य ज्योतिष्टोमे सत्त्वेन ज्योतिष्टोमेन न यजेत इति प्रयोगापत्तिरिति दूषणं प्रत्युक्तं बोध्यम् । न हि नैयायिकैः नञ्वति वाक्ये सर्वत्र अनिष्टसाधनत्वं धात्वर्थे बोध्यते इति नियमोऽभ्युपगम्यते । किंतु यत्र लिङर्थेष्टसाधनत्वाभावः नञा बोधयितुं न शक्यते, तत्र लिङः अनिष्टसाधनत्वे लक्षणां स्वीकृत्य कलञ्जभक्षणादौ तद्बोधनेन न कलञ्जं भक्षयेदित्यादिवाक्यानां प्रामाण्यमुपपाद्यते । जलं न ताडयेत्, रात्रौ श्राद्धं न कुर्वीत, चैत्यं न वन्देत इत्यादौ इष्टसाधनत्वाभावस्यैव बोधोऽभ्युपगम्यते । एवंच नव्यमीमांसकमते विध्युत्तरनिषेधस्थले विधिप्रमितेष्टसाधनत्वाभावाक्षेपवत्, तादृशस्थले लिङर्थेष्टसाधनत्वा-
भावस्यैव धात्वर्थे बोधः । रागप्राप्तस्य निषेधस्थले अनिष्टसाधनत्व-
मेव बोध्यते । इत्थश्च विध्युत्तरनिषेधरूपात् ज्योतिष्टोमेन न यजेतेति वाक्यात् यागे स्वर्गरूपेष्टसाधनत्वाभाव एव बुध्येत । स च तत्र श्रुतिविरोधेन बाधितः इति तद्वाक्यमप्रमाणं भवति । अन्यथा तन्मतेऽपि निवर्तनया अनिष्टसाधनत्वाक्षेपेण प्रवृत्तिसामग्रीविघटन-
संभवेन, स्वज्ञानाधीनानिष्टसाधनत्वानुमितिप्रयोज्याभावप्रतियोगित्व-
संबन्धेन निवर्तनावत्त्वस्य ज्योतिष्टोमकृतावबाधात् ज्योतिष्टोमेन न यजेतेति वाक्यप्रामाण्यापत्तेर्दुर्वारत्वात् । वस्तुतः तन्मते तत्राक्षिप्तस्ये-
ष्टसाधनत्वाभावस्य बाधितत्वेऽपि न वाक्यस्य प्रामाण्यं परिहृतं भवति । अपितु निवर्तनाज्ञानाधीनानुमितेः भ्रमत्वमुपादितं भवति

विषयत्वात् । शाब्दबोधे विषयस्य स्वज्ञानाधीनानुमितिप्रयोज्या-भावप्रतियोगित्वसंबन्धेन निवर्तनात्त्वस्य अबाधात् प्रमाकरणत्वरूप-प्रामाण्यस्य तत्र दुर्वारत्वात् ।

परमार्थतः, विधानोत्तरप्रतिषेधस्थले नातिरात्रे षोडशिनं गृह्णाति इत्यादौ धात्वर्थान्वितनञर्थाभावे इष्टसाधनत्वं लिङा बोध्यते । अतिरात्रे षोडशिग्रहणाभावः इष्टसाधनमिति तद्वाक्याधीनो बोधः । तदुक्तं नञ्वादे शिरोमणिभट्टाचार्यैः—"अत्र षोडशिग्रहणं नेष्टसाधन-मित्यादिकं नार्थः, ग्रहणविधिविरोधात् । अपितु षोडशिग्रहणाभावः इष्टसाधनमित्यादिकम् । व्युत्पन्नश्च नञ्समभिव्याहृतधात्वर्थस्याभावेऽपि विभक्त्यर्थान्वयः"। इति । एवंच विध्युत्तरनिषेधे धात्वर्थाभावगत-स्येष्टसाधनत्वस्य बोधात्, तादृशात् ज्योतिष्टोमेव न यजेत इति वाक्यादपि ज्योतिष्टोमयागाभावः इष्टसाधनमिति बोधो जायेत । तदभावे च स्वर्गादीष्टसाधनत्वं बाधितमिति तद्बोधकं न यजेतेति लौकिकं वाक्यं न प्रमाणं भवति ।

न च तथापि बहुवित्तव्ययायाससाध्ये यागादौ न सामान्यतः इष्टत्वेन इष्टसाधनताज्ञानं प्रवर्तकम्, किन्तु स्वर्गत्वादिना स्वर्गसाधन-ताज्ञानमेव । तच्च न विधिवाक्याज्जायते । इष्टसाधनयागानुकूल-कृतिमान् स्वर्गकामः इति बोधस्यैवोदयात्, लिङः इष्टसाधनत्वे एव शक्तत्वादिति वाच्यम् । समभिव्याहृतपदोपस्थापितकामनाविषयता-वच्छेदकत्वोपलक्षिततत्तद्धर्मावच्छिन्नसाधनत्वे लिङः शक्तिस्वीकारात्, यजेत स्वर्गकामः इति वाक्यात् स्वर्गत्वविशिष्टसाधनत्वेनैव यागस्य बोधो जायते इति विधिवाक्यात् प्रवर्तकज्ञाननिर्वाहः । न च क्षणिकतया अवगते यागादौ कालान्तरभाविस्वर्गादिनिरूपिता साक्षात्-

साधनताबाधात्, अपूर्वस्य व्यापारस्यानुपस्थित्या परम्परया साधनता च न लिङा बोधयितुं शक्यते इति वाच्यम्। अपूर्वानुपस्थितावपि सामान्यतः स्वर्गसाधनतात्वेन तत्साधनताबोधसंभवात्। न च ज्योतिष्टोमादिव गङ्गास्नानादितोऽपि स्वर्गोत्पत्त्या व्यभिचारवारणाय स्वर्गगतं वैजात्यमेव ज्योतिष्टोमकार्यतावच्छेदकं वक्तव्यम्। तथाच कथं स्वर्गत्वविशिष्टसाधनताबोधः? वैजात्यस्य च पूर्वमनुपस्थित्या तदवच्छिन्नसाधनत्वबोधासंभवादिति वाच्यम्। स्वर्गनिष्ठधर्मावच्छिन्ननिरूपितनियतपूर्ववृत्तितावच्छेदकधर्मवत्वमेव स्वर्गकारणत्वम्। नियतपूर्ववृत्तितावच्छेदकत्वं च अव्यवहितपूर्वकालावच्छेदेन विद्यमानाभावघटितदैशिकव्यापकतावच्छेदकत्वम्। तत्त्वं च स्वाश्रयत्व - स्वाश्रयनिरूपितव्यापारत्ववत्त्वान्यतरसंबन्धेन। स्वाश्रययागनिरूपितव्यापारत्ववत्त्वसंबन्धेन यागत्वविशिष्टस्यापूर्वस्य स्वर्गनिष्ठवैजात्यावच्छिन्नसमानाधिकरणाभावाप्रतियोगितया निरुक्तपूर्ववृत्तितावच्छेदकत्वं यागत्वे अक्षतम्। अत्र स्वर्गनिष्ठवैजात्यस्य विशिष्योत्तरकालकल्प्यत्वेऽपि स्वर्गनिष्ठधर्मत्वेन शाब्दबोधे भानं विरुद्ध्यते।

ननु निष्फलस्य नित्यकर्मणः विधायके अहरहः सन्ध्यामुपासीत इति वाक्ये लिङा नेष्टसाधनत्वं बोधयितुं शक्यते इति नेष्टसाधनत्वं विधिरिति चेन्न।

तत्र नरकानुत्पादस्य फलत्वेन तत्साधनतायाः लिङा बोधनसंभवेनादोषात्। नरकस्य दुःखविशेषतया तदभावस्य निसर्गतः इच्छाविषयत्वात्। न च नरकः यदि उत्पत्स्यते, तदैव नरकप्रागभावः प्रसिद्ध्यतीति कृतेऽपि सन्ध्यावन्दने नरकोत्पत्त्यापत्तिः। यदि च नोत्पत्स्यते, तदा तत्प्रागभावो न प्रामाणिकः अनुत्पद्यमानाकाशादेः प्रागभावाभावेन तत्सत्वे मानाभावात्। तथाच नरकप्रागभावात्मकः

नरकानुत्पादः कथं फलमिति वाच्यम् । नरकात्यन्ताभावस्यैव फलत्वसंभवात् । न च यस्य पापान्तरेण नरकदुःखं जनितं जनिष्यते वा तस्मिन् नरकप्रागभावस्य नरकध्वंसस्य वा विरोधिनः सत्वात् न नरकात्यन्ताभावः संभवतीति वाच्यम् । ध्वंसप्रागभावयोः अत्यन्ताभावेन विरोधस्य शिरोमणिभिरेव निराकरणात् । न चात्यन्ताभावस्य नित्यत्वेन सन्ध्यावन्दनादेः न तत्साधनत्वं संभवतीति वाच्यम् । योगक्षेमसाधारणसाधनतायास्तत्र संभवात् । न च गुरुभूतक्षेमसाधारणसाधनताज्ञानं न प्रवृत्तिहेतुरिति वाच्यम् । तस्य निष्फलत्वे तत्र इष्टसाधनताज्ञानघटिता क्लृप्ता प्रवृत्तिसामग्री न संभवति । अतः सन्ध्यावन्दनाभावे नरकसाधनता-ज्ञानाधीनो द्वेषः सन्ध्यावन्दने प्रवर्तकः इति विजातीयसामग्री कल्पनीया । तदपेक्षया क्षेमसाधारणफलसाधनताज्ञानस्य प्रवृत्तिहेतुत्वाङ्गीकार एव समुचितः । अथवा दण्डात् घटः इत्यादिप्रतीतिसिद्धः स्वरूपसंबन्ध-विशेष एव क्षेमसाधारणकारणतेति न गौरवस्याप्यवकाशः । सफल-स्यापि सन्ध्यावन्दनादेः प्रत्यवायकारणीभूताभावप्रतियोगित्वरूपं नित्यत्वमस्ति, सफलत्व-नित्यत्वयोर्विरोधे मानाभावात् । नित्ये कर्मणि सन्ध्यावन्दनादौ न केवलं फलकामना अधिकारः, किंतु शुचित्वमपीति द्वयोर्मिलितयोरधिकारता । परन्तु सन्ध्यावन्दनाकरणेन प्रत्यवाये जननीये अधिकारैकदेशः शुचित्वमेव सहकारि, न तु फलकामनाऽपि । फलकामनारहितस्यापि शुचेः सन्ध्यावन्दनाकरणे प्रत्यवायस्य शास्त्र-सिद्धत्वात् । तत्सिद्धमिष्टसाधनत्वं लिङ्वाच्यमिति ।।

एवं, इष्टसाधनेऽपि मधुविषसंपृक्तान्नभोजने प्रवृत्तेरनुदयात् बलवदनिष्टाननुबन्धित्वज्ञानमपि प्रवृत्तौ हेतुरिति तद्विषयः बलवदनि-ष्टाननुबन्धित्वमपि लिङा बोध्यते । न च बलवदनिष्टसाधनत्वबुद्धेः

प्रवृत्तौ प्रतिबन्धकत्वेनापि तत्राप्रवृत्तेरुपपत्तेः अननुबन्धित्वज्ञानस्य न हेतुत्वमित्युक्तमिति वाच्यम् । बलवदनिष्टसाधनत्वबुद्धेः प्रतिबन्धकत्वे तदभाव-तादृशानुबन्धित्वव्याप्यवत्तानिश्चयाभाव-तादृशानुबन्धित्वावच्छेदकतया गृहीतधर्मवत्तानिश्चयाभावादीनां बहूनां प्रवृत्तौ हेतुत्वं कल्पनीयम् । बलवदवदनिष्टाननुबन्धित्वज्ञानस्य हेतुत्वे तु न तेषां हेतुता कल्प्यते । निरुक्तनिश्चयकाले प्रतिबन्धकसद्भावात् तादृशाननुबन्धित्वज्ञानरूपहेतोरभावादेव प्रवृत्त्यभावस्योपपादनसंभवादिति लाघवेन बलवदनिष्टाननुबन्धित्वज्ञानस्यैव प्रवृत्तिहेतुत्वात् । एवं, तादृशाननुबन्धित्वज्ञानस्य हेतुतायां कारणतावच्छेदकलाघवं, मानसग्रहविशेषे प्रवृत्तिसामग्र्याः प्रतिबन्धकत्वाकल्पनलाघवमित्यादिकमाकरे द्रष्टव्यम् ।

न च प्रवृत्तावननुबन्धित्वज्ञानं न हेतुः, द्वेषाभावेनान्यथासिद्धत्वात्, आस्तिककामुकस्य नरकसाधनत्वेनावगतेऽप्यगम्यागमनादौ द्वेषाभावदशायां प्रवृत्त्या व्यतिरेकव्यभिचाराच्चेति वाच्यम् । कारणताग्राहकयोः स्वतन्त्रान्वयव्यतिरेकयोः सत्वेन बलवदनिष्टाननुबन्धित्वज्ञाने प्रवृत्तिकारणतायाः सिद्धतया तेनैव द्वेषाभावस्यान्यथासिद्धेर्वक्तु शक्यत्वात्, आस्तिककामुकस्य प्राचीनकर्मवासनया अगम्यागमनजन्यसुखविशेषे उत्कटरागसामग्र्या प्रतिबन्धेन तज्जन्यनरके बलवद्द्वेषस्यानुदयेन नरकसाधनत्वं जानतोऽपि बलवद्द्वेषविषयाननुबन्धित्वज्ञानसंभवेन व्यभिचारविरहाच्च ।

न च प्रवृत्त्युपयोगि बलवद्द्वेषविषयदुःखाजनकत्वरूपं बलवदनिष्टाननुबन्धित्वं यजेतेत्यादौ यागादौ न बोधयितु शक्यते । प्राचीनकर्मवशेन यागजन्ये आन्तरालिकश्रमे बलवद्द्वेषोदयसंभवेन बलवद्द्वेषविषयदुःखजनके तस्मिन् निरुक्ताननुबन्धित्वस्य बाधात्। न कलञ्जं भक्षयेदित्यत्रापि बलवनिष्टानुबन्धित्वं न बोधयितु शक्यम् । प्राचीनकर्मवशेन

रागिणः नरके द्वेषानुदयेन बलवद्द्वेषविषयसाधनत्वस्याभावादित्युक्तमिति वाच्यम् । प्राशस्त्यपदार्थविचारावसरे अर्थवादैः यागत्वसामानाधिकरण्येन बलवदनिष्टाननुबन्धित्वं प्रवृत्त्युपयोगि बोध्यते इति भवदुक्तरीत्या अस्माभिः लिङा यागत्वसामानाधिकरण्येन बलवदनिष्टाननुबन्धित्वं बोध्यते, सर्वदा सर्वस्यान्तरालिकश्रमे बलवद्द्वेषानुदयादित्युच्यते । न च विधिनैव बलवदनिष्टाननुबन्धित्वबोधने किमर्थवादैः बोध्यते इति शङ्कनीयम् । प्रकृष्टतत्तत्फलसाधनत्वरूपस्य प्राशस्त्यस्य तैर्बोधोपगमात् । न चैवं श्येनेनाभिचरन् यजेतेत्यत्रापि धात्वर्थतावच्छेदकसामानाधिकरण्येन बलवदनिष्टाननुबन्धित्वबोधनं संभवेत् । वैरिवधगोचरप्रबलरागवतः नरके बलवद्द्वेषानुदयेन बलवद्द्वेषविषयदुःखाजनकत्वस्य श्येनत्वसामानाधिकरण्येन सत्वादिति वाच्यम् । इष्टत्वात् । श्येनादौ बलवदनिष्टाननुबन्धित्वबोधस्यापि नैयायिकैरुपपादनात् ।

वस्तुतस्तु, द्वेषविषयतावच्छेदकत्वोपलक्षितनरकत्वाद्याश्रयसाधनतात्वावच्छिन्नाभावकूटे तादृशाभावत्वेनानुगते विधिप्रत्ययस्य एका शक्तिः । द्वेषविषयतावच्छेदकत्वं च शक्यतावच्छेदकोपलक्षणमिति शाब्दबोधे न भासते । तात्पर्यबलाच्च क्वचित् नरकासाधनत्वं बोध्यते । यथा यजेतेत्यत्र यागे । क्वचिच्च रोगासाधनत्वं, यथा ज्वरितः पथ्यमश्नीयादित्यत्र पथ्याशने । एवं च यजेतेत्यत्र नरकासाधनत्वमेव धात्वर्थे सर्वदा अबाधितं बोध्यते । न कलञ्जं भक्षयेदित्यत्र नरकासाधनत्वाभाव एव नरकसाधनत्वरूपः कलञ्जभक्षणे अबाधितो बोध्यते इति न काप्यनुपपत्तिः। स्पष्टश्चायमर्थो व्युत्पत्तिवादे ।

अत एव श्येनस्य नरकसाधनतया नरकासाधनत्वरूपो लिङर्थः बाधात् श्येनेनाभिचरन् यजेतेत्यत्र धात्वर्थे न बोध्यते इति सिद्धान्तपक्षः नैयायिकानाम् ।

न च न हिंस्यादिति सामान्यशास्त्रं रागतः प्राप्तहिंसाविषयतयाऽपि चरितार्थमिति यथा पश्वालम्भादौ न प्रवर्तते, तथा श्येनेनेति विधिबोधितबलवदनिष्टाननुबन्धित्वान्यथानुपपत्त्या श्येनेऽपि न प्रवर्तेत । तथाच न हिंस्यादिति निषेधविषयत्वरूपबाधकाभावात् श्येनेऽपि तद्बोधः स्यादेवेति वाच्यम् । वैधपशुहिंसायामिव श्येनेऽपि न हिंस्यादिति शास्त्रस्याप्रवृत्तावपि, श्येनस्याभिचारकर्मत्वेन 'नाभिचरेत वैरिम्' इति श्रुत्या नरकसाधनत्वबोधनात् तद्विरुद्धं नरकासाधनत्वं न लिङा बोधयितुं शक्यते । न हिंस्यादित्यस्य रागप्राप्तहिंसाविषयतयेव वैधभिन्नाभिचारविषयतया नाभिचरेत इति शास्त्रस्य सार्थक्यं शङ्कितुमपि न शक्यम् । सर्वस्याप्यभिचारकर्मणः वैधत्वेनावैधाभिचारकर्माप्रसिद्धेः निर्विषयतया अभिचारनिषेधशास्त्राप्रामाण्यापातात् । अत एव उपपातकमध्ये अभिचारकर्म परिगणितं मनुना । एवमेव 'अभिचारमहीनं च त्रिभिः कृच्छ्रैः व्यपोहति' इति प्रायश्चित्तोपदेशः संगच्छते । न च श्येनफलस्य वैरिवधरूपाभिचारस्यैवोपपातकत्वं, अभिचारमहीनं चेति प्रोक्तं प्रायश्चित्तं च, न श्येनस्येति वाच्यम् । तादृशाभिचारजनकश्येनादिकर्मण एव तत्राभिचारपदार्थत्वात् । अन्यथा यत्र श्येनयागकरणानन्तरं वैरिकृतप्रत्यभिचारेण, दैवाद्वैरिणो मरणेन वा, शस्त्राभिघातादिरूपाभिचारो नोत्पन्नः, तत्र श्येनकर्तुः प्रायश्चित्त न स्यात् । इष्यते च तत्रापि श्येनकर्तुः प्रायश्चित्तं प्रामाणिकैः । अपिच श्येनजन्याभिचारस्य निषिद्धत्वस्वीकारेऽपि नरकसाधनाभिचारजनकत्वेन बलवदनिष्टनरकप्रयोजकत्वात् तदभावरूपमननुबन्धित्वं श्येने बाधितम् । तादृशाप्रयोजकत्वज्ञानस्यैव प्रवृत्तिहेतुत्वात् तद्विषयस्यैव लिङर्थत्वात् । तदेतत्सर्वमभिप्रेत्योक्तं गदाधरभट्टाचार्यैः— 'तथापि अभिचारविधया नरकसाधनत्वस्य दुर्वारत्वात्' इति ।

अतो बाधात् श्येनेनाभिचरन् यजेतेत्यत्र न बलवदनिष्टाननुबन्धित्वबोधः इति निष्कर्षः ।

न च श्येने लिङर्थस्यापि बलवदनिष्टाननुबन्धित्वस्य बाधेनाभानवत्, पशुमालभेत इत्यादावपि बलवदनिष्टासाधनत्वस्याभानसंभवात् विधिनिषेधशास्त्रयोर्विरोध एव नास्तीति नैतावताऽपि न हिंस्यादिति निषेधशास्त्रसंकोचलाभ इति वाच्यम् । कथञ्चित् बाधकापनयनसंभवे औत्सर्गिकार्थपरित्यागोऽनुचितः । निषेधशास्त्रसंकोचेनाप्युपपत्तेः आलभेतेत्यत्र लिङर्थः बलवदनिष्टाननुबन्धित्वं भासते । यत्र तु न कथंचिदपि बाधकापनयनसंभवः, तत्र श्येनादौ न तद्बोधः इति सिद्धान्तः ।।

यदुक्तं, न कलञ्जं भक्षयेदित्यत्र लिङा इष्टसाधनत्वस्य धात्वर्थे भक्षणे बोधस्वीकारे, वैयर्थ्यपरिहाराय विश्वजिन्न्यायेन स्वर्गफलकत्वापत्तिरिति । तत्रेदं चिन्तनीयम् - तत्रैव विश्वजिन्न्यायः प्रवर्तते, यत्र वाक्यं प्रवर्तकं फलं च श्रुतम् । फलसाधनताज्ञानमन्तरा प्रेक्षावतां प्रवृत्तेरसंभवात् तदुपपत्तये अश्रुतोऽपि सर्वाभिलषितः स्वर्गः फलं तत्र कल्प्यते । न चेदं न कलञ्जं भक्षयेदिति वाक्यं कलञ्जभक्षणे प्रवर्तकमिति कश्चिदभ्युपैति । न वा तस्य फलं तृप्त्यादिकमनवगतम् । नापि तस्य स्वर्गः फलमिति कल्पनं युक्तम् । बहुवित्तव्ययायाससाध्यस्य हि कर्मणः नाल्पं फलं भवितुमर्हतीति स्वर्गः फलं कल्प्यते । न हि कलञ्जभक्षणं बहुवित्तव्ययायाससाध्यं प्रवर्तकवाक्यबोधितं कर्म । अत एव सन्ध्यामुपासीत इत्यत्र न विश्वजिन्न्यायात् स्वर्गः फलं निर्णीयते । अल्पायाससाध्यस्याल्पफलोद्देशेनैव प्रवृत्तेः संभवात् । स्पष्टश्चायमर्थो व्युत्पत्तिवादे । न च लोकावगतस्य तृप्तिसाधनत्वस्य वैदिकलिङा बोधने वैयर्थ्यं स्यादिति वाच्यम् । लोकावगतस्य

कृतिसाध्यत्वस्येव लिङा तस्य बोधनसंभवात् । न च तत्र कथंचिदपि वैयर्थ्यपरिहारो न संभवतीति तदंशे अनुवादकता स्वीक्रियते । इष्टसाधनत्वांशे तु अनुवादकता न स्वीकर्तुमुचिता । विश्वजिन्न्यायेन स्वर्गसाधनत्वबोधनेन सार्थक्योपपादनसंभवादिति वाच्यम् । अत्र विश्वजिन्न्यायाप्रवृत्तेरुपपादितत्वात् ।

अपिच लोकसिद्धं वेदेन न बोध्यते इति न नियमः । बहूनां लोकसिद्धानामर्थानां तत्र प्रतिपादनात् । परंतु ऐदम्पर्येण विधेयतया लोकानवगतोऽर्थः वेदेन प्रतिपाद्यते इति । अत्र च कलञ्जभक्षणं तद्गतमिष्टसाधनत्वं कृतिसाध्यत्वं च लोकतोऽवगतमेव । तत्र बलवद-निष्टाननुबन्धित्वाभाव एव नरकसाधनत्वरूपः अपूर्वोऽर्थः प्रतिपाद्यते । तावतैवास्य वाक्यस्य सार्थक्यं निर्वहति । निषेधवाक्येषु निषेधस्यैव विधेयत्वात् तस्य चाप्राप्तत्वात् ।

वस्तुतस्तु, न कलञ्जमित्यादौ बलवदनिष्टाननुबन्धित्वमात्रस्य लिङ्तात्पर्यविषयतेति तदभाव एव धात्वर्थे बोध्यते । इष्टसाधनत्वं तु तद्वाक्यजन्यबोधे न भासते । तदुक्तं श्रीविश्वनाथन्यायपञ्चाननैः— "तत्र (न कलञ्जं भक्षयेदित्यत्र) बाधादिष्टसाधनत्वं कृतिसाध्यत्वं च न विध्यर्थः । किंतु बलवदनिष्टाननुबन्धित्वमात्रम् । तदभावश्च नञा बोध्यते ।" इति । इत्थं च धात्वर्थे इष्टसाधनत्वादीनां बोधास्वी-कारेण निरुक्तदूषणं न प्रसरतीति बोध्यम् ।

यदप्यभिहितम्, भवन्मते प्रागुपदर्शितरीत्या सप्तानां कार्यकारण-भावानां कल्पनया, अनन्तसमभिव्याहारज्ञानहेतुताकल्पनया च गौरवं दुर्वारमिति । तत्र ब्रूमः—

नञसमभिव्याहृतलिङर्थप्रकारकशाब्दबुद्धिं प्रति धातुजन्योपस्थितिः कारणमित्यादयः कार्यकारणभावाः न नैयायिकाभिमताः। धातुत्वादेरनुगतानतिप्रसक्तस्य दुर्वचत्वात्। कथंचिदखण्डोपाधितास्वीकारेण सुवचत्वेऽपि, पचेदित्यत्र पचधातौ पाकादिपदत्वभ्रमवतः लिङर्थेष्टसाधनत्वप्रकारकपाकविशेष्यकबोधापत्तेः। न च धातुत्वेन ज्ञातं यत्पदं तज्जन्योपस्थितेः विशेष्यतया हेतुत्वं कल्प्यते। तत्र धातुत्वेन ज्ञातपदजन्योपस्थितेरभावान्न तादृशो बोध इति वाच्यम्। पचेदित्यानुपूर्वीज्ञानमात्रादेव बोधस्यानुभवसिद्धत्वेन धातुत्वेनोपस्थितेरनपेक्षणात् तथा कार्यकारणभावस्य कल्पयितुमशक्यत्वात्। स्पष्टा चेयं सरणिः नामार्थनिष्ठभेदसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबोधे विशेष्यतया प्रत्ययजन्योपस्थितेः हेतुतानिराकरणावसरे व्युत्पत्तिवादे।

किंच, यत्र यद्धातुसाकाङ्क्षो लिङ्, तस्माच्च धातोर्नार्थ उपस्थितः, अपि तु निराकाङ्क्षात् स्वतन्त्रोपस्थितात् धातुपदात्, तत्र धात्वर्थपाकादौ लिङर्थेष्टसाधनत्वादिबोधापत्तिः, धातुजन्योपस्थितेः सत्त्वात्। अतः यत्पदविशेषत्वेनाकाङ्क्षा गृहीता तत्पदविशेषत्वप्रकारकज्ञानाधीनार्थोपस्थितेः तादृशाकाङ्क्षाज्ञानसहकारेण तादृशबोधहेतुता स्वीकरणीया। एवंच चैत्रः पचेदित्यादौ तत्तत्पदविशेषाकाङ्क्षाज्ञान-तत्तत्पदार्थोपस्थिति-योग्यताज्ञानादिघटितसामग्र्या इष्टसाधनपाकानुकूलकृतिमांश्चैत्रः इत्याकारकबोधो जायते। एवं न पचतीत्याद्याकाङ्क्षाज्ञान-तत्तत्पदार्थोपस्थिति-योग्यताज्ञानादिघटितसामग्र्या पाककृत्यभाववांश्चैत्रः इति बोधो जायते।

तत्र तत्र बोधविशेषे तत्तत्पदसमभिव्याहाररूपाकाङ्क्षाज्ञानादिघटितसामग्र्याः कारणत्वं सर्वैरपि कल्पनीयमेव। तथाहि-यत्र

धातुसाकाङ्क्षादाख्याताृ कृतिर्नोपस्थिता, अपितु स्वतन्त्रोपस्थितात्, तत्र भवदभिमतलिङर्थप्रवर्तनायाः प्रयोज्यतासंबन्धेन कृतावन्वयबोधानुदयेन तत्तदाकाङ्क्षाज्ञान-तत्तत्पदार्थोपस्थिति-योग्यताज्ञानादिघटितसामग्र्याः तत्तच्छाब्दबोधजनकत्वस्यावश्यवक्तव्यत्वात् । भवन्मतेऽपि संबन्धभेदात् शाब्दबोधो विलक्षण एव । पचेदित्यादौ प्रवर्तनायाः कृतौ स्वज्ञानाधीनेष्टसाधनतानुमितिप्रयोज्यत्वं संसर्गः । हुतायां वपायां दीक्षितस्यान्नमश्नीयात् इत्यत्र स्वज्ञानाधीनानिष्टसाधनत्वाभावानुमितिप्रयोज्यत्वम् । कृतिगतादिष्टसाधनत्वानुमितिप्रयोज्यत्वात् विलक्षणमेव तन्निष्ठ अनिष्टसाधनत्वाभावानुमितिप्रयोज्यत्वम् । एवं न कलञ्जं भक्षयेदित्यत्र लिङर्थनिवर्तनायाः स्वज्ञानाधीनानिष्टसाधनत्वानुमितिप्रयोज्याभावप्रतियोगित्वं कृतौ संसर्गः । नातिरात्रे इत्यादौ स्वज्ञानाधीनेष्टसाधनत्वाभावानुमितिप्रयोज्याभावप्रतियोगित्वम्। एवं सर्वत्र तत्तत्प्रवृत्तिप्राक्कालीनं तत्तल्लिङादिपदज्ञानाधीनं प्रवर्तनाज्ञानमेव तत्र तत्र संसर्गकोटौ निविष्टमिति संसर्गवैलक्षण्येन शाब्दबोधवैलक्षण्यं दुर्वारम् । तद्भेदेन कारणताभेदोऽपि न निषेद्धुं शक्यते । न च शाब्दबोधे संबन्धत्वेनैव संबन्धो भासते । पश्चादेव संबन्धविशेषप्रतीतिरिति न संसर्गभेदप्रयुक्तकार्यकारणभावानन्त्यापत्तिरिति वाच्यम् । शाब्दबोधे संबन्धत्वेनापि तत्तत्संबन्ध एव भासते, न तु यः कोऽपि संबन्धः । कथमन्यथा प्रेरणाप्रयोज्यप्रवृत्तिवर्तमानतादशायां चैत्रः पचेदिति प्रयोगो वारयितुं शक्यते । संबन्धसामान्येन प्रेरणावत्त्वस्य कृतावबाधात् । तस्मात् संबन्धत्वेनापि तत्तल्लिङादिपदज्ञानाधीनानुमितिप्रयोज्यत्वमेव भासते इति तत्संबन्धेन प्रेरणावत्त्वस्य कृतौ बाधात् निरुक्तवाक्याप्रामाण्यमुपपादनीयम् । एवं च तत्तत्संसर्गावगाहननिर्वाहाय तत्तत्संसर्गावगाहिबोधे तत्तत्समभिव्याहारज्ञानघटितसामग्री कारणमित्यभ्युपगन्तव्यम् ॥

अपिच, संबन्धस्य सामान्यतो भानेऽपि प्रकारविशेष्यन्यूनाधिक्यप्रयुक्तशाब्दवैलक्षण्यस्य, पदानां पौर्वापर्यवैलक्षण्याधीनाकाङ्क्षाज्ञानवैलक्षण्यस्य च दुर्वारत्वात् कार्यकारणभावभेदः न निषेद्धुं शक्यते । सुबर्थलिङ्गसंख्याव्यतिरिक्तः प्रातिपदिकार्थः सर्वोऽपि भावनायामन्वेतीति अनुगतशब्दोत्कीर्तनमात्रमेव । यथा हेतुव्यापकसाध्यसामानाधिकरण्यं व्याप्तिरिति अनुगतशब्दोत्कीर्तनेऽपि हेतुतावच्छेदकधर्म - संबन्धभेदेन व्याप्तिस्वरूपं भिन्नभिन्नमेव । तत्र तत्रानुमितौ तत्तद्व्याप्तिज्ञानस्यापि कारणता भिन्नभिन्नैव । तथा अनुगतशब्दोत्कीर्तनेऽपि कार्यकारणभावानन्त्यं दुष्परिहरमेवेति बोध्यम् ॥

वस्तुतस्तु, संबन्धः विशेषरूपेणैव संसर्गतया भासते, न तु संबन्धत्वेनेति न्यायसिद्धान्तः । तथैव भट्टाचार्यैः तत्र तत्राभिधानात् । न च भूतलं घटवदित्यत्र घटस्य संबन्धसामान्येन भूतले अन्वयो दृष्ट इति वाच्यम् । तत्र मतुबर्थः संबन्धी । तदेकदेशसंबन्धत्वावच्छिन्ने घटः स्वप्रतियोगिकत्वसंबन्धेनान्वेति, न तु संबन्धसामान्येन भूतले, इति संबन्धत्वेन संसर्गता नास्त्येवेति बोध्यम् ॥

एवं, कृतिसाध्यत्वमपि लिङर्थः । तज्ज्ञानस्य प्रवृत्तिहेतुचिकीर्षायां कारणत्वात्, इच्छायाः स्वसमानप्रकारकज्ञानजन्यत्वनियमात् । न च कृत्यसाध्ये द्वेषादेवाप्रवृत्तेः न कृतिसाध्यताज्ञानस्य प्रवृत्तिहेतुतेति वाच्यम्। निष्फलेऽपि द्वेषादेवाप्रवृत्तिसंभवेन इष्टसाधनताज्ञानस्यापि प्रवर्तकत्वाभावप्रसङ्गात् । न च कृतिसाध्यत्वे ज्ञातेऽपि अशक्तस्य यागादौ प्रवृत्तेरनुदयेन, मत्कृतिसाध्यमिति मदंशविशिष्टकृतिसाध्यताज्ञानस्यैव प्रवर्तकता वक्तव्या । तज्ज्ञानं च न विधिवाक्यात् संभवतीति, यागः मत्कृतिसाध्यः, मत्कृतिसाध्यत्वविरोधिधर्मानधिकरणत्वात् इत्यनुमानेनैव तदवगमान्न तस्य लिङ्वाच्यतेति वाच्यम् । मदंशविशिष्टेष्टसाधनताज्ञानस्यैव

प्रवर्तकत्वात् तस्य विधिवाक्यादलाभेन इष्टसाधनत्वे लिङः शक्तिस्वीकारेऽपि तद्वाक्यस्य प्रवर्तकत्वं न स्यात् । यदि प्रतिपुरुषं विधेरावृत्त्या बोधकत्वात् विधिवाक्येनैव तत्तत्पुरुषीयेष्टसाधनत्वं बोधयितुं शक्यते इत्युच्यते, तदा तथैव कृतिसाध्यताबोधोऽपि संभवति । न च लौकिकप्रमाणादेव कृतिसाध्यताबोधसंभवेन अन्यलभ्यं तन्न लिङर्थ इति वाच्यम् । समभिव्याहृतपदेन, पदसमभिव्याहारेण वा लभ्यस्यैव न शक्यता इत्यत्रैव अनन्यलभ्यः शब्दार्थ इति न्यायतात्पर्यमिति प्रागेवाभिधानात् ।

अपिच प्राचीनैः वैयाकरणैः प्रवर्तकज्ञानविषयतावच्छेदकत्वरूपोपलक्षणानुगतीकृते इष्टसाधनत्वे लिङः शक्तिः स्वीक्रियते । तच्चोपलक्षणं कृतिसाध्यत्वसाधारणमिति तत्रापि शक्तिः सिद्ध्यन्ती न प्रतिषेद्धुं शक्यते । न च भवन्मते पचेदित्यादौ आख्यातसामान्यार्थकृतौ धात्वर्थस्य पाकस्यानुकूलतासंबन्धेन अन्वये तुल्यवित्तिवेद्यतया धात्वर्थे कृतिसाध्यत्वमपि भासते इति अन्यलभ्यं तन्न शक्यमिति वाच्यम् । शाब्दबोधे विशेषणविशेष्यभावस्य नियतत्वात् पचेदिति वाक्यजन्यबोधस्य कृतिविशेष्यकानुकूलतासंसर्गकपाकप्रकारकस्य सतः, पाकविशेष्यककृतिसाध्यत्वप्रकारकत्वं न संभवति । परन्तु शाब्दबोधोत्तरं मानसस्तादृशबोधः अवश्यमुत्पद्यते इति स्वीकरणीयम् । नियमेन तादृशमानसबोधकल्पनायां गौरवमिति, प्रवर्तकं ज्ञानं विधिना साक्षादेवोपजायते इत्याशयेन तस्य लिङर्थतोपगमात् । कुरु इत्यादौ बाधात् कृतिसाध्यत्वस्य न बोधः । इत्थं च त्रितये शक्तिकल्पनं प्रामाणिकत्वान्न दोषाय ।

इष्टसाधनत्वं, बलवदनिष्टाननुबन्धित्वं, कृतिसाध्यत्वं च लिङर्थः । स चाश्रयतया धात्वर्थेऽन्वेति । स च प्रथमान्तार्थविशेषणतापन्नाया-

माख्यातसामान्यार्थकृताविति, स्वर्गसाधन-नरकासाधन-कृतिसाध्ययागानुकूलकृतिमान् स्वर्गकामः इत्याकारकः यजेत स्वर्गकामः इति वाक्याधीनो बोधः पर्यवस्यति । न कलञ्जं भक्षयेदिति निषेधस्थले तु लिङर्थस्य बलवदनिष्टाननुबन्धित्वस्य प्रतियोगितया नञर्थेऽभावे, तस्य धात्वर्थे, तस्य च प्रथमान्तार्थविशेषणतापन्नाख्यातसामान्यार्थकृतावन्वयः इति, नरकासाधनत्वाभाववत्कलञ्जभक्षणानुकूलकृतिमानिति शाब्दबोधः संपद्यते । निवर्तकं ज्ञानं निषेधवाक्येनैव जातमिति, नास्मन्मते व्याप्तिज्ञानाद्यपेक्षया निवर्तकज्ञानोत्पादे विलम्बः, न वा शाब्दबोधविषयस्य संसर्गस्य ज्ञानाय प्रमाणान्तरगवेषणप्रयासः ।

न च प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः लिङर्थधात्वर्थयोः मध्ये नञर्थाभावभानं न संभवतीति वाच्यम् । प्रकृत्यर्थप्रत्ययार्थयोर्मध्ये नञर्थातिरिक्तभानस्यैवाव्युपन्नत्वात् । अन्यथा 'नानुपमृद्य प्रादुर्भावात्' 'नामूढस्येतरोत्पत्तेः' इत्यादौ प्रादुर्भावाभावस्य, रागद्वेषोत्पत्त्यभावस्य च पञ्चम्यर्थहेतुत्वेनान्वयबोधः अनुभवसिद्धो नोपपद्येत ।

एवं, अभावं न गच्छति इति वाक्यस्य द्वितीयार्थे प्रकृत्यर्थाभावस्याभावबोधने एव प्रामाण्यं निर्वहति । तथाहि - कालिकसंबन्धेन गमनजन्यसंयोगाश्रयत्वमादाय ग्राममगच्छत्यपि चैत्रे, ग्रामं गच्छति चैत्रः इति प्रयोगवारणाय, समवायसंबन्धावच्छिन्नाधेयत्वमेव द्वितीयार्थः इति स्वीकरणीयम् । तथाच प्रकृते अभावनिरूपितसमवायसंबन्धावच्छिन्नाधेयत्वाप्रसिद्ध्या तदभावस्य धात्वर्थफले संयोगे अन्वयबोधो न संभवतीति द्वितीयार्थे समवेतत्वे एव प्रकृत्यर्थस्याभावस्याभावः नञा बोध्यते इत्यकामेनापि स्वीकरणीयम् । तस्मात् प्रकृतिप्रत्ययार्थयोरन्तरा नञर्थातिरिक्तस्यैव भानं व्युत्पत्तिविरुद्धमिति सिद्धान्तः ।

एवंच लिङर्थस्य बलवदनिष्टाननुबन्धित्वस्याभावः धात्वर्थे अन्वेतीति सिद्धम् ।

न च न कलञ्जं भक्षयेदित्यत्र धात्वर्थान्वितनञर्थाभावे ङिलर्थः नरकाभावरूपेष्टसाधनत्वमेव बोध्यतामिति वाच्यम् । तथा सति विधिनिषेधयोः समानार्थकतया,

'अन्तरं यादृशं लोके ब्रह्महत्याश्वमेधयोः ।

दृश्यते तावदेवेदं विधानप्रतिषेधयोः ॥' इत्यभियुक्तवचनं विरुद्धचेत । अपिच, रात्रौ श्राद्धं न कुर्वीत इत्यादौ, रात्रौ शाद्धकरणस्य प्रत्यवायसाधनत्वे प्रमाणाभावात्, करणाभावे प्रत्यवायाभावरूपेष्टसाधनत्वबोधो न संभवति । अतः तत्र धात्वर्थकरणे एव लिङर्थस्येष्टसाधनत्वस्याभावो बोधनीयः इति धात्वर्थे लिङर्थप्रतियोगिकाभावान्वयस्य व्युत्पन्नत्वात् अत्रापि लिङर्थस्य बलवदनिष्टाननुबन्धित्वस्याभावः धात्वर्थे अन्वेतीति स्वीकर्तुमुचितम् । इत्थं च निवर्तकमनिष्टसाधनताज्ञानमपि साक्षादेव निषेधवाक्याज्जायते इति न शाब्दबोधानन्तरं निवर्तकज्ञानोत्पत्तये व्याप्तिज्ञानाद्यपेक्षया विलम्बो भवति । एतेन— न कलञ्जं भक्षयेदित्यत्र आरोपितं कलञ्जभक्षणं प्रेरणाविषयः इति शाब्दबोधः । ततः कलञ्जभक्षणाभावः प्रेरणाविषयः इति मानसबोधो जायते । ततश्च यदभावः प्रेरणाविषयः सः आप्तेष्टाधिकानिष्टफलकः इति व्याप्तिस्मरणात् कलञ्जभक्षणे अनिष्टसाधनत्वस्यानुमितिरूपं निवर्तकं ज्ञानं जायते इति— परास्तम् । निवर्तकज्ञानोत्पादायातिविलम्बकल्पनया गौरवात् ।

'न ब्राह्मणं हन्यादित्यादौ स्वभावतः प्राप्तहन्त्यर्थानुरागी नञ् । नञश्चैष स्वभावः यत् स्वसंबन्धिनोऽभावबोधनम् । निषेध्याभाव-

बुद्धिश्चौदासीन्यकारणम् ।' इति भगवत्पादभाष्यं नास्मत्प्रतिकूलम् । तथाहि - न हन्यादित्यादौ लिङर्थान्विताभावः धात्वर्थे हनने अन्वेति । अतश्च अनुयोगितया हन्त्यर्थान्वय्यभावार्थकस्य नञः हन्त्यर्थानुरागित्वमुपपद्यते । स्वसंबन्धिनः— नञ्संबन्धिनः हननस्य, अभावबोधनं - विध्यर्थाभावबोधनम् इति तदर्थः । निषेध्याभावबुद्धिः— निषेध्ये हनने लिङर्थस्य बलवदनिष्टाननुबन्धित्वस्याभावबुद्धिः अनिष्टसाधनत्वबुद्धिरिति यावत् । न च घटस्याभावः इत्यादौ षष्टचा प्रतियोगित्वस्य बोधात् स्वसंबन्धिनोऽभावेत्यनेन स्वसंबन्धिप्रतियोगिकाभावबोधनमेव स्वारसिकमिति वाच्यम् । यतः प्रतियोगित्वसंबन्धस्येव अनुयोगित्वरूपस्य संबन्धस्यापि षष्ठचा बोधनं स्वारसिकमेव । न च निषेध्याभावबुद्धिरित्यस्य निषेध्ये अनिष्टसाधनताबुद्धिरिति श्रीवाचस्पतिमिश्राणां व्याख्यानमक्षरस्वारस्यानुगुणमित्युक्तमिति वाच्यम् । निरुक्तरीत्या लिङर्थबलवदनिष्टाननुबन्धित्वस्याभाव एव तत्रानिष्टसाधनत्वपदेनोच्यते इति तस्याक्षरानुगुणत्वात् । अपिच भवतामेव निषेध्याभावबुद्धिरित्यस्य निषेध्याभावस्य प्रेरणाविषयत्वेन बुद्धिरिति शेषपूरणेन व्याख्यानमक्षरस्वारस्याननुगुणम् । किञ्च नव्यवैयाकरणानां भवतां मते नञा अभावशाब्दबोधाजननात् 'नञश्चैष स्वभावः यत्स्वसंबन्धिनोऽभावबोधनम्' इति भाष्यं शाब्दबोधोत्तरकालिकमानसबोधाभिप्रायकतया योजनीयम् ।

एवं सुरापानप्रतिषेधः इत्याचार्योक्तिरपि न भवदभिमतबोधे प्रमाणम् । यतः कण्ठरवेण धात्वर्थे लिङर्थाभावो बोध्यते इति वदद्भिः नैयायिकशिरोमणिभट्टाचार्यैः हननप्रतिषेधः इति व्यवहृतमस्ति । तस्मात् सुरापानस्यानिष्टाननुबन्धित्वाभाव एव 'भावं तु बादरायणोऽस्ति हि' इति सूत्रस्थेन 'सुरापानप्रतिषेधो गम्यते' इति भाष्येण

विवक्षित इति न कोऽपि विरोधः । न च भवन्मते, चैत्रः कीदृशः इति प्रश्ने, चैत्रः न कलञ्जं भक्षयेत् इत्युत्तरं वक्तुरसंबद्धप्रलापित्वं न स्यादित्युक्तमिति वाच्यम् । चैत्रः कीदृशः इति प्रश्नवाक्यं चैत्रे जिज्ञासितधर्मावच्छिन्नाभेदावगाहिबोधं प्रसूते । तस्य चैत्रे धर्मविशेषावच्छिन्नाभेदावगाहिबोधजनकमेव वाक्यमुत्तरं भवति । अत एव 'घटः किंजन्यः' इति प्रश्ने घटे दण्डजन्यत्वबोधकमपि घटो दण्डात् इति वाक्यं नोत्तरं प्रामाणिकानाम् । अपितु घटो दण्डजन्यः इत्येव । चैत्रः न कलञ्जं भक्षयेदिति वाक्यं बलवदनिष्टाननुबन्धित्वाभाववत्कलञ्जभक्षणानुकूलकृतिमांश्चैत्रः इति तादृशकृतिप्रकारकाश्रयतासंसर्गकं बोधं प्रसूते । न तु तादृशकृत्यवच्छिन्नाभेदावगाहिनमिति चैत्रः कीदृशः इति प्रश्नस्य नोत्तरं भवति । अनिष्टसाधनकलञ्जभक्षणानुकूलकृतिमांश्चैत्रः इति वाक्यं तूत्तरं भवत्येव । तज्जन्यबोधे नामार्थयोरभेदान्वयव्युत्पत्तेः कृतिमदभेदस्य चैत्रेऽवगाहनात् । अत एव चैत्रः कीदृशः इति प्रश्नस्य चैत्रः पचतीति वाक्यं नोत्तरं संगतम् । कृत्यवच्छिन्नाभेदस्य चैत्रेऽनवभासात् । परन्तु चैत्रः पाचकः इत्येव समीचीनमुत्तरम् । न च तथापि चैत्रः किं करोति इति प्रश्ने न कलञ्जं भक्षयेदित्युत्तरस्य साधुत्वापत्तिः, आख्यातार्थकृतौ कलञ्जभक्षणविषयकत्वस्य बोधनादिति वाच्यम् । प्रश्नवाक्यं हि लडर्थवर्तमानकालान्वितकृतौ जिज्ञासितधर्मावच्छिन्नविषयकत्वावगाहिबोधं जनयति । तस्य च वर्तमानकृतौ तादृशकलञ्जभक्षणविषयकत्वावगाहिबोधजनकमेवोत्तरम् । लिङन्तेन वर्तमानकृतिः नोपस्थापिता । वर्तमानत्वभासकाभावात् । तादृशं कलञ्जभक्षणं करोति, कलञ्जं भक्षयति इत्यादिकं तु भवत्युत्तरम् । वर्तमानकृतौ तद्विषयकत्वबोधकत्वात् ॥

तदयं निष्कर्षः— न कलञ्जं भक्षयेत् इत्यत्र लिङर्थबलवदनिष्टाननुबन्धित्वस्याभावः, चैत्यं न वन्देत, रात्रौ श्राद्धं न कुर्वीत इत्यादौ लिङर्थेष्टसाधनत्वस्याभावश्च धात्वर्थे, नातिरात्रे षोडशिनं गृह्णाति इत्यादौ धात्वर्थान्वितनञर्थाभावे लिङर्थेष्टसाधनत्वं च बोध्यते इति ।।

इत्थं च इष्टसाधनत्वादिकं त्रितयं लिङर्थः इति व्यवस्थापयन्ति ।।

इति विधिविमर्शनं नाम द्वितीयं प्रसूनम् ।

—:o:—

श्रीगदाधरभट्टाचार्य - खण्डदेवाचार्ययोः इतरेतरग्रन्थापरिचयः

तृतीय प्रसूनम्

नव्यन्यायमहारण्यसञ्चरणयोग्यां पदवीं निर्ममिरे श्रीगदाधर-भट्टाचार्याः । ते, दर्शनान्तरीयनिबन्धेषु स्वपूर्वतनन्यायनिबन्धेषु चादृतसरणितो विशिष्टया सरलगभीरया सरण्या वाक्यार्थबोधानुबन्धि-प्रमेयजातं न्यायदर्शनसिद्धं, प्रायो विना ग्रन्थकाराणां नामनिर्देशं दर्शनान्तरोदीरितानां स्वपक्षीयैरन्यैरुत्थापितानां च दूषणानां निरसन-पूर्वकं व्यवस्थापयन्ति व्युत्पत्तिवादे । भट्टपादसिद्धान्तव्यवस्थापकाः श्रीखण्डदेवाचार्याः नव्यनैयायिकादृतपथा पदार्थनिष्कर्षान् वर्णयन्तः, मीमांसकसिद्धं शाब्दबोधसंबन्धि प्रमेयजातं, विना प्रबन्धॄणां नामधेयो-ल्लेखनं तार्किक - वैयाकरणादिमतापाकरणपूर्वकं वर्णयन्ति स्वीये भाट्टरहस्ये । व्युत्पत्तिवादे निष्कर्षितान् सिद्धान्तान् परिशीलयन्ति भाट्टरहस्ये श्रीखण्डदेवाचार्याः इति कतिपये मन्यन्ते । तत्सामाञ्जस्यमत्र चिन्त्यते ॥

भाट्टरहस्यं, विधिवादे, भावनामुख्यविशेष्यतावादे, तथा सर्वत्र तार्किक-मतं निराकरोति । परंतु श्रीगदाधराभिमतान् निष्कर्षान् न परामृशति । अतः व्युत्पत्तिवादपरिचयः भाट्टरहस्ये नोपलभ्यते । एवं व्युत्पत्तिवादे क्वचित् भाट्टरहस्योक्तदूषणमुद्भाव्य परिहृतमिति भाति । तथापि भाट्टरहस्यपरिचयः व्युत्पत्तिवादे नावधारयितुं शक्यते । विधिवादे, बलवदनिष्टाननुबन्धित्वस्य लिङर्थतां विस्तरेण

दूषयति भाट्टरहस्यम् । बलवदनिष्टाननुबन्धित्वपदार्थं विकल्प्य, अन्ते बलवद्द्वेषविषयाप्रयोजकत्वं तदित्यभिधाय, प्राचीनकर्मवशेन यागजन्ये आन्तरालिकश्रमे पुरुषविशेषस्य बलवद्द्वेषोदयसंभवात् तज्जनके यागादौ बलवदनिष्टाननुबन्धित्वस्य बाधात् यजेतेत्यत्र लिङा तस्य बोधो नोपपद्यते इति दूषणमुदभावि ।

नेदं व्युत्पत्तिवादोक्तस्य निरासकं भवति । विधिप्रत्ययस्य तदादि-न्यायानुसारेण बलवद्द्वेषविषयतावच्छेदकत्वोपलक्षित - नरकत्वाद्या-श्रयसाधनतात्वावच्छिन्नप्रतियोगिताकाभावकूटे तादृशाभावत्वेनानुगते एकैव विधिप्रत्ययस्य शक्तिः । उपलक्षणीभूतद्वेषविषयतावच्छेदकत्वं परित्यज्य नरकाद्यसाधनत्वं प्रतीयते । कुत्रचिन्नरकासाधनत्वं, कुत्र-चिद्रोगासाधनत्वं प्रतीयते इत्यत्र तात्पर्यमेव नियामकम् । यजेतेत्यत्र नरकासाधनत्वमेव बुध्यते, न श्रमासाधनत्वम् । शाकं न भुञ्जीत इति वैद्यकवाक्ये, रिक्तायां न गच्छेत्, नैकः पर्वतमारोहेत् इत्यादौ च रोगादितत्तदनिष्टासाधनत्वस्य लिङर्थस्याभावो बोध्यते, इति तन्मतनिष्कर्षस्य व्युत्पत्तिवादे प्रतिपादितत्वात् । एवं, बलवदनिष्टानु-बन्धित्वज्ञानस्य प्रवृत्तौ प्रतिबन्धकत्वात् तदभावस्य स्वरूपसत एव प्रवृत्तिहेतुत्वात् बलवदनिष्टाननुबन्धित्वज्ञानस्याप्रवर्तकत्वात् न बलवदनिष्टाननुबन्धित्वस्य लिङर्थता युक्तेति रहस्यग्रन्थः । व्युत्पत्ति-वादस्तु, बलवदनिष्टानुबन्धित्वज्ञानस्य प्रवृत्तिप्रतिबन्धकतामनुमोदमा-नोऽपि, न कलञ्जं भक्षयेदिति निषेधविधेः प्रामाण्यानुरोधतः बलवदनि-ष्टाननुबन्धित्वस्य विध्यर्थप्रवेशः, इष्टसाधनत्वाभावस्य कलञ्जभक्षणे बाधेन बलवदनिष्टाननुबन्धित्वाभावबोधकत्वे एव प्रामाण्यसंभवादिति निरूपयति ।

एवं तार्किकमते यजेतेत्यादितः इष्टसाधनयागानुकूलकृतिमान् स्वर्गकामः इति शाब्दबोधानन्तरं यागे स्वर्गसाधनत्वस्य मानसो बोधः। शाब्दबोधे स्वर्गरूपेष्टसाधनत्वभानं न संभवति। स्वर्गकामः इत्यत्र कामनाविशेषणत्वेनोपस्थितस्य स्वर्गस्य लिङर्थेष्टे अभेदेनान्वयानुपपत्तेः। तदुत्तरं जायमानः मानसः इष्टे स्वर्गाभेदबोध एव भेदनिश्चयप्रतिबध्यः, न शाब्दबोधः इति तार्किकमतमनुवदति प्रघट्टकद्वये भाट्टरहस्यम्।

"यजेत स्वर्गकामः इत्यादौ स्वर्गसाधनत्वस्य यागे प्रतीयमानस्य मानसबोधविषयत्वमङ्गीकृत्य, क्लृप्तव्युत्पत्तितः इष्टसाधनीभूतयागानुकूलकृतिमान् स्वर्गकामः इत्येवंविधशाब्दबोधस्य भवत्संमतस्यानापत्तेश्च" इति।

"आवश्यकं चैतत्परेषामपि। इष्टसामान्यसाधनत्वस्यैव लिङर्थत्वात्, स्वर्गादिपदार्थस्य च कामनाविशेषणत्वेन इष्टे अभेदान्वयानुपपत्तेः, इष्टसाधनीभूतयागानुकूलकृतिमान् स्वर्गकामः इति शाब्दबोधस्यावश्यकत्वात्, तदुत्तरमिष्टे स्वर्गाभेदबोधो मानस एव शास्त्रतात्पर्यविषयः इति" इति च।

व्युत्पत्तिवादे तु, लिङा इष्टत्वमविषयीकृत्य स्वर्गत्वादिप्रकारेण स्वर्गसाधनत्वस्य बोधः। समभिव्याहृतपदोपस्थापितकामनाविषयतावच्छेदकत्वोपलक्षित-स्वर्गत्वादिविशिष्टसाधनत्वे लिङः शक्तिः इति निर्व्यूढम्। शाब्दबोधानन्तरं न मानसोत्पत्तिरभिहिता। "वस्तुतस्तु अशक्यस्यैव तस्य [इष्टत्वस्य] शक्यानुगमकता, सर्वनामस्थले बुद्धिस्थत्ववत्। तेन रूपेण फलानां संकेतविषयतां विना शक्त्यैक्यासंभवात् तस्य संकेतविषयत्वोपगमेऽपि यथा न तस्य वाच्यता, तथा प्रपञ्चितमन्यत्र। अत्र चेष्टत्वस्य शाब्दबोधे अभानात् विशिष्य इष्टताव-

च्छेदकस्वर्गत्वादिप्रकारेण शाब्दबोधोत्पत्त्या विधिवाक्यात् प्रवर्तकज्ञाननिर्वाहः । ... वस्तुतः तादृशकामनाविषयतावच्छेदकत्वोपलक्षितस्वर्गत्वादिविशिष्टसाधनत्वे शक्तिस्वीकारात् सर्वसामञ्जस्यम् ” इति व्युत्पत्तिवादः ।

एवं, प्रथमान्तार्थमुख्यविशेष्यतावादिनैयायिकमतोद्भावनावसरे, चैत्रः ओदनं पचतीत्यादौ तिङुपात्तैकत्वसंख्यायाः प्रथमान्तपदोपस्थाप्ये अन्वयस्य निर्विवादतया, तिङर्थभावनाया अपि तस्मिन्नेवाश्रयतासंबन्धेनान्वयः । न तस्या मुख्यविशेष्यत्वम्, कालादिव्यतिरिक्ताख्यातार्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति अन्याविशेषणीभूतप्रथमान्तपदजन्योपस्थितिः कारणमिति एककार्यकारणभावकल्पने लाघवादिति निरूपयति भाट्टरहस्यम् ।

व्युत्पत्तिवादे, घटोऽस्ति इत्यादौ सुबेकवचनादेवैकत्वबोधसंभवात् आख्यातैकवचनस्य संख्यार्थकत्वमेव नास्ति । तिङेकवचनसाधारणमनुगतमेकवचनत्वं एकत्वशक्ततावच्छेदकं न संभवति । तिङः संख्यावाचकत्वस्वीकारेऽपि तिबादिपदत्वप्रकारकज्ञानजन्यैकत्वोपस्थितित्वेन एकत्वशाब्दबोधहेतुत्वे मानाभावः इत्यादिना, प्रथमान्तार्थे आख्यातार्थसंख्यान्वयस्य निरस्तत्वात्, प्रथमान्तार्थे आख्यातार्थसंख्यान्वयस्य निर्विवादतया भावनाया अप्यन्वयः इत्युक्तिः न व्युत्पत्तिवादानुसारिणी । प्रकृतित्व-प्रत्ययत्व-तिङ्त्वादीनामननुगतत्ववादिनां भट्टाचार्याणां च नैव संमता निरुक्तैककार्यकारणभावकल्पनालाघवोक्तिः ।

एवं, परसमवेतत्वघटितकर्मत्वविषयकशाब्दबोधस्य नैयायिकसंमतस्य दूषणावसरे, भाट्टरहस्ये अनूदितः तादृशशाब्दबोधः न व्युत्पत्तिवादानुसारी । तथाहि - चैत्रो ग्रामं गच्छतीत्यत्र वृत्तित्वं भेदश्च

द्वितीयार्थः । ग्रामस्योभयत्रान्वयः । वृत्तित्वस्य धात्वर्थफले, भेदस्य सामानाधिकरण्यसंबन्धेन धात्वर्थव्यापारे चान्वयः इति ग्रामप्रतियोगिकभेदवत्समवेत-ग्रामवृत्तिसंयोगजनक - व्यापारानुकूलकृतिमानिति शाब्दबोधः । चैत्रेण ग्रामो गम्यते इत्यत्र आत्मनेपदस्य फलं भेदश्चार्थः । प्रथमान्तार्थस्य भेदे, तस्य सामानाधिकरण्येन धात्वर्थगमने, तस्य पुनरात्मनेपदार्थफले, तस्याश्रयतया प्रथमान्तार्थे अन्वयः इति चैत्रकर्तृक-ग्रामभिन्नसमवेत-गमनजन्यसंयोगाश्रयः इति शाब्दबोधः अनूदितोऽस्ति भाट्टरहस्ये ।

व्युत्पत्तिवादे, द्वितीयाविचारे लकारार्थविचारे च, विभिन्नप्रकारेण निष्कृष्टशाब्दबोधो वर्णितः । द्वितीयाविचारे, क्रियान्वयिभेदप्रतियोगितावच्छेदकत्वं द्वितीयार्थः । एवमपि विहगो भूमिं प्रयाति इतिवत् विहगो विहगं प्रयाति इति प्रयोगापत्तिः । अतः विहगादिवृत्तित्वविशिष्टस्य संयोगस्य फलस्य क्रियायां स्वजनकत्व-स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वोभयसंबन्धेनान्वयः इति निष्कर्षमभिधाय, एवं सति परसमवेतत्वं संबन्धघटकमेव, न तु द्वितीयार्थ इति चेत्, का क्षतिः इत्युपसंहृतम् ।

लकारार्थविचारे, ग्रामं गच्छतीत्यादौ फलं भेदश्च द्वितीयार्थः । आधेयतया ग्रामान्वितस्य फलस्य अपरस्मिन् द्वितीयार्थे भेदे सामानाधिकरण्य - स्वजनकक्रियावच्छिन्नप्रतियोगिताकत्वोभयसंबन्धेनान्वयः । भेदस्य स्वप्रतियोगितावच्छेदकत्वसंबन्धेन धात्वर्थे, तस्याख्यातार्थाश्रयत्वे, तस्य प्रथमान्तार्थे अन्वयः । चैत्रेण ग्रामो गम्यते इत्यादौ फलं भेदश्च कर्माख्यातार्थः । चैत्रेणेति तृतीयान्तार्थचैत्रवृत्तित्वान्वितधात्वर्थक्रियायाः स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन भेदेऽन्वयः । तस्यापरस्मिन्नाख्यातार्थे फले स्वसामानाधिकरण्य-स्वप्रतियोगितावच्छेदक-

अन्यत्वोभयसंबन्धेनान्वयः । विशिष्टफलस्याश्रयतया प्रथमान्तपदार्थे अन्वयः इति निरूपितमास्ते ।

एवं, घटं जानातीत्यादौ द्वितीयायाः विषयत्वे लक्षणा तार्किकसिद्धा । तद्वत् स्वमतेऽपि विषयत्वे लक्षणेति साक्षेपनिरासं निरूपयति भाट्टरहस्यम् । 'सविषयकधातुसमभिव्याहारे तार्किकरीत्यैव विषयत्वादिकं द्वितीयादिना लक्षयित्वा (आख्यातेनाऽऽश्रयत्व लक्षयित्वा) घटविषयकज्ञानाश्रयत्वं चैत्रीयमिति चैत्रो जानाति घटमित्यत्र शाब्दबोधः' । इति ।

व्युत्पत्तिवादे विषयित्वादौ शक्तिरेवेति व्यवस्थापितम् । 'वस्तुतस्तु विषयितात्वस्य संयोगत्वाद्यपेक्षया आधेयतात्वाद्यपेक्षया च अगुरुतया किंधर्मावच्छिन्ने शक्तिः कल्प्यते इत्यत्र विनिगमकं दुर्लभम् । एकस्मिन् प्रयोगभूयस्त्वमप्यशक्यनिर्णयमिति तत्रापि शक्तिः सिद्ध्यतीत्यवधेयम् ' इति ।

एतावता भाट्टरहस्ये व्युत्पत्तिवादपरिचयाभावः चिन्तितः । इदानीं व्युत्पत्तिवादे भाट्टरहस्यपरिचयशून्यता चिन्त्यते । व्युत्पत्तिवादे, विधिविचारे, 'सन्ध्यावन्दनादिनित्यकर्मणां निष्फलत्वात् सन्ध्यामुपासीतेत्यादौ इष्टसाधनत्वान्वयासंभवात् इष्टसाधनत्वं न लिङर्थः । नित्यकर्मणि प्रवर्तिका नेष्टसाधनताज्ञानघटिता सामग्री । अपितु, सन्ध्यावन्दनाभावे नरकसाधनत्वज्ञानाधीनद्वेषघटिता । इष्टसाधनत्वस्य लिङर्थत्वाभावेऽपि, स्वर्गासाधनं न स्वर्गकामनाधीनकृतिसाध्यमिति इतरबाधबलात् स्वर्गकामकृतिसाध्यतान्वयितावच्छेदकतया स्वर्गसाधनत्वं विधिजन्यबोधे भासते ' इति मीमांसकानां मतमनूदितमस्ति ।

भाट्टरहस्ये निर्धारितस्य, अयमत्र प्रवर्तनामित्याकारकत्वविशिष्ट-प्रवर्तनाया लिङर्थत्वस्य, तस्याः स्वज्ञानाधीनानुमितिप्रयोज्यत्वसंबन्धेन आख्यातसामान्यार्थभावनायामन्वयस्य च नैव परामर्शोऽस्ति ।

एवं, 'आख्यातसामान्यस्य व्यापारमात्रमर्थः न कृतिः, करोतिरपि व्यापारार्थक एव न यत्नार्थकः' इत्येवं मीमांसकमतमनुवदति व्युत्पत्तिवादः । भाट्टरहस्यं तु आख्यातस्य करोतेश्च यत्नत्वावच्छिन्नवाचकतां व्यवस्थापयति ।

अपिच, इष्टसाधनत्वस्य विध्यर्थत्वे, (1) आचार्यादेः प्रवर्तकत्वव्यवहारानुपपत्तिः, (2) पाककृतेर्वर्तमानतादशायां चैत्रः पचेदिति प्रयोगापत्तिः, (3) चैत्रः कीदृशः इति प्रश्ने, चैत्रः पचति, चैत्रः पचेत् इत्यादीनामुत्तरत्वापत्तिः (4) नानाव्युत्पत्तीनां कल्पनागौरवम् इत्यादिदूषणानां भाट्टरहस्योदीरितानामनुवादो न लक्ष्यते व्युत्पत्तिवादे । परंतु यागेऽपि कदाचित् बलवद्द्वेषविषयान्तरालिकश्रमजनकत्वसत्वेन बलवदनिष्टाननुबन्धित्वस्य बाधात् न तस्य लिङर्थता इत्याक्षेपः रहस्योद्भावितः पराकृतः । स्वसिद्धान्ते परोक्ताक्षेपाणामिव, स्वोत्प्रेक्षितानामप्याक्षेपाणां परिहारः प्रामाणिकग्रन्थेषु बहुलं दृश्यते ।

अत्र बहूनां रहस्योक्तानामपरामर्शात् आक्षेपोऽयं तद्ग्रन्थपरिचयाधीनः इति न निर्धारयितुं शक्यते । तस्मात् स्वीयैः स्वेन वोत्प्रेक्षितोऽयमाक्षेपः पराकृतो व्युत्पत्तिवादे इत्येव युज्यते । नैयायिकाः सखण्डस्य निर्वचनासंभवे एवाखण्डपदार्थं स्वीकुर्वन्ति । नव्यमीमांसकास्तु, प्रायः अखण्डमेव कर्तृत्व-कर्मत्व-प्रकृतित्व-प्रत्ययत्व-पाकत्वादिकं पदार्थमभ्युपगच्छन्ति ।

प्रयोगातिप्रसङ्गाप्रसङ्गवारणे दत्तदृष्टयो नैयायिकाः अनुभवानुरोधेन व्युत्पत्तिभेदान् कल्पयन्ति । अभिमतसंशयादिनिवृत्तये शाब्द-

बोधानन्तरकालिकमानसबोधजननाय विलम्बं न सहन्ते । नव्यमीमांसकास्तु कार्यकारणभावकल्पनालाघवं मूलयुक्तिमवलम्बमानाः परम्परासंबन्धेन तत्त्वेनानुपस्थितेन प्रातिपदिकार्थादीनां आख्यातार्थभावनायामेवान्वयं स्वीकुर्वन्तः. शाब्दबोधानन्तरभाविमानसबोधेनाभिमतसंशयादिनिर्वृत्तिं मन्यन्ते ।

संसर्गाणां विशेषरूपेणैव संसर्गमर्यादया भानं स्वीकुर्वन्तो नैयायिकाः, संसर्गतात्पर्यज्ञानादिघटितशाब्दसामग्रीतः संसर्गविशेषाणामेव शाब्दबोधे भानात् तद्भेदेन समभिव्याहाराकाङ्क्षाज्ञानकारणताभेदस्य सर्ववादिनामवर्जनीयतां मन्यन्ते ।

भाट्टरहस्यं, अनेकेषु स्थलेषु, चैत्रः कीदृशः इति प्रश्ने, चैत्रः पचति, पचेत्, न कलञ्जं भक्षयेदित्यादीनामुत्तरत्वापत्तिदोषं निरूपयति ।

इत्थमापादनं सर्वमतसाधारणम् । धात्वर्थमुख्यविशेष्यतावादिमते, पाकः कीदृशः इति प्रश्ने, भावनामुख्यविशेष्यतावादिमते कृतिः कीदृशी इति प्रश्ने च, चैत्रः पचति, पचेत् इत्यादेरुत्तरत्वापत्तेः सुलभत्वात् । अतः, कीदृशः चैत्रः इति प्रश्नवाक्यं चैत्रे जिज्ञासित-धर्मवदभेदबोधकमिति, चैत्रे कृतिमदभेदावगाहिबोधजनकं चैत्रः पाचकः इत्यादिकमेवोत्तरम् । न भेदसंबन्धेन कृतिप्रकारकबोधजनकं चैत्रः पचतीत्यादिकं वाक्यम् । रहस्ये, "करोतेः यतेश्च यत्नार्थकत्वेऽपि करोतेरेव कर्मसाकाङ्क्षत्वं, न यततेः, द्वितीयार्थस्य कर्मत्वस्य स्वशब्देनोपादाने घटः कर्मत्वमित्यादौ न घटनिष्ठकर्मत्वबोधकता इत्यादेरुपन्यासात् नव्यमीमांसकैरपि शब्दस्वभावस्य नियामकत्वमङ्गीकरणीयमेव । तदेतत्सर्वमभिप्रेत्याभिहितं श्रीबच्चाझामहोदयैः 'तस्माच्छब्दमर्यादैव शरणीकरणीया' इति ।

प्राभाकराः, धानकर्मताविशिष्टशक्तात् धेनुपदात् धानकर्मत्वेन न महिष्यादेर्बोधः, गोत्वस्याशक्यस्य प्रयोगोपाधित्वादिति वदन्ति । [1]नव्यमीमांसकाः, पङ्कजपदस्य पद्मत्वावच्छिन्ने रूढिशक्तेरभावेऽपि पद्मत्वस्य प्रयोगोपाधितास्वीकारात् नावयवशक्त्या पङ्कजनिकर्तृत्वेन कुमुदादेर्बोधः इत्यभ्युपगच्छन्ति । तथैव आख्यातार्थकृतौ तत्तल्लिङादि-पदज्ञानोत्तरत्वस्य लिङ्पदप्रयोगोपाधितास्वीकारेण पाककृतेर्वर्तमान-तादशायां पचेदिति प्रयोगापत्तिः सुलभवारणा ।

एवं, यक्षानुरूपो बलिः इति न्यायेन, पचेदित्यादौ धात्वर्थस्या-ख्यातसामान्यार्थकृतौ स्वानुकूलत्व—स्वबोधकतत्तद्धातूत्तरतत्तल्लिङादि-पदज्ञानाधीनत्वोभयसंबन्धेनान्वयस्वीकारान्नेयं कृतेर्वर्तमानतादशायां पचेदिति प्रयोगापत्तिरुत्थानमर्हति इत्यादिकं प्रपञ्चितमन्यत्रास्माभिरिति बोध्यम् ।

तस्मात् भाट्टरहस्यं तार्किकमतविशेषाणां निरासकमपि न व्युत्पत्तिवादपरामर्शि, व्युत्पत्तिवादोऽपि न भाट्टरहस्यपरामर्शीति युक्तमुत्पश्यामः ॥

इति श्रीगदाधरभट्टाचार्य - श्रीखण्डदेवाचार्ययोरितरेतरग्रन्थापरिचयो नाम

तृतीयं प्रसूनम् ।

---

1. "पङ्कजादिपदे न समुदायशक्तिः मानाभावात् । पङ्कजनि-कर्तृत्वाश्रयत्वेनैव बोधः, न तु पद्मत्वेन । ननु तर्हि कुमुदादौ प्रयोगापत्तिरिति चेत्, न, इष्टत्वात् । 'पद्मत्वस्य तत्प्रयोगोपाधित्वाद्वा ॥" इति मीमांसकग्रन्थः ।

न्यायनिबन्धेषु शाब्दिकप्रक्रियाभेदः

चतुर्थं प्रसूनम्

ललितैः पदविन्यासैः या नृत्यति विबुधवदनरङ्गेषु ।
सच्छास्त्रवेदवाद्यैः सरस्वतीं तां नमस्यामः ।।

पदवाक्यप्रमाणविद्याः विभिन्नप्रस्थानाः विराजन्ते । वाक्यजन्यबोध-विचारणा परं सर्वैरपि दार्शनिकैराद्रियते । शास्त्रप्रवर्तकपूर्वाचार्योक्ति, कार्यकारणभावकल्पनालाघवादियुक्ति, अनुभवं वा प्रमाणमूर्धन्यमूरीकृत्य स्वाभिमतेन पथा वाक्यार्थबोधं दार्शनिकाः वर्णयन्ति । व्याकरणस्मृतेः पदसाधुत्वविषयत्वात् प्रत्ययार्थान्वयादिनिरूपणाय सर्वैरप्यादरणीयं व्याकरणानुशासनम् । तत्र सूत्रादिव्याख्यातॄणां शाब्दिकानामभिमतं प्रक्रियाभेदं भेदेनापि विवृण्वन्ति नैयायिकाः स्वनिबन्धेषु । शास्त्रार्थ-विचारकुतूहलिनां विनोदाय स्वमतिशुद्धये च कतिपये शाब्दिकप्रक्रिया-भेदाः चिन्त्यन्ते ।

तत्रादौ कारकाधिकारीयं कर्मकारकविभजनं चिन्त्यते । 'कर्तुरी-प्सिततमं कर्म' (पा-सू-1-4-46) 'तथायुक्तं चानीप्सितम् (पा. सू 1-4-50) इति सूत्राभ्यां ईप्सितमनीप्सितं च कर्म प्रदर्शितमस्ति । तत्रेप्सितं कर्म त्रेधा, अनीप्सितं च कर्म चतुर्धा च विभक्तं वाक्यपदीये -

'निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम् ।
तच्चेप्सिततमं कर्म, चतुर्धाऽन्यत्तु कल्पितम् ।।

औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् " इति ।

ईप्सितकर्मसु त्रिषु, निर्वर्त्य-विकार्यकर्मणोः लक्षणे पक्षभेदं,

सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी ।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ।।
प्रकृतेस्तु विवक्षायां विकार्यं, कैश्चिदन्यथा ।
निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम् ।।

इति श्लोकाभ्यामभिधाय, निर्वर्त्यकर्मणो लक्षणं, विकार्यस्य सोदाहरणं द्वैविध्यं च निरूपितम्—

'यदसज्जायते सद्वा जन्मना यत्प्रकाशते ।
तन्निर्वर्त्यं विकार्यं तु कर्म द्वेधा व्यवस्थितम् ।।
प्रकृत्युच्छेदसंभूतं किञ्चित् काष्ठादिभस्मवत् ।
किञ्चित् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ।।'

इति श्लोकयोः ।

तत्रायमर्थः—यत् निर्वर्त्यते - निष्पाद्यते तत् निर्वर्त्यम् । जायमानस्य कस्यचित् घटादेः प्रकृतिः मृदादिः कार्योत्पत्तिकाले वर्तते । काष्ठेन निष्पद्यमानभस्मनः प्रकृतिः काष्ठं कार्योत्पत्तिकाले न वर्तते । काष्ठोच्छेदप्रयोज्यत्वाद्भस्मोत्पत्तेः । उभयत्रापि यदा प्रकृतिवाचकशब्देन सह निष्पद्यमानार्थबोधकः शब्दः प्रयुज्यते, तदा निर्वर्त्यं कर्म घटादिकं विकार्यमित्युच्यते । यथा मृदं घटं करोतीत्यत्र घटः, काष्ठं भस्म करोति इत्यत्र भस्म च विकार्यं कर्म । यदा प्रकृतिवाचकः शब्दो नोपादीयते, तत्र, घटं करोति, भस्म करोतीत्यादौ घटः भस्म च निर्वर्त्यं कर्मेति व्यवह्रियते इति प्रथमः पक्षः । पक्षेऽस्मिन्, मृदः

काष्ठादेश्च प्रकृतिकर्मणः निर्वर्त्यत्व-विकार्यत्वयोरभावात् वक्ष्यमाण-प्राप्यकर्मलक्षणायोगाच्च त्रिविधकर्मसु अनन्तर्भावेण तुरीयत्वमापतति ।

'कैश्चिदन्यथा' इत्यादिना द्वितीयः पक्षो निरूपितः । कैश्चित् आचार्यैः अन्यथा—पूर्वोक्तप्रकारवैलक्षण्येन, निर्वर्त्यं विकार्यं च कर्म प्रदर्शितमित्यर्थः ।

नैयायिकसंमतारम्भवादाश्रयणेन असतो यस्य कार्यस्योत्पत्तिः, सांख्यवैयाकरणादिसंमतसत्कार्यवादावलम्बनेन सतः कार्यस्य प्रकाशो वा भवति, तन्निर्वर्त्यम् । तथा व्यवहारे विद्यमानायाः अविद्यमानाया वा प्रकृतेरविवक्षा न प्रयोजिका । तथाच घटं करोति, भस्म करोति इत्यत्रेव, मृदं घटं करोति, काष्ठं भस्म करोति इत्यत्रापि घटः भस्म च निर्वर्त्यं कर्मैव ।

मृदादिकं च प्रकृतिद्रव्यमेव विकार्यं कर्म, न तु निष्पद्यमानं घट-भस्मादिकम् । यत् विकारं प्राप्नोति तत् विकार्यम् । कार्योत्पादने कस्याश्चित् प्रकृतेः नाशरूपो विकारो भवति । यथा भस्मोत्पादने काष्ठस्य। कस्याश्चित् प्रकृतेरनाशेऽपि गुणान्तरोत्पत्तिरूपो विकारो भवति। यथा सुवर्णस्य कुण्डलादिकार्यनिष्पादनाय भुग्नत्वादिगुणान्तरोत्पत्तिरेव न नाशः । प्रकृत्युच्छेदसंभूतमित्यत्र प्रकृतिभूतस्यात्मनः उच्छेदं संभूत-प्राप्तमित्यक्षरार्थः । एवंच द्विविधविकारयोगि प्रकृतिद्रव्यमेव विकार्यं कर्मेत्युच्यते । न पूर्वोक्तपक्षे इव निष्पद्यमानं घट-भस्मादिकमिति द्वितीयः पक्षः ।

सोऽयं ' यदसज्जायते सद्वा ' इत्यादिपद्यद्वयेनाभिहितः ।

एवं, बृहद्वैयाकरणभूषणोक्तसरण्या वाक्यपदीयपद्यार्थो वर्णितः ।

अत्र च द्विविधेऽपि विकार्योदाहरणे भस्मवदिति, विकारवदिति चोपादानं नातिश्लिष्टं भवति ।

गोकुलनाथोपाध्यायाः पदवाक्यरत्नाकरे न्यायनिबन्धे, 'हरिस्तु' इत्यादिना वाक्यपदीयोक्तप्रथमपक्षं निरूप्य, 'पक्षान्तरमप्याह हरिरेव कैश्चित् अन्यथा निरुच्यमानम्' इत्यादिना द्वितीयं पक्षं प्रतिपादयन्ति । तत्र द्विविधविकार्योदाहरणप्रसङ्गे काष्ठादिभस्मवत् इति वचनसामञ्जस्यं मनसि निधाय प्रकृत्युच्छेदेति कारिकार्थं वर्णयन्ति । तद्यथा— "प्रकृत्युच्छेदेत्यादिकारिका तु, यदुच्छेदेन संभूतं निर्वर्त्यं कर्म, सा प्रकृतिः विकार्यं कर्म, यथा काष्ठोच्छेदसंभूतं भस्म निर्वर्त्यमिति, काष्ठं विकार्यम् । सत्यामेव यस्यां प्रकृतौ गुणोत्पत्तिर्धातुना प्रतिपाद्यते, तदपि द्वितीयं विकार्यं कर्म, यथा सदेव शलाकास्वरूपं कनकं अवयवानामनारम्भकसंयोगमात्रविरोधिना कर्मणा भुग्नत्वगुणोत्पत्त्या विकार्यम् । कुण्डलपदस्य भुग्नं द्रव्यमर्थः । धात्वर्थोत्पत्तिस्तु भुग्नत्वे एवार्थतोऽन्वेति इत्यर्थिका ।" इति ।

स्वयं च,

'यदुत्पत्तिस्वरूपेण फलेन व्यतिषज्यते ।,
तन्निर्वर्त्यं, विकार्यं विकारैः प्राप्यमतोऽन्यथा ।। (प.र.का.)

इति कारिकया निर्वर्त्य-विकार्य-प्राप्यकर्मणां विशेषमभिधाय, (क) कटं करोतीत्यत्र उत्पादनार्थककरोत्यर्थफलीभूतोत्पत्तिसंसृष्टः कटः निर्वर्त्यकर्म, (ख) शत्रुं हिनस्तीत्यत्र धात्वर्थफलेन नाशरूपविकारेण संसृष्टः शत्रुः, तृणं छिनत्तीत्यादौ नाशानुकूलावयवविश्लेषफलेन विकारेण संसृष्टं तृणादिकं च विकार्यकर्म, (ग) ग्रामं गच्छतीत्यत्र उत्पत्ति - विकारभिन्नेन संयोगेन फलेन संसृष्टो ग्रामः, रूपं पश्यतीत्यादौ

तादृशेन विषयत्वेन फलेन संसृष्टो रूपादिश्च प्राप्यं कर्म इति विवेचयन्ति ।

गोकुलनाथोपाध्यायान्तेवासिनः **गिरिधरोपाध्यायाश्च**, गुरुचरणोक्तमेव निर्वर्त्यादिकर्मणां विशेषं हर्युक्तपक्षद्वयं च शब्दतोऽर्थतश्च निरूपयन्तीति नात्र विषये **विभक्त्यर्थनिर्णय**मधिकृत्य वक्तव्यमस्ति ।

वैयाकरणभूषणसारे तु, ईप्सितकर्मणः त्रैविध्यं, अनीप्सितकर्मणः चातुर्विध्यं च वाक्यपदीयकारिकाद्वयेन निरूप्य,

यदसज्जायते सद्वा जन्मना यत्प्रकाशते ।
तन्निर्वर्त्यं, विकार्यं तु कर्म द्वेधा व्यवस्थितम् ।।
प्रकृत्युच्छेदसंभूतं किञ्चित् काष्ठादिभस्मवत् ।
किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ।।
क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ।।

इति च तत्रैवोक्तमित्यभिधाय, घटं करोतीत्याद्यम्, काष्ठं भस्म करोति, सुवर्णं कुण्डलं करोतीति च द्वितीयम्, घटं पश्यतीति तृतीयम् इत्यादिना सन्दर्भेण सप्तानामपि कर्मणामुदाहरणानि प्रदर्शितानि । अत्र निर्वर्त्ये विकार्ये च कर्मणि हरिणोक्तपक्षभेदस्य प्रस्तावो नास्ति । बृहद्वैयाकरणभूषणे वाक्यपदीयादुद्धृतं,

सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी ।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ।।
प्रकृतेस्तु विवक्षायां विकार्यं, कैश्चिदन्यथा ।
निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम् ।।

इति कारिकाद्वयं नोट्टङ्कितम् ।

एतद्ग्रन्थपरामर्शे काष्ठसुवर्णादेः प्रकृतिकर्मणः निरुक्तकर्मप्रभेदेषु अन्तर्भावो न स्फुटं भासते ।

भूषणसारव्याख्यातारः हरिवल्लभाः, 'यदसज्जायते सद्वा जन्मना यत्प्रकाशते' इत्यनन्तरं 'प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा' इति कारिकार्धं योजयन्ति । तथैव वाक्यपदीयपाठः इत्यभिधाय, तत्रोपपत्तिं च वर्णयन्ति । सामान्यलक्षणकथनानन्तरमेव विशेषजिज्ञासया विभागकरणं युज्यते । अतः 'विकार्यन्तु कर्म द्वेधा व्यवस्थितम्' इत्यतः प्राक् विकार्यलक्षणकथनमावश्यकमिति । परन्तु, कैश्चित् इत्यनेन पक्षान्तरोपन्यासः न तेषामभिमतः । किंशब्दस्य सर्वनाम्नः प्रसिद्धार्थकतायाः अन्यथेत्यस्य प्रकृतेरविवक्षायामित्यर्थकतायाश्च स्वीकारात् । तदुक्तं **दर्पणे** — "प्रकाशते इत्यनन्तरं, 'प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा । तन्निर्वर्त्यं' इत्येव वाक्यपदीयपाठः । अन्यथा सामान्यधर्मेणालक्षितस्य विशेषरूपेण प्रदर्शने अर्थान्तरतापत्तेः । तदर्थस्तु, कैश्चित्-प्रसिद्धैराचार्यैः प्रकृतिविवक्षायां निष्पाद्यं विकार्यमित्युच्यते । अन्यथा-तदविवक्षायां तत्-निष्पाद्यं निर्वर्त्यमिति तदर्थः ।" इति ।

यद्यपि तण्डुलानोदनं पचति इत्यत्र विकार्यकर्मणः ओदनस्यापि निर्वर्त्यते-निष्पद्यते इति व्युत्पत्त्या निर्वर्त्यत्वमस्ति, तथापि प्रकृतिबाचकपदासमभिव्याहृतपदोपस्थाप्यत्वे सति निष्पाद्यतारूपं पारिभाषिकं निर्वर्त्यत्वं न विकार्यकर्मणि वर्तते । 'प्रकृतेस्तु विवक्षायां विकार्यम्' इत्यनेन विकार्यलक्षणमभिसंहितम् । प्रतीयमानप्रकृतिविकृतिभावकत्वे सति क्रियानिर्वाह्यविशिष्टासत्व-उत्पत्त्यन्यतरात्मकफलवत्वं विकार्यस्य लक्षणम् । तण्डुलानोदनं पचति इत्यत्र तण्डुलौदनयोः प्रकृतिविकृति-

भावः प्रतीयते । धात्वर्थव्यापारेण पूर्वभावविशिष्टासत्वरूपविकारः फलं तण्डुले, उत्पत्तिरूपविकारः फलमोदने जायते इति प्रकृतिः तण्डुलः विकृतिः ओदनश्चेत्युभयमपि विकार्यं कर्म भवति ।

एवं विकार्यलक्षणे कथिते, 'विकार्यं तु कर्म द्वेधा व्यवस्थितम्' इति विभागः प्रदर्श्यते । प्रकृत्युच्छेदेति कारिकया विकार्यान्तर्गतविकृतिकर्मण एव द्वैविध्यमुच्यते । यद्यपि प्रकृतिः विकृतिश्चेति विकार्यं द्विविधमिति प्रतिपाद्य प्रकृतिलक्षणं वक्तुमुचितम्, तथापि विकृतिकर्मणः द्वैविध्ये अवगते प्रकृतिरपि विकार्यकर्मान्तर्गतमिति ज्ञातप्रायं भवतीति विकृतिकर्म प्रकृत्युच्छेदेत्यादिना विभक्तम् । तेन क्रियानिर्वाह्याभावप्रतियोगितावच्छेदकधर्मवत्त्वं प्रकृतित्वमिति ध्वनितम् । काष्ठं भस्म करोति, तण्डुलानोदनं पचति, काशान् कटं करोति इत्यादौ भस्माद्युत्पादकक्रियाप्रयोज्यः काष्ठतण्डुलकाशादीनां पूर्वभावविशिष्टाभावः तत्प्रतियोगितावच्छेदकपूर्वभाववैशिष्टयवत्त्वेन काष्ठादीनां प्रकृतित्वं भवति । विकार्यकर्मोदाहरणप्रदर्शककारिकायां काष्ठादिसम्बन्धिभस्ममात्रस्योपादाने प्रकृतिकर्मणः काष्ठस्य निर्वर्त्य-विकार्य-प्राप्य-व्यतिरिक्ततया तुरीयत्वापत्तिः । अतः अत्र कारिकायां प्रकृतिकर्म काष्ठादिकमपि उदाहरणतया निर्देष्टव्यम् । काष्ठादिभस्मवदिति न समस्तं पदम् । किन्तु काष्ठादि, इति पृथक् पदम् । प्रकृत्युच्छेदसंभूतमिति भस्मवदित्यत्रान्वेति । प्रकृतिनाशप्रयोज्योत्पत्तिमत्त्वेन भस्मतुल्यमन्यदपि विकारजातमित्यर्थः । एवंच प्रकृतिविकृतिभावापन्नकाष्ठभस्मादि विकार्यमित्यर्थः पर्यवस्यति ।

वयं तु पश्यामः— प्रकृत्युच्छेदसंभूतमित्यावर्तते । काष्ठादि इत्यत्र भस्मवदित्यत्र चान्वेति । काष्ठादिविशेषणतायां, प्रकृतेः— स्वात्मनः उच्छेदं संभूतं-प्राप्तम् भू प्राप्तावित्यनुशासनात् इत्यर्थः । भस्मविशेषण-

तायां प्रकृतेः नाशेन जन्यमित्यर्थः। प्रकृतक्रियया नाशं प्राप्तं काष्ठादि (प्रकृतिकर्म) प्रकृतिनाशप्रयोज्योत्पत्तिमत् भस्मतुल्यं (विकृतिकर्म) चेत्युभयमपि विकार्यमित्युक्तं भवति। एवमेव, 'किञ्चित् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्' इत्यत्रापि सुवर्णादि इति पृथक् पदम्। गुणान्तरोत्पत्त्या इति वैशिष्ट्ये तृतीया। गुणान्तरोत्पत्तिविशिष्टं सुवर्णादि विकार्यम्। तृतीयान्तस्यावर्तनात् गुणान्तरोत्पादप्रयोज्यविकारवत् कुण्डलादिकमपि विकार्यं भवतीत्युक्तं भवतीति।

व्युत्पत्तिवादकृतः गदाधरभट्टाचार्यास्तु, कर्म हि त्रिविधं भवति, प्राप्यं प्रकृतिविकृती चेति कर्मणो विभाग प्रतिपादयन्ति। प्राप्यकर्मलक्षणनिरूपिकां 'क्रियाकृतविशेषाणाम्' इति कारिकां प्रदर्श्य,

'यदसज्जायते पूर्वं जन्मना यत्प्रकाशते।
तन्निर्वर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितम्॥
प्रकृत्युच्छेदसंभूतं किञ्चित् काष्ठादिभस्मवत्।
किञ्चित् गुणान्तरोत्पत्त्या सुवर्णादि विकारवत्॥'

इति कारिकाद्वयमुल्लिखन्ति। निर्वर्त्यविकार्यविषये पक्षद्वयं हरिणोक्तमिति नाभिहितं व्युत्पत्तिवादे, नापि सूचितम्। 'जन्मना यत्प्रकाशते' इत्यनन्तरं 'प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा' इति कारिकार्धयोजनायामपि संमतिर्न सूचिता। परंतु, निरुक्तकारिकायां विकार्यपदं प्रकृतिकर्म-विकृतिकर्मोभयबोधकं पारिभाषिकं ग्राह्यम्। विकृतिकर्ममात्रपरतायां, काष्ठस्य सुवर्णस्य च प्रकृतिकर्मणः निर्वर्त्यादिषु त्रिषु हर्युक्तेष्वनन्तर्भावात् तुरीयत्वापत्त्या कर्मणः त्रैविध्योक्तिः विरुध्येत इति मन्यन्ते। तथाच व्युत्पत्तिवादः— "अत्र प्रकृतिरपि ग्राह्या। अन्यथा काष्ठसुवर्णादेः तुरीयतापत्तेः। विकार्यपदेनैकव्युत्पत्त्या

प्रकृति-विकृत्युभयाबोधनेऽपि उभयसाधारणरूपावच्छिन्ने पारिभाषिकमेव विकार्यपदम् ।" इति ।

श्रीधर्मदत्तसूरयः गूढार्थतत्त्वालोके, विकार्यं द्वेधा-प्रकृतिः विकृतिश्चेति द्विप्रकारकं व्यवस्थितम् । तयोर्मध्ये, किञ्चित् विकृतिरूपं प्रकृत्युच्छेदसंभूतं काष्ठादीनां भस्म यथा, किञ्चत् अपरं विकृतिरूपं कर्म प्रकृतिगतपूर्वगुणविलक्षणगुणोत्पत्त्या निष्पन्नं सुवर्णादीनामलंकारादिकं यथा इति, 'विकार्यं तु कर्म द्वेधा' इति कारिकां व्याचक्षते । काष्ठादिभस्मवदिति प्रकृतिसहितस्य विकार्यस्योदाहरणात् प्रकृतिबोधकपदसमभिव्याहृतपदबोध्यत्वं विकार्यस्यावश्यकमिति लभ्यते । पक्षे चात्र काष्ठादिभस्मवदिति एकं पदमिति बोध्यम् ।

अत्र प्रकृतिकर्मणः कण्ठरवेणानुपादानं निर्वर्त्यप्राप्ययोरिव पार्थक्येन तल्लक्षणस्य स्फुटमनभिधानं, प्रकृतिबोधकपदासमभिव्याहारे विकृतिकर्मनिष्ठस्य पारिभाषिकस्य निर्वर्त्यत्वस्य कर्मविभाजकत्वेनाभिधानं च नातीव श्लिष्टमित्यभिसन्धिना वाक्यपदीयोक्तं कर्मविभागमनुक्त्वा, प्राप्यं प्रकृतिविकृती च इति प्रकारान्तरेण कर्म विभज्य, विकृतिकर्मणः पारिभाषिकं निर्वर्त्यत्वं निरूपयन्ति भट्टाचार्याः ।

(क) क्रियानिष्पाद्यं यत् तत् विकृतिकर्म । तण्डुलानोदनं पचति, कुसुमानि स्रजं करोति, काशान् कटं करोति इत्यादौ ओदनमालाकटादीनि विकृतिकर्माणि । प्रथमे, पाकक्रियया तण्डुलविनाशेनौदनस्य निर्वर्तनम् । द्वितीये, क्रियया कुसुमानां संदर्भविशेषो जायते । कुसुमानि न नश्यन्ति । संदर्भस्य विशेषणस्य जन्यत्वेन संदर्भविशिष्टकुसुमरूपमालाया निष्पत्तिः । तृतीये, काशेष्वेव कटो धर्मी क्रियया उत्पाद्यते इति विशेषोऽवसेयः । प्रकृतिकर्मासमभिव्याहारस्थले ओदनं

पचति, स्रजं करोति, कटं करोति इत्यादौ ओदनादिकं निर्वर्त्यं कर्मेति व्यपदिश्यते ।

इदं त्ववधेयम्-निर्वर्त्यलक्षणनिरूपककारिकायाः शाब्दिकसंमतः 'यदसज्जायते सद्वा जन्मना यत्प्रकाशते' इति पाठः, न्यायनिबन्धे पदवाक्यरत्नाकरे, विभक्त्यर्थनिर्णये चोपलभ्यते । व्युत्पत्तिवादे तु, 'यदसज्जायते पूर्वं जन्मना यत्प्रकाशते' इति पाठो दृश्यते । श्रीबच्चाझामहोदयाश्च भट्टाचार्योक्तत्रिविधविकृतिकर्मसाधारण्येन व्याचक्षते । 'पूर्वं-प्रकृतक्रियारूपव्यापारात् पूर्वम् असत्-स्वरूपेणासदोदनकटादिकं प्रकृतक्रियया जायते । तदेकं निर्वर्त्यम् । यच्च स्वरूपेण विद्यमानमेव प्रकृतक्रियया जन्मना कस्यचित् सन्दर्भविशेषादेः जन्मना, प्रकाशते-तद्विशिष्टतया प्रकाशते, यथा मालादिकं, तदपरं निर्वर्त्यम् । प्रकृति-संबन्धाप्रतिपादनात् प्रकृतिबोधकपदाप्रयोगो लभ्यते' इति ।

(ख) प्रकृतक्रियाप्रयोज्यस्य वस्त्वन्तरोत्पत्तिप्रयोजकस्य पूर्व-भावविशिष्टासत्त्वरूपविकारस्याश्रयः प्रकृतिकर्म । यथा निरुक्तस्थलेषु, तण्डुल-कुसुम-काशादीनि प्रकृतिकर्माणि । प्रथमे तण्डुलस्यैव पाकेन नाशात् विशिष्टाभावः । द्वितीये सत्स्वेव कुसुमेषु सन्दर्भविशेषाभाव-विशिष्टकुसुमाभावः संपद्यते । तृतीये च काशे कटाभावविशिष्टत्वरूप-पूर्वभावविशिष्टाभावः क्रियाप्रयोज्यः इति विवेकः । तथाच क्रियाप्रयोज्याभावप्रतियोगितावच्छेदकवत्त्वं प्रकृतिकर्मणो लक्षणं पर्यव-सितम् ।

(ग) प्राप्यं-क्रियाजन्यफलशालि । ग्रामं गच्छतीत्यादौ क्रिया-जन्यसंयोगाश्रयग्रामादिकं, घटं जानातीत्यादौ ज्ञानादेर्विषयो घटादिश्च ।

ननु क्रियाजन्यफलाश्रयत्वस्य कर्मतारूपत्वेन त्रिविधकर्मसाधारण्यात् प्रकृतिविकृतिकर्मणोरतिव्याप्तमिदं प्राप्यलक्षणम् । तण्डुलानोदनं पचतीत्यत्र पचधातोः नाशः, उत्पत्तिश्चेति फलद्वयावच्छिन्नव्यापारोऽर्थः । 'द्व्यर्थः पचिः' इति महाभाष्योक्तेः । निवृत्तभेदाया एव क्रियायाः धात्वर्थतास्वीकारात् न व्यापारद्वयार्थकत्वं पचेरिति भाष्याशयः । क्रियाजन्यस्य नाशरूपफलस्य प्रतियोगितासंबन्धेनाश्रयः तण्डुलः, उत्पत्तिरूपफलाश्रयः ओदनः इति तण्डुलौदनयोरुभयोरपि कर्मत्वम् । कर्मत्वस्य फलरूपत्वात् द्वितीयाविभक्तेः कर्मप्रत्ययस्य फलार्थकता । तण्डुलपदोत्तरद्वितीयायाः जनकतासंबन्धेन क्रियान्वयिनाशार्थकत्वे, ओदनपदोत्तरद्वितीयायाः जनकतासंबन्धेन क्रियान्वय्युत्पत्त्यर्थकत्वे च, जनकतासंबन्धस्य वृत्त्यनियामकत्वेनाभावप्रतियोगितानबवच्छेदकत्वात् नञ्समभिव्याहारस्थले तत्संबन्धावच्छिन्नप्रतियोगिताकनाशाद्यभावबोधनं क्रियायां न संभवतीति, आश्रयतासंबन्धेन (वृत्तिनियामकेन) क्रियान्वयिनो नाशजनकत्वस्य प्रकृतिकर्मोत्तरद्वितीयार्थता, उत्पादकत्वस्य विकृतिकर्मोत्तरद्वितीयार्थता च स्वीक्रियते । तथाच प्राप्यकर्मलक्षणं प्रकृतिविकृतिकर्मणोरतिव्याप्तमिति चेन्न ।

पूर्वभावविशिष्टाभावभिन्नत्वे सति उत्पत्तिभेदविशिष्टस्य क्रियाजन्यफलस्याश्रयत्वमेव प्राप्यकर्मणो लक्षणमिति विवक्षणेनोक्तातिप्रसङ्गविरहात् । वाक्यपदीयोक्तस्यापि प्राप्यकर्मलक्षणस्यात्रैव पर्यवसानम् ।

'क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ॥'

इति वाक्यपदीयम् ।

अत्रोक्तस्य यथाश्रुतलक्षणस्य ग्रामादावव्याप्तिः, गमनक्रियाजन्यफलस्य संयोगस्य विशेषस्य प्रत्यक्षेण गम्यमानत्वात् । अतः

प्रकृतिकर्मगतः पूर्वभावविशिष्टाभावरूपो विशेषः, विकृतिकर्मगतः उत्पत्तिरूपो विशेषश्च कारिकायां विशेषपदेन विवक्षितः इति वक्तव्यम् । तादृशविशेषे दर्शनानुमानादिप्रमाणासिद्धत्वकथनस्य तादृशविशेषाभावस्य लक्षणत्वे तात्पर्यम्, तस्यैव लघुत्वात् । कर्मसामान्यलक्षणाक्रान्तत्वात्, क्रियाजन्यफलशालित्वे सति निरुक्तविशेषाभाववत्त्वमिति फलितम् । तदपेक्षयाऽपि क्रियाजन्यफले निरुक्तविशेषभिन्नत्वस्य निवेशनमेव लघुभूतमिति, तत्रैव कारिकातात्पर्यं युज्यते । तस्मात् वाक्यपदीयोक्तं प्राप्यकर्मलक्षणं भट्टाचार्योक्ते एव पर्यवस्यतीति बोध्यम् ।

क्रियाकृतविशेषाणामित्यत्र क्रियाकृतविशेषाः उत्पत्ति - क्षयोपचयादयो भावविकारा एव गणनीयाः इति **पदवाक्यरत्नाकरकाराः** । घटं जानातीत्यादौ आवरणभङ्गानुकूलव्यापारो धात्वर्थः । क्रियाजन्यावरणभङ्गरूपफलाश्रयत्वात् घटादेः कर्मत्वमिति प्राचीनाः शाब्दिकाः। ज्ञानानुकूलव्यापारो धात्वर्थः । ज्ञानस्य फलस्य फलतावच्छेदकविषयतासंबन्धेनाश्रयत्वात् घटादेः कर्मतेति नव्यशाब्दिकाः । नैयायिकास्तु, घटं जानातीत्यादेर्वाक्यात् घटविषयकज्ञानस्यैव शाब्दानुभवात् केवलं ज्ञानमेव धात्वर्थः इति वदन्ति । तन्मते क्रियाजन्यफलस्य घटादावभावात् ज्ञानविषयत्वमेव कर्मत्वं भाक्तम् । अत एव जानात्यादेः फलावच्छिन्नव्यापारवाचकत्वाभावात् भाक्तः सकर्मकत्वव्यवहारः इति **आख्यातवादे शिरोमणिभट्टाचार्याः** निरूपयन्ति । ननु 'कर्मणि द्वितीया' (पा-सू-2-3-2) इति शास्त्रं मुख्ये कर्मणि चरितार्थम् । गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः इति न्यायात् । ततश्च गौणे कर्मणि ज्ञानविषयघटादौ तस्याप्रवृत्तेः घटादिपदोत्तरं द्वितीया न स्यात् । न हि तीरे गङ्गापदस्य भाक्तत्वेऽपि तेन तीरेण स्नानपानादिकं कर्तुं शक्यते इति चेन्न ।

भाक्तराजपदव्यवहार्येण पुरोहितादिना राजकार्यप्रवर्तनस्य दृष्टत्वात् । विशिष्यार्थोपस्थापकविशिष्टरूपोपादानपुरस्सरपदकार्यविषये एव गौणमुख्यन्यायप्रवृत्तिरिति वैयाकरणैरेव व्यवस्थापितत्वेन तन्न्यायस्यात्राप्रवृत्त्या द्वितीयाया उपपत्तेः । न च न विभक्तौ लक्षणा इति प्राचीननैयायिकोक्तिविरोधः शङ्कनीयः । विनाऽनुशासनमेकविभक्तेः अपरविभक्त्यर्थे न लक्षणा इत्येवंपरतायाः प्राचीनोक्तेः वर्णितत्वात् ।

वस्तुतस्तु, आधेयतात्वादेरिव विषयतात्वादेरपि अखण्डतया विषयतात्वावच्छिन्नेऽपि शक्तिरेव द्वितीयाया इति भट्टाचार्यैरभिहितं बोध्यम् । न च—

'सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम् ।
प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा ।।'

इति भाष्यवार्त्तिकात् कर्मण्येव द्वितीया इति नियमस्वीकारात् विषयत्वार्थकता न द्वितीयायाः संभवतीति वाच्यम् । तत्रापि कर्मपदस्य गौणमुख्यसाधारणकर्मपरत्वेनाविरोधात् ।

न्यायनिबन्धे पदवाक्यरत्नाकरे, 'नियमः प्रकृतेषु वा' इति भाष्यवार्त्तिके वाकारस्यानादरार्थकतया, कर्मण्येव द्वितीया इति नियमस्यानादरणीयतां,

'विभक्तिः प्रकृतेष्वेवेत्येवं नियमवादिनि ।
चतुर्थे चरणेऽनास्थां वाकारेणाह वार्त्तिकम् ।।' (प.र.)

इति स्वीयकारिकया प्रतिपादितेति बोध्यम् ।

रामरुद्रभट्टाचार्यास्तु, घटं जानातीत्यादौ क्रियाजन्यफलानाश्रयस्यापि घटादेः 'अकथितं च' (पा-सू-1-4-51) इति सूत्रेण कर्मसंज्ञा विधी-

यते इति वदन्ति । तदुक्तं व्युत्पत्तिवादस्य द्वितीयाविभक्त्यर्थविचारे गां दोग्धि पयः इति वाक्यार्थनिरूपणावसरे **रामरुद्रीये**—

"तथापि साक्षात् धात्वर्थतावच्छेदकफलभिन्न धातुप्रतिपाद्यान्वयिधर्मावच्छिन्नमपादानत्वादिभिरविवक्षितं कर्म इत्यर्थकतया तत्सूत्रस्य (अकथितं चेति सूत्रस्य) तेषां कर्मत्वोपपत्तिरिति ध्येयम् ॥" इति । अयं पक्षः **पदवाक्यरत्नाकरे** 'अकथितं चेति सूत्रेण विषये कर्मसंज्ञा ज्ञाप्यते ।.........इत्यपरे ।' इति सन्दर्भेण प्रदर्शितः ।

परंतु, परिगणितानां द्विकर्मकधातूनां योगे प्रधानकर्मव्यतिरिक्तस्य अपादानत्वादिभिरविवक्षितस्य कर्मसंज्ञां शास्ति इदं सूत्रमिति शाब्दिकमर्यादाऽनुसन्धेया ।

किंचान्यत्, गां पयो दोग्धि इत्यत्र पयः प्रधानकर्म । गोः अपादानत्वाविवक्षायां, गोपदात् द्वितीयोपपत्तये 'अकथितं च' (1-4-51) इति सूत्रेण कर्मसंज्ञा विधीयते । 'अप्रधाने दुहादीनां प्रधाने नीहृकृष्वहाम्' इत्यनुशासनात् दुहादिधातूत्तरकर्माख्यातेन अप्रधानकर्माभिधीयते । अतः गौर्दुह्यते क्षीरम् इति प्रथमान्तगोपदघटितं वाक्यं साधु इति शाब्दिका वदन्ति । नैयायिकाः **गदाधरभट्टाचार्या** अपि तथैव निरूपयन्ति ।

जगदीशभट्टाचार्यास्तु, दुहधातोः मोचनानुकूलव्यापारोऽर्थः । मोचनं गोनिष्ठव्यापारः । तदनुकूलव्यापारः दोग्धृगोपनिष्ठः । तथाच साक्षात् धात्वर्थतावच्छेदक-मोचनव्यापाररूप-फलाश्रयत्वात् गोः प्रधानकर्मता 'कर्तुरीप्सिततमं कर्म' (1-4-46) इति सूत्रेणैव सिद्धा । पयसः कर्मतासिद्धये 'अकथितं च' (1-4-51) इति सूत्रं प्रवर्तते ।

सर्वत्र (दुहादियोगेऽपि) कर्माख्यातेन प्रधानकर्मतैव बोध्यते। गोः प्रधानकर्मतया तत्कर्मत्वस्याभिहितत्वात् गौर्दुह्यते क्षीरम् इति प्रथमान्त-गोपदघटितं वाक्यं साधु भवति इति विलक्षणप्रक्रियां निरूपयन्ति। तदुक्तं **शब्दशक्तिप्रकाशिकायां—**

'गां पयो दोग्धि गोपः इत्यत्र दुहेः मोचनानुकूलव्यापारोऽर्थः।...,
पयःकर्मताकं यत् गोवृत्तिमोचनं तदनुकूलव्यापारवानिति बोधः।

'अत एव परम्परया दुहधात्वर्थतावच्छेदकीभूतबहिःक्षरणशालित्वेन पयःप्रभृतेः तत्कर्मत्वसंपत्त्यर्थं अकथितं चेति सूत्रान्तरप्रणयनमपि पाणिनेः संगच्छते।' 'दुहादेर्गौणकं कर्म नीवहादेः प्रधानकम्।' इत्युक्तिभेदेन विधिद्वयं शाब्दिकानामनादेयम्।' इति च।

नैयायिकमते घटादेः मुख्यं ज्ञानकर्मत्वं नास्तीत्याशयेन भट्टाचार्यैः प्राप्यकर्मनिरूपणावसरे 'ज्ञानादेर्विषयश्च' इति पृथगभिहितम्। पदवाक्यरत्नाकरकारास्तु, विषयता ज्ञानं च धात्वर्थः, विषयतात्मक-फलाश्रयत्वात् घटादेः कर्मत्वमिति वदन्ति। हरिवल्लभाः न्यायमतनि-रूपणावसरे विषयतानिर्वाहकं ज्ञानं ज्ञाधात्वर्थः इति अनुवदन्तः पक्षमिमं रोचयन्ते इति प्रतिभाति।

एवं, उपात्तविषयं, निर्दिष्टविषयं, अपेक्षितक्रियमित्येवं त्रिविधेषु अपादानेषु, कुतो भवान्? पाटलिपुत्रात् इत्युदाहरणं प्रदर्शयन्ति शाब्दिकाः। माथुराः स्रौघ्नेभ्यः आढ्यतराः इत्युदाहरणमभिहितं व्युत्पत्तिवादे। सिद्धान्तकौमुदीकाराः पञ्चमी विभक्ते (2-3-42) इति सूत्रेण तत्र पञ्चमीति तामुपपदविभक्तिं ब्रुवन्ति।

एवं, 'सप्तम्यधिकरणे च' (2-3-36) इत्यत्र चकारात् दूरान्तिकार्थेभ्यः सप्तमी । अतः दूरं, दूरे इत्यादि सिद्धयतीति शाब्दिकाः ।

चकारात् अकारकाधारवाचिनोऽपि सप्तमी भवति । अत एव भूतले घटः इत्यादौ अस्तीतिक्रियाया अध्याहाराभावेऽपि सप्तमी साधुः । साध्यवद्भिन्नसाध्याभाववदवृत्तित्वमित्यत्र साध्यवद्भिन्ने साध्याभावः इति दीधितिकाराणां सप्तमीसमासेन व्याख्यानमपि संगच्छते । क्रियान्वयाय वर्तते इति क्रियाध्याहारे सामर्थ्याभावेन समासस्यासाधुतापत्तेः इति भट्टाचार्याः व्युत्पत्तिवादे प्रतिपादयन्ति । एवं, धूमादग्निमानित्यादौ, 'विभाषा गुणेऽस्त्रियाम्' (2-3-25) इति सूत्रे विभाषा इति योगविभागाश्रयणेन पञ्चमीं निर्वहन्ति शाब्दिकाः । स्वकार्य-ज्ञाप्यान्यतराश्रयाश्रितत्वं गुणत्वमिति परिष्काराश्रयणेन धूमादीनां गुणत्वात्, विनैव योगविभागं तेन सूत्रेण पञ्चमीमुपपादयन्ति नैयायिकाः ।

इत्थमन्येऽपि शाब्दिकप्रक्रियाभेदाः न्यायनिबन्धेषु प्रदर्शिताः सुधीभिः बोध्याः इति शिवम् ।

इति न्यायनिबन्धेषु शाब्दिकप्रक्रियाभेदनिरूपणं नाम

चतुर्थं प्रसूनं समाप्तम् ।

—:o:—

न्याय-वैशेषिकग्रन्थाभिहितानां अद्वैतवाददूषणानां समालोचनम् ।

पञ्चमं प्रसूनं

यद्वक्त्रमानससरः प्रतिलब्धजन्म भाष्यारविन्दमकरन्दरसं पिबन्ति ।
प्रत्याशमुन्मुखविनीतविनेयभृङ्गाः तान् भाष्यवित्तकगुरून्
प्रणतोऽस्मि मूर्ध्ना ।।

न्यायदर्शने वैशेषिकदर्शने च प्रतिपादितं ब्रह्माद्वैतवाददूषणं श्रीमच्छंकरभगवत्पादाभिमतसरण्या यथामति समालोचयितुमारभे । यद्यत्र स्यात् गुणलेशः तदा तदनुमोदनेन जनोऽयमनुग्राह्यः इति गुणग्राहिणोऽन्तर्वाणिकुलाग्रेसरान् अभ्यर्थये ।

I न्यायदर्शने चतुर्थाध्याये प्रथमाह्निके 'संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम्' (4-1-41) इति सूत्रमस्ति । "यदि तावदद्वैतसिद्धौ प्रमाणमस्ति, तर्हि तदेव द्वितीयमिति नाद्वैतम् । अथ नास्ति प्रमाणम्, तथापि नतरामद्वैतमप्रामाणिकायाः सिद्धेरभावात् ।" इति तत्सूत्रार्थं वर्णयन्ति श्रीजयन्तभट्टाः **न्यायमञ्जर्याम्** ।

अत्रेदमालोचनीयम् — अद्वैतसिद्धौ उपनिषदेव प्रमाणमित्यौपनिषदाः संगिरन्ते । न च तेन प्रमाणेन सद्वितीयत्वं ब्रह्मण आपतति । ब्रह्मैवैकं परमार्थसत्यम् । उपनिषच्च न परमार्थसत्या । 'वेदाः अवेदाः'

(बृ.) इति श्रुत्यैव तस्या निराकृतत्वात् । अपि तु ब्रह्मज्ञानातिरिक्ताबाध्यत्वात् व्यावहारिकसत्या अनिर्वचनीया । ब्रह्मभिन्नस्य प्रमाणस्य पारमार्थिकत्वाभावान्नाद्वैतक्षतिः। पारमार्थिकद्वितीयशून्यत्वस्यैवाद्वैतवादतात्पर्यविषयत्वात् । अबाधितार्थबोधकत्वेनासतोऽपि वेदस्य प्रमाणत्वसंभवात् ।

न चासत्यादनिर्वचनीयाद्वेदात् कथं परमार्थसत्याद्वैतब्रह्मसिद्धिरिति शङ्कनीयम् । पररीत्या परमार्थसत्यस्यापि अत्र रजतमित्यनाप्तोक्तवाक्यस्य रजतरूपार्थासाधकत्वेन सत्यत्वस्य अर्थसाधकत्वाप्रयोजकत्वेन, असत्यादपि वेदात् सत्यार्थसिद्धिसंभवात् । न चासत्यादपि तात्विकार्थसिद्धिस्वीकारे, आरोपितेन धूमेन तात्विको वह्निः सिद्ध्येदिति वाच्यम् । साधकतावच्छेदकरूपवत्त्वमेव साधकतायां प्रयोजकम् । न त्वारोपितत्वमनारोपितत्वं वा । धूमाभासे आरोपितधूमे तु साधकतावच्छेदकव्याप्तेरभावान्न साधकत्वं, न त्वसत्त्वात् । सत्यत्वाविशेषेऽपि यथा चक्षुषा रूपमेव ज्ञाप्यते, न रसः, एवमसत्त्वाविशेषेऽपि, स्वाप्नाङ्गनया सत्या कर्मसमृद्धिः, प्रतिबिम्बेन तात्विकं बिम्बं, सवितृसुषिरेण तात्विकं मरणं, रेखातादात्म्येनारोपितैर्वर्णैः तात्विकार्थश्च सिद्ध्यन्ति । धूमाभासादिना न तात्विको वह्निः सिद्ध्यति । इत्थं च तात्विकबिम्बानुमितिकरणस्य प्रतिबिम्बस्यासत्वमिव, परमार्थाद्वैतब्रह्मप्रतिपादकस्यापि वेदस्य परमार्थभिन्नत्वमुपपद्यते । न च स्वाप्नाङ्गनादिज्ञानमेव सत्यायाः कर्मसमृद्धेः ज्ञापकम् । एवं प्रतिबिम्बसवितृसुषिरादीनां ज्ञानमेव तात्विकतत्तदर्थबुद्धिजनकम् । ज्ञानं च स्वरूपतः सदेवेति नासतः तात्विकार्थसिद्धिकारणत्वं संप्रतिपन्नमिति वाच्यम् । स्वाप्नाङ्गनादिज्ञानस्य केवलज्ञानत्वेत न कर्मसमृद्ध्यादिज्ञानजनकत्वमतिप्रसङ्गात् । परंतु स्वाप्नाङ्गनावच्छिन्नज्ञानत्वेनैव ।

कारणतावच्छेदकीभूत - मिथ्याभूत - स्वाप्नाङ्गनावच्छिन्नत्वरूपेण च मिथ्याभूतस्य ज्ञानस्य स्वरूपेण सत्वमसत्वपर्यवसितमेव, अनुपयोगात् । वस्तुतस्तु भ्रमज्ञानस्याविद्यावृत्तिरूपत्वेन भ्रमविषयपदार्थसमसत्ताकत्वमेवेति भ्रमज्ञानं स्वरूपतोऽपि मिथ्यैव । तदुक्तम्— 'स्वरूपतो बाधाभावे विषयतोऽप्यबाधप्रसङ्गात्' इति । एवं चासतां स्वाप्नाङ्गनाज्ञानादीनां तात्विकार्थसिद्धिकारणत्वं संप्रतिपन्नमेवेति बोध्यम् ।

एतेन—

"सर्वत्रोपायस्य स्वरूपेण सत्वात्, असतः खपुष्पादेरुपायत्वाभावात् । रेखागकारादीनां तु वर्णरूपतया सत्वं यद्यपि नास्ति, तथापि स्वरूपतो विद्यत एव । ननु गकारोऽयमिति गृह्यमाणः सः रेखासंनिवेशः अर्थप्रत्यायको भवति । न चासौ तेन रूपेणास्ति । मैवं, स्वरूपसतोऽर्थस्य रूपान्तरेणापि गृह्यमाणस्य कूटकार्षापणादेरिव व्यवहारहेतुता दृश्यते च युक्ता च । यस्तु स्वरूपत एव नास्ति, तस्य स्वात्मना परात्मना वा व्यवहाराङ्गता समस्ति । रेखासंनिवेशश्च स्वरूपेण सन्निति वर्णात्मत्वेनासन्नपि तत्कार्याय पर्याप्नुयात् । न त्वयमविद्यायां न्यायः, स्वरूपासत्त्वात्तस्याः । एवं वनगुहाकुहरादेष निःसृतः केसरी सरोषमित एवाभिवर्तते इत्यसत्येऽप्युक्ते, यत् भीरूणां पलायनादि सत्यं कार्यमुपलभ्यते, तत्र सिंहज्ञानस्य तत्कार्यत्वात् तस्य च स्वरूपसत्वात् नासत एवोपायत्वम् ।" इति ग्रन्थेन अविद्या विद्योपायः इत्यस्य दूषणाभिधानं **न्यायमञ्जरीकाराणां** परास्तं वेदितव्यम् ।

अर्थप्रतीतिजनकतावच्छेदकवर्णात्मकत्वेन मिथ्याभूतस्य रेखासंनिवेशस्य, भयजनकतावच्छेदकीभूतसिंहावच्छिन्नत्वरूपेण मिथ्याभूतस्य सिंहज्ञानस्य च स्वरूपेण सत्वमसत्वान्नातिरिच्यते, अनुपयोगात् ।

तदुक्तं खण्डनकृद्भिः "अन्यदा सत्वं तु पाटच्चरलुण्ठितवेश्मनि यामिकजागरणवृत्तान्तमनुसरति'। इति। किंचान्यत्, अविद्याया आविद्यकस्य च नाद्वैतिभिः शशविषाणवत् निस्स्वरूपत्वरूपमसत्वमभ्युपगम्यते। परंतु ख्यातिबाधान्यथानुपपत्त्या सदसद्विलक्षणस्वरूपत्वम्। इत्थं च निस्स्वरूपत्वमसत्वमविद्यादीनामद्वैत्यभिमतं कृत्वा, असतः खपुष्पादेरुपायत्वाभावात् इत्यादिदूषणाभिधानमद्वैतसिद्धान्तरहस्यानालोचननिबन्धनमिति सुधीभिर्विभावनीयम् ॥

II न्यायदर्शने, चतुर्थाध्याये ईश्वरोपादानताप्रकरणे, 'ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्' इति सूत्रेण, ब्रह्मैकं परमार्थसत्यं द्वैतप्रपञ्चस्तु ब्रह्मणो विवर्तः इति वादः उपक्षिप्तः इति व्याख्याय,

"न च निर्भागस्यैकस्य स्वसंवेदनप्रत्यक्षस्य विपरीतज्ञानगोचरत्वसंभवः। सामान्यतो ग्रहे रूपविशेषाग्रहे च तदन्यरूपारोपेण विभ्रमो दृष्टः शुक्तिकादौ। न तु शुक्तिरूपं विद्वान् रजतमिदमिति विपर्यस्यति। न च निरंशे स्वसंवेदनप्रत्यक्षे ब्रह्मणि तत्स्वरूपाग्रहः सामान्यग्रहो वा भवति। तस्मादीश्वरो जगद्भेदेन विवर्तते इत्ययुक्तम्।" इति ग्रन्थेन तं वादं निराकुर्वन्ति तत्सूत्रव्याख्यातारः। सामान्यतो ज्ञातत्वे सति अज्ञातविशेषवत्त्वमधिष्ठानत्वे प्रयोजकं, निर्धर्मके च ब्रह्मणि अज्ञातविशेषवत्त्वस्यासंभवात् स्वयंप्रकाशत्वेन स्वरूपतिरोधानाभावाच्च न निर्धर्मकब्रह्माधिष्ठानको भ्रमः संभवतीति दूषणसारार्थः।

अत्रेदमालोचनीयम्। तद्धर्मिणि अज्ञातविशेषवत्त्वमपेक्ष्य लाघवात् विशेषरूपेणाज्ञातत्वमेव अधिष्ठानत्वे प्रयोजकम्। सद्रूपेण ज्ञाते पूर्णानन्दरूपेणाज्ञाते च ब्रह्मणि, सामान्यरूपेण ज्ञातत्वे सति

विशेषरूपेणाज्ञातत्वमधिष्ठानत्वप्रयोजकमस्त्येव । यद्यपि सद्रूपं पूर्णानन्दरूपं चैकमेव । तथापि पूर्णानन्दो मे न भाति, सद्रूपमस्ति भाति इति व्यवहारात् तयोराविद्यक: अनादिभेद: स्वीक्रियते । सद्रूपानन्दरूपयो: न्यूनाधिकदेशवृत्तित्वरूपस्य सामान्यविशेषभावस्याभावेऽपि भ्रमे भासमानत्व - अभासमानत्वरूप: सोऽस्त्येव । अवश्यं च भ्रमे भासमानत्वमेव सामान्यत्वं वक्तव्यम् । एकमात्रवृत्तिधर्मविशिष्टेऽपि धर्मिणि आरोपदर्शनात् । सदात्मना प्रकाशमानस्यापि पूर्णानन्दरूपेणाप्रतिभानादधिष्ठानतिरोधानमपि वर्तते । तदुक्तं

वार्त्तिककारै:—

'यत्प्रसादादविद्यादि सिद्ध्यतीह दिवानिशम् ।
तमप्यपह्नुतेऽविद्या नाज्ञानस्यास्ति दुष्करम् ।।' इति ।

तस्मात् ब्रह्माधिष्ठानक: प्रपञ्चभ्रमो युज्यते एवेति ।

III 'व्यवस्थातो नानात्मान:' इति **वैशेषिकसूत्रे** अद्वैतिसंमत: ऐकात्म्यवाद: व्यवस्थया निराकृत: । **किरणावल्यामाचार्यै:** इत्थं व्यवस्थोपपादिता । लोके कश्चित् सुखी, कश्चित् दु:खीति व्यवस्था दृश्यते । एकस्मिन्नेवात्मनि न विरुद्धे सुखदु:खे संभवत: । अत: आत्मान: नाना । न चैकस्मिन्नेवात्मनि पादे मे सुखं शिरसि मे वेदना इत्यनुभवेन पादाद्यवयवभेदेन सुखदु:खयोरिव, देवदत्तयज्ञदत्तादिशरीरभेदात् सुखदु:खे स्यातामिति वाच्यम् । तथाप्यात्मैकत्वे, योऽहं देवदत्त: सुखी, सोऽहं यज्ञदत्त: दु:खी इति प्रतिसन्धानं स्यात् । न च जन्मान्तरीयसुखादेरिदानीमनुसन्धानाभाव इव शरीरभेदात् निरुक्तानुसन्धानाभाव इति वाच्यम् । संस्कारविच्छेदेन जन्मान्तरीयसुखाद्यननुसन्धानात् ।

तथाऽत्र संस्कारविच्छेदस्य वक्तुमशक्यत्वात् । एवं, आत्मैकत्वे कश्चिदीश्वरः, कश्चिदनीश्वरः इति व्यवस्था न स्यात् । किंच, वयं बद्धाः शुकादयो मुक्ताः इति व्यवस्था नोपपद्यते । बन्धमोक्षयोरेकस्मिन्नसंभवात् । शुकस्य मुक्तत्वे तदतिरिक्तस्यात्मनोऽभावात् कोऽन्यः संसरेत् । एतावता न कोऽप्यपवृक्त इति चेत् । इतः परमपि न कोऽप्यपवर्गं प्राप्नुयात् । न ह्यनादौ संसारे यन्न वृत्तं तत् वर्त्स्यतीति संभवति ।

अनेकात्मत्वे, 'एक एव हि भूतात्मा भूते भूते व्यवस्थितः' इति श्रुतिविरोधो नास्ति । मुमुक्षुणा सर्वं विहाय स्वात्मप्रतिष्ठेन भवितव्यम्, न चैक एवात्मा इति श्रुतितात्पर्यादिति ।

अत्रेदमालोचनीयम् । सुखदुःखसाक्षात्काररूपो भोगः न केवलस्यात्मनः, किंतु देहेन्द्रियादिविशिष्टस्यैव । 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ।' इति श्रुतेः । देवदत्तयज्ञदत्तादिशरीरेन्द्रियादिविशिष्टानां च नानात्वात् व्यवस्थोपपद्यते । न चैतावता अद्वैतहानिः । परमार्थसत्यस्य शुद्धात्मनः एकत्वात्, विशिष्टानां च तेन रूपेणाध्यस्तत्वात् ।

अथवा, आत्मन एकत्वेऽपि उपाधिभेदादननुसन्धानमुपपद्यते । न च हस्तपादाद्युपाधिभेदेऽपि अनुसन्धानदर्शनात् उपाधिभेदः नाननुसन्धानप्रयोजकः । शरीरात्मकोपाधिभेदः तत्प्रयोजकः इति न वक्तुं शक्यम् । उपचयापचयाभ्यां बालयुवशरीरयोर्भेदात् बाल्यानुभूतस्य यौवने प्रतिसन्धानाभावप्रसङ्गात् । एवं जातिस्मरस्यापि जन्मान्तरानुभूतानुसन्धानं न स्यात् शरीरभेदादिति वाच्यम् । जीव-

विभाजकान्तः करणरूपोपाधिभेद एवाननुसन्धानप्रयोजकः । बाल-युवशरीरभेदेऽपि, जन्मभेदेन शरीरभेदेऽपि चान्तःकरणमेकमेवेति, बाल्यानुभूतस्य यौवने, जन्मान्तरानुभूतस्य जातिस्मरेणेहजन्मनि चानु-सन्धानमुपपद्यते । उपक्रमोपसंहारैकरूप्यादितात्पर्यलिङ्गावगतैदंपर्यैः वेदान्तैः आत्मैक्यस्य सिद्धतया सर्वानुसन्धानापत्तेर्वारणाय जीवविभा-जकान्तःकरणभेदस्याननुसन्धानप्रयोजकत्वं कल्प्यते इति बोध्यम् ।

एतेन - 'मुमुक्षुणा सर्वं विहाय स्वात्मप्रतिष्ठेन भवितव्यम्, न चैक एवात्मेति श्रुतितात्पर्यम् ।'' इति **किरणावली** परास्ता । उपक्रमोपसं-हारैकरूप्याभ्यासोपपत्त्यर्थवादादिभिः अवधृताद्वैततात्पर्यकश्रुतेः ईदृशार्थ-वर्णनस्यासमञ्जसत्वात् ।

यत्तु **न्यायमञ्जर्याम्** ''यस्त्वागमः पठितः 'एकमेवाद्वितीयम्, नेह नानास्ति किञ्चन' इत्यादिः, तस्यार्थवादत्वात् न यथाश्रुत एवार्थो गृहीतव्यः । .... प्रत्यक्षविरुद्धार्थाभिधायिनामर्थवादानां मुख्यां वृत्तिमपहाय गौण्यापि वृत्त्या व्याख्यानमाश्रितम् । एवमिदमपि वचनमितरप्रमाणविरुद्धमर्थमभिदधत् अपरथा व्याख्यायते । .... तस्मात् सुखदुःखाद्यवस्थाभेदेऽपि नावस्थातुरात्मनो भेदः । देहेन्द्रियादि-नानात्वेन वा न तस्य नानात्वमित्येवं यथाकथंचिदयमर्थवादो योजनीयः । अभेदोपदेशी तु तत्परः शब्दः विधिरूप इह नास्त्येव ।'' इत्यभिहितम् । तदपि न सामञ्जस्यमश्नुते ।

यजमानः प्रस्तरः इत्यादिवाक्यानां उत्तरं बर्हिषः प्रस्तरं सादयति इत्यादिसंनिहितविधिवाक्यशेषत्वमिव, एकमेवाद्वितीयमित्यादिकस्य श्रुति-वाक्यनिकुरुम्बस्य न संनिहितविधिवाक्यशेषत्वं लक्ष्यते । हठात्

कर्मकाण्डस्थयागादिविधिशेषत्वं तदपेक्षितकर्तृस्तावकत्वेन कल्पयितुमशक्यम् । अद्वैतवाक्यैरैदम्पर्येण बोधितस्याकर्तुरेकस्यात्मनः कर्मविध्यननुकूलत्वात् । षड्विधलिङ्गावधृततात्पर्यवतां फलवदज्ञाताद्वैतात्मबोधकानां वाक्यानां समुपलम्भेऽपि 'अभेदोपदेशी तु तत्परः विधिरूपः इह नास्त्येव' इति वचनं साहसनिबन्धनमेव । फलवदज्ञातार्थज्ञापकं वाक्यं विधिरिति व्यपदिशन्ति । एवंच, तात्पर्येण स्वप्राधान्येनानन्यशेषमर्थं बोधयदद्वैतवाक्यं मुख्यार्थकमेव । यजमानः प्रस्तरः इत्यादिवाक्यं तु विधिवाक्यशेषं सत् गौण्या वृत्त्याऽर्थं बोधयदमुख्यार्थं भवति । तदुक्तमाचार्यवाचस्पतिमिश्रैः 'प्रस्तरादिवाक्यमन्यशेषत्वादमुख्यार्थम्, अद्वैतवाक्यं तु अनन्यशेषत्वान्मुख्यार्थम् ।' इति ।

एतेन—"अद्वैतश्रुतेश्च द्वैतावभासिप्रत्यक्षविरोधेन ग्रावप्लवनश्रुतिवदुपचरितार्थत्वात् । अध्यक्षमविद्यात्वेन न तस्या बाधकमिति चेत्। तुल्यं प्लवनेऽपि । किंचास्याविद्यात्वं, अद्वैतानुभवविरोधित्वमिति चेत् न । द्वैतानुभवविरोधित्वेन तस्यैव किं नाविद्यात्वम् । अयत्नसिद्धत्वमिति चेत्, न । यत्नसिद्धस्यापि शोकातुरतनयसाक्षात्कारस्याविद्यात्वात् । अयत्नसिद्धस्य च तनयाभावसाक्षात्कारस्य विद्यात्वदर्शनात् । विचारासहत्वमविद्यात्वमिति चेत्, न । अनुभवेन विरोधिना विचारस्यैव कृशानोरनुष्णत्वानुमानवदाभासीकृतत्वात् ।" इति न्यायलीलावत्यां वल्लभाचार्याणां वचनभङ्ग्यपि निराकृता बोध्या ।

द्वैतप्रत्यक्षं नाद्वैतश्रुतिबाधकं भवितुमर्हति । निश्चितप्रामाण्यकमेव प्रत्यक्षमितरबाधकं भवेत् । न च द्वैतप्रत्यक्षे प्रामाण्यं निश्चितम् । इदं रजतमिति प्रत्यक्षं नेदं रजतमित्याप्तवचनेन, नभोनैल्यप्रत्यक्षं

नीरूपत्वग्राहकानुमानेन, चन्द्रः प्रादेशिकः इति प्रत्यक्षं अनेकयोजनविस्तीर्णत्वबोधकागमेन च बाध्यमानं दृश्यते। द्वैतप्रत्यक्षस्यापि अद्वैतागमविरोधः द्वैतासत्यत्वबोधकानुमानविरोधश्चास्ति। अतो न द्वैतप्रत्यक्षे प्रामाण्यं निश्चितम्। तस्मात् न द्वैतप्रत्यक्षमद्वैतश्रुतिबाधकं भवति। प्रत्यक्षसामान्यस्याविशेषेणागमादिबाधकत्वे, अहं मनुष्यः गौरः, इत्यादिकेन देहात्मैक्यप्रत्यक्षेण विरोधात् आगमेन देहातिरिक्तत्वमप्यात्मनो न सिद्ध्येत्। ग्रावाणः प्लवन्ते इति श्रुतिस्तु प्लवनाभावप्रत्यक्षबाधितैव। अर्थक्रियादिपरीक्षापरीक्षितस्य प्रत्यक्षस्य प्रबलत्वात् व्यवहारदशायामेव तद्विरुद्धार्थग्राहिकायाः श्रुतेर्बाध एव। द्वैतप्रत्यक्षस्य अर्थक्रियादिपरीक्षया व्यावहारिकं प्रामाण्यं सिद्ध्यति। तस्य नाद्वैतागमेन बाधः। परमार्थसत्यबोधकत्वलक्षणं प्रामाण्यं बाध्यते। तच्च न परीक्षासिद्धम्। ग्रावप्लवनश्रुतेः मुख्यार्थस्वीकारे तु प्रत्यक्षस्य परीक्षासिद्धं व्यावहारिकं प्रामाण्यं व्याहन्येत इति वेदान्तिनां सिद्धान्तः। प्रत्यक्षमविद्यात्वेन न बाधकमिति वदतामविद्यापदेन अनिश्चितप्रामाण्यकमेव विवक्षितं बोध्यम्। किंचेत्यादिना ग्रन्थेन वल्लभाचार्योक्तानां विधानां स्वकपोलकल्पितानां निराकरणं नावश्यकमिति विभावनीयम्।

यत्तु न्यायमञ्जर्यां, 'एकस्याकाशस्य घटपटाद्यवच्छेदकभेदेन भेदो वक्तुं शक्यः, उपाधेः सत्वात्। अविद्यायास्त्वसत्वान्नोपाधित्वम्।' इति दूषितम्।

तन्न युक्तम्। व्यावहारिकाविद्यायाः परमार्थसत्यभिन्नत्वेऽपि निस्स्वरूपत्वास्वीकारात् तदवच्छेदककृतः व्यावहारिक भेदः संभवत्येव।

व्यवस्थादीनां व्यावहारिकत्वेन तदुपयोगिनो जीवविभागस्यापि व्यावहारिकस्य तादृशोपाध्यधीनत्वसंगतेः, अकल्पितस्यैवोपाधित्वमित्यस्यासंप्रतिपत्तेश्च ।

एतेन - सतामेव वृक्षादीनामुच्छेददर्शनात् असतां शशविषाणादीनामुच्छेदादर्शनात् असत्यायाः तत्त्वाग्रहणरूपायाः अविद्यया उच्छेदो न संभवति । तत्वग्रहणाभावस्यापि अस्तितासमर्थनान्नासत्वम् ।' इति न्यायमञ्जरीकाराणां दूषणं नात्मानं लभते इति चिन्तनीयम् ।

सद्रूपतयोभयसंमतस्यात्मनः उच्छेदो न दृश्यते । उच्छिद्यमानवृक्षादीनां यादृशं सत्तादात्म्यरूपं सत्वं, तदविद्यायामप्यस्ति । न हि अविद्या शशविषाणवन्निस्स्वरूपा, अभावरूपा वेष्यते । अपितु सदसद्विलक्षणा भावरूपा दण्डायमाना । अज्ञानाग्रहणादिपदानां ज्ञानविरोधिभावरूपाज्ञाने शक्तिरिति वेदान्तसिद्धान्तः । अतः अविद्यायामलीकत्वकल्पनाधीनानि दूषणान्यनवकाशानीति बोध्यम् ।

एवं, जीवेश्वरभेदोऽप्याविद्यकः । माया-अज्ञानादिशब्दितायामविद्यायां स्थूलसूक्ष्मान्तःकरणावच्छिन्नायां चैतन्यं प्रतिबिम्बते । तत्र प्रतिबिम्बतं चैतन्यं जीवः । बिम्बभूतमविद्योपहितं चैतन्यमीश्वरः । अन्तःकरणभेदाज्जीवभेदः । दर्पणादिरुपाधिः स्वगतं मालिन्यं प्रतिबिम्बे एवासञ्जयति, न बिम्बे । न हि दर्पणमालिन्येन ग्रीवास्थं मुखं मलिनं भवति । अतश्चोपाधिभूताविद्याकृतो दोषः संसारित्वं प्रतिबिम्बजीवस्यैव, न बिम्बस्येश्वरस्येति, ईश्वरः असंसारी, जीवः संसारी इति व्यवस्थोपपद्यते । अविद्योपहितबिम्बचैतन्यमीश्वरः अन्तःकरणभेदभिन्नाः जीवाश्चानादयः । जीवेश्वरभेदोऽप्यनादिरनिर्वचनीयः व्यावहारिकः । शुद्धं चैतन्यमेकमेव परमार्थसत्यमिति नाद्वैतक्षतिः ॥

अथवा, अविद्याश्रयचैतन्यं जीवः । अविषयत्वोपहितं चैतन्यमीश्वरः । ब्रह्म नास्तीति व्यवहारः जीवाश्रितः । तादृशव्यवहारहेतुरप्यविद्या जीवमेवाश्रयते, कार्यकारणयोः सामानाधिकरण्यनियमात् । प्रतिजीवमविद्या भिन्ना । जीवविभाजकोपाधिभूताविद्याभेदेन जीवभेदः। ईश्वरचैतन्ये चाविद्याया अभावान्न तदधीनः संसारः इति जीवेश्वरयोः संसारित्वासंसारित्वे उपपद्येते ।

यत्तु, "अविद्याकृतो जीवपरमात्मनोर्भेद इति चेत् । कस्येयमविद्या, किं ब्रह्मणः, किमुत जीवानाम् । न तावत् ब्रह्मणोऽस्त्यविद्यायोगः, शुद्धबुद्धस्वभावत्वात् । जीवाश्रया अविद्येति चान्योन्याश्रयदोषपराहतम् । अविद्याकृतो जीवभेदः जीवाश्रया अविद्येति ।" इति **न्यायकन्दल्यामभिहितम्** ।

तत्रेदं वक्तव्यम् । किमयमन्योन्याश्रयः उत्पत्तौ, उत ज्ञप्तौ अथवा, स्थितावापाद्यते । नाद्यः, जीवाविद्ययोरुभयोरप्यनादित्वात् । न द्वितीयः। अविद्यायाः चिद्भास्यत्वेऽपि चितः अविद्याभास्यत्वाभावात् । न तृतीयः, तयोः परस्पराश्रितत्वाभावात् । अविद्याया जीवाश्रितत्वेऽपि जीवस्य शुद्धचिदाश्रितत्वेनाविद्याश्रितत्वाभावात् । समानकालिकयोः घटतदवच्छिन्नाकाशयोरिव उपाध्युपहितभावमात्रेणान्योन्याधीनतोपपद्यते इति ।।

एतेन, "बीजाङ्कुरवदनादिरविद्याजीवप्रभेद इति चेत्। बीजाङ्कुरव्यक्तिभेदवदविद्याजीवयोः पारमार्थिकत्वाभावादनुपपन्नम् । व्यक्तिभेदेन च बीजाङ्कुरयोरन्योन्यकारणता । जीवस्तु सर्वासु भवकोटिष्वेक एव । .... तत्राविद्याकृतो जीवभेदः, जीवभेदाच्चाविद्येत्यसंगतिः ।" इति **कन्दली** परास्ता । न हि वेदान्तिनः बीजादङ्कुरस्य अङ्कुराच्च

बीजस्येव अविद्यया जीवस्य, जीवाच्चाविद्यायाः संभवमभ्युपगच्छन्ति, उभयोरनादित्वस्वीकारात्। परन्तु अनादित्वादुत्पत्तावन्योन्याश्रयं दोषं प्रतिक्षिपन्ति। किंच पारमार्थिकत्वाभावादनुपपन्नमिति चासमञ्जसम्। पारमार्थिकत्वस्य तत्रातन्त्रत्वात्। तस्मात् स्वकल्पिताक्षेपदूषणमेवेदं श्रीधराचार्याणां, नाद्वैतवादिमतदूषणमिति मन्तव्यम्।

यच्चेतरेतराश्रयत्वं परिहर्तुमनादित्वमावेदितम् इत्यादिकं न्यायमञ्जरीवचनमपि अनयैव सरण्या पर्यालोचनीयम्।

जीवविभाजकाविद्यानां नानात्वात् यस्य जीवस्यात्मसाक्षात्कारो जातः, तेन तदीयाविद्यानिवृत्तौ तत्प्रयुक्तबन्धनिवृत्तिस्तस्य भवति। यस्त्वनुत्पन्नतत्त्वसाक्षात्कारः, तस्याविद्या न नष्टेति संसारित्वमुपपद्यते। अविद्या एकैवेति पक्षेऽपि तस्यां जीवभेदेन विभिन्नावरणशक्तयः सन्ति। यस्य ब्रह्मसाक्षात्कारो जातः, तस्य जीवस्य ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाशः। न त्वन्यजीवं प्रति आवरणशक्तिविशिष्टाविद्यानाशः। अन्यस्मिंश्च जीवे आवरणशक्तिविशिष्टाविद्याप्रयुक्तः संसारो वर्तते। यं प्रत्यावरणशक्तिविशिष्टाविद्यानाशः, तस्य तत्प्रयुक्तसंसारनिवृत्तेः मुक्तत्वमुपपद्यते।

येषां मते आत्मानो नाना विभवः, तेषां नैयायिकानां वैशेषिकाणां च मत एव सुखदुःखादिव्यवस्था निरूपयितुमशक्या। अदृष्टस्य सर्वात्मसंनिधावुत्पद्यमानस्य प्रतिनियतात्मसमवायस्य वक्तुमशक्यत्वेन, यदीयादृष्टजन्यं शरीरं, तत् तस्यैव भोगं जनयतीति व्यवस्थाया दुर्वचत्वात्। पराक्रान्तं चात्र पूर्वाचार्यैरंशाधिकरणे। तस्मात् व्यवस्था न पारमार्थिकात्मैक्यवादमपाकर्तुं प्रभवति। अद्वितीयः आत्मा निरुपाधिप्रेमविषयत्वेनानन्दरूपः। परमानन्दरूपाद्वितीयात्मसाक्षात्कारेण मोक्षः सिद्ध्यति॥

यत्तु, **न्यायलीलावत्यां** मुक्तिस्वरूपनिरूपणावसरे, "ननु चाद्वैततत्त्व-साक्षात्कारात् अविद्योपनीतप्रपञ्चप्रत्ययबाधे अद्वैतानन्दसाक्षात्कारो मुक्तिरिति मन्यन्ते। मैवं, मानाभावात्। श्रुतिस्तत्र मानमिति चेत्, न। बाधितत्वात्। ब्रह्मसंवेदनेऽपि प्रपञ्चप्रत्ययस्य सत्वात्। ब्रह्मसंवेदनमिदानीं नास्तीति चेत्। न। न हि ब्रह्म संवेदनान्तरवेद्यम्, नच ब्रह्मस्वरूपमिदानीं नास्ति। श्रुतिवाक्यजविशिष्टब्रह्मानुभवो नास्तीति चेत्। न, तस्याप्यनुभवस्य ब्रह्मस्वरूपानतिरेकात्। ब्रह्मणो भिन्नत्वेन कल्पितोऽनुभवो नास्तीति चेत्। न, कल्पितस्यासत्वेन कल्पनात्वेन वा अबाधकत्वात्।" इति ग्रन्थसन्दर्भेणाद्वैतमतमनूद्य दूषितम्।

तत्रेदं समालोचनीयम्। ब्रह्मणः स्वप्रकाशत्वेन ब्रह्मसंवेदनमपि ब्रह्मस्वरूपमेव। श्रुतिवाक्यजन्यानुभवोऽपि ब्रह्मरूपः। ब्रह्म चेदानीमप्यस्ति। प्रपञ्चप्रत्ययोऽपि वर्तते इति न तस्य संवेदनस्य प्रपञ्च-प्रत्ययबाधकत्वमिति **वल्लभाचार्या** मन्यन्ते। न हि अद्वैतिनः ब्रह्म-स्वरूपात्मकसाक्षात्कारः प्रपञ्चबाधकः मुक्तिहेतुरिति ब्रुवते। परंतु स्वयंप्रकाशस्य ब्रह्मणः प्रकाशायान्यानपेक्षणेऽपि पूर्णानन्दादिस्वरूपस्याविद्ययाऽऽवृतत्वात् आवरणभङ्गायान्तःकरणवृत्तिरूपसाक्षात्कारः इष्यते। तद्विषयत्वेऽपि न ब्रह्मणः स्वप्रकाशत्वं हीयते। तदुक्तम्—

> स्वयंप्रकाशमानत्वान्नाभासँ उपयुज्यते।
> ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्यत्वमिष्यते।
> फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतम्॥ इति।

अन्तःकरणवृत्तिरूपसाक्षात्कार एव मुक्तिसाधनम्। स चेदानीं नास्ति। अत एव **मुक्तिवादे** अद्वैतिसंमतमुक्तिस्वरूपनिरूपणावसरे, 'ब्रह्मस्वरूप-साक्षात्कारस्येदानीमपि सत्वात् मुक्त्यापत्तिः इति वेदान्तमतदूषणमयुक्तम्,

अन्तःकरणवृत्तिरूपसाक्षात्कारस्यैव तत्साधनत्वेन तैः स्वीकारात्' इति श्रीगदाधरभट्टाचार्या निरूपयन्ति । कल्पितत्वेनासत्वात् बाधकत्वं न स्यात् इत्यसंबद्धम् । अन्तःकरणवृत्तेरनिर्वचनीयायाः निस्स्वरूपत्वानङ्गीकारात् । परमार्थसत्यभिन्नस्यापि स्वाप्नगजाभावज्ञानस्य स्वाप्नगजप्रत्ययबाधकताया दृष्टत्वेन परमार्थभिन्नत्वस्याबाधकत्वाप्रयोजकत्वात्, स्वाप्नगजाभावज्ञानस्य स्वरूपतः सत्वेऽपि बाधकतावच्छेदककल्पितविषयविशेषावच्छिन्नत्वेन रूपेणासत्वात्, स्वरूपतो बाधाभावे विषयतो बाधासंभवेन तस्य स्वरूपतो बाधितत्वस्य पूर्वमावेदितत्वाच्चेति ।

यत्तु कन्दल्यां मोक्षनिरूपणावसरे, आनन्दात्मतयाऽवस्थानं मोक्षः इति वेदान्तिमतं, चितेरानन्दात्मकतायाः स्वाभाविकत्वे संसारावस्थायामपि तदनुभवापादनेन दूषयित्वा, तदुपरि अविद्याप्रतिबन्धादननुभवशङ्कामुत्थाप्य, प्रतिबन्धपदार्थविवेचनपूर्वकं "अविद्याप्रतिबन्धादननुभवः इति चेन्न । नित्यायाश्चितेः आनन्दानुग्रहस्वरूपायाः स्वरूपस्याप्रच्युतेः कः प्रतिबन्धार्थः? प्रच्युतौ वा स्वरूपस्य का नित्यता ? तस्मात् नित्य आनन्दः नित्यया चित्या चेत्यमानः द्वयोरप्यवस्थयोरविशेषेण चेत्येत । न चैवमस्ति । अतः नात्मनो नित्यं सुखम् ।" इति ग्रन्थेन दूषितम् ।

तत्रेदं वक्तव्यम् । यथा सूर्यः मेघेनावृत्तो न प्रकाशते । न च तदा स्वरूपात् प्रच्युतो भवति । मेघस्यावरणस्यापाये तु स्वयमेव प्रकाशते । एवमेव पूर्णानन्दस्वरूप आत्मा अविद्यावृतो न भाति । नास्ति, न भाति इति व्यवहारप्रयोजकत्वमेवाविद्याया आवारकत्वम् । अखण्डाकारवृत्त्या अविद्यावरणापाये तु स्फुरति । संसारदशायामावरणनाशाभावात् नानन्दानुभवः इति वेदान्तरहस्यानाकलनेन श्रीधराचार्यैः

अविद्याया आनन्दस्वरूपप्रच्यावकत्वरूपमनुभवप्रतिबन्धकत्वं अद्वैत्यभिमतं कृत्वा, स्वरूपप्रच्युतौ नित्यत्वं, अप्रच्युतौ चाविद्यायाः प्रतिबन्धकत्वमनुपपन्नमिति दूषितमिति ॥

यदपि **जयन्तभट्टैः न्यायमञ्जर्यां** अस्मिन्नेव प्रस्तावे, अविद्यावरणात् संसारदशायां स्वप्रकाशसुखानुपलम्भमुत्थाप्य, 'प्रकाशस्य तुच्छेनावरीतुमशक्यत्वात्' इति ग्रन्थेनाविद्यावरणत्वं दूषितम् । तदपि अविद्यायाः निस्स्वरूपत्वरूपतुच्छत्वानङ्गीकारेण पराहतं द्रष्टव्यम् ।

यदि तत्र तुच्छपदेन परमार्थसत्यभिन्नमेव विवक्षितमित्युच्यते । तदापि न दोषः । परमार्थभिन्नस्यापि कल्पिततमसः आवारकत्वदर्शनात् । मध्यन्दिने महाप्रकाशयुक्तस्थलात् सालोकमपवरकं प्रविष्टः पुरुषः अन्धकारमिव पश्यन् तत्र स्थितं वस्तुजातं न विजानाति । तत्र पुरुषेण कल्पितमेव तमः तत्रत्यवस्तुजातावारकं भवति । ततश्चावारकत्वे अकल्पितत्वमप्रयोजकमिति परमार्थसत्यभिन्नयाप्यविद्यया आत्मसुखमावरीतुं शक्यते एवेति सुधीभिर्विवेचनीयम् ॥

यदपि **तत्त्वचिन्तामणौ गङ्गेशोपाध्यायानां**, "एतेन ब्रह्माद्वैततत्वसाक्षात्कारादविद्यानिवृत्तौ विज्ञानसुखात्मकः केवल आत्मा अपवर्गे वर्तते इति वेदान्तमतमपास्तम् । स्वप्रकाशसुखात्मकब्रह्मणः नित्यत्वेन मुक्तसंसारिणोरविशेषप्रसङ्गात् । पुरुषप्रयत्नं विना तस्य सत्वादपुरुषार्थत्वाच्च । अविद्यानिवृत्तिः प्रयत्नसाध्येति चेत् । अविद्या यदि मिथ्याज्ञानमर्थान्तरं वा, उभयथापि सुख-दुःखाभाव-तत्साधनेतरत्वेन तन्निवृत्तेरपुरुषार्थत्वात् ।" इति दूषणम् ।

तत्रापीदमालोचनीयम् । अविद्यावरणनिरूपणेनैव मुक्तसंसारिणोरविशेषप्रसङ्गः दूरोत्सारितः । लोके अप्राप्तस्य वस्तुनः प्राप्ताविव

प्राप्तस्यापि कण्ठगतचामीकरादेः अप्राप्तत्वभ्रमविषयस्य भ्रमनिवृत्तौ सत्यां प्राप्तिर्व्यवह्रियते । ईदृशप्राप्तये भ्रमनिवृत्त्युपाय एवान्वेषणीयः । ततश्चात्र प्राप्तनित्यसुखप्राप्त्यर्थं भ्रमनिवर्तकसाक्षात्कारसंपादने यत्नः कर्तव्य एव । अविद्यानिवृत्तेः प्रयत्नसाध्यत्वेऽपि सुखःदुखाभाव-तत्साधनातिरिक्तत्वेनापुरुषार्थत्वं नापतति । आत्यन्तिकस्य दुःखसा-धनदुरितध्वंसस्य मुक्तित्ववादिनां नव्यनैयायिकानां मते दुःखसाधना-भावरूपत्वेनेव अविद्यानिवृत्तेरपि दुःखसाधनाभावत्वेन पुरुषार्थत्वसं-भवात् । इत्थमेव **मुक्तिवादे श्रीगदाधरभट्टाचार्याः** अद्वैतिसंमतमुक्तेः पुरुषार्थत्वमुपपादयन्ति ।

वस्तुतस्तु, अविद्यानिवृत्तिर्मुक्तिः । सा च चरमाखण्डाकारवृत्त्युप-लिक्षतपूर्णानन्दात्मस्वरूपा । यथा चैत्रे विद्यमानेऽपि तस्मिन् पाक-संबन्धगतामुत्पत्तिमारोप्य, अद्य पाचको जातः इति व्यवहारः, तथा आत्मनः आनन्दस्य सिद्धत्वेऽपि तदुपलक्षणवृत्तेः साध्यत्वमारोप्य मुक्तौ साध्यत्वव्यवहारः । प्राप्तप्राप्तिस्थले तिरोधायकाज्ञाननिवर्तकवृत्तेः साध्यत्वेनैव साध्यत्वव्यवहारदर्शनात् । न चैतावता मुक्तेः पुरुषार्थ-त्वमप्यौपचारिकमिति शङ्कनीयम् । तत्स्वरूपात्मनः आनन्दरूपत्वेन निरुपाधीच्छाविषयत्वेन पुरुषार्थत्वसंभवात् । पुरुषार्थत्वस्य साध्यत्वा-घटितत्वात् ।

'अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः' इत्युक्तरीत्या तादृशात्मनः दुःखाभावरूपत्वात् मुक्तेः नैयायिकमते इव पुरुषार्थत्वमप्य-क्षुण्णमिति वेदान्तरहस्यम् ।

तस्मात् परिपूर्णानन्दरूपं प्रकाशात्मकमेकमेव परमार्थसत्यं ब्रह्म । तत्साक्षात्कारादाविद्यकनिखिलानर्थनिवृत्तिपूर्वकपरमानन्दावाप्तिः मुक्तिः

इत्यत्राम्नायानामैदंपर्यं प्रकटीकुर्वदद्वैतवेदान्तदर्शनं दर्शनेषु दर्शनीयतमं दर्शनमिति बिभावनीयम् । इति शिवम् ।

धीराः कुशाग्रधिषणा भवतः प्रणम्य
मौलौ विधाय करवारिरुहे समीहे ।
वाणीयमर्थरहितापि विशृङ्खलापि
सानुग्रहेण हृदयेन विलोकनीया ।।

इति न्यायवैशेषिकग्रन्थाभिहितानां अद्वैतवाददूषणानां समालोचनं नाम पञ्चमं प्रसूनं समाप्तम् ।

विषयतासमालोचनम्

षष्ठं प्रसूनम् ।

अद्वैतब्रह्मसाक्षात्कारेण मुक्तिराविर्भवतीति वेदान्ता घोषयन्ति । अद्वैतसिद्धिः द्वैतमिथ्यात्वसिद्धिपूर्विकेति द्वैतप्रपञ्चस्य मिथ्यात्वं श्रुतिः प्रतिपादयति । श्रुत्यभिहिते द्वैतप्रपञ्चमिथ्यात्वे अनुमानादिकं प्रमाणमपि प्रवर्तते । ब्रह्मसूत्रकारैः आरम्भणाधिकरणे आगम-अनुमान-अर्थापत्ति-प्रत्यक्षादिप्रमाणैः साक्षेपनिरासं नरशृङ्गादितुच्छव्यावृत्तं मिथ्यात्वं द्वैतप्रपञ्चस्य व्युदपादि । तत्र 'भावे चोपलब्धेः' (ब्र-सू-2-1-15) इति सूत्रं ब्रह्मान्यभावजातस्य उपलब्धेः मिथ्यात्वं साधयति इति पूर्वाचार्याः व्याचक्षते । तदुक्तं—'ब्रह्मान्यत् मिथ्या दृश्यत्वादित्यनुमानं मानमित्याशयेनाह-भावे चोपलब्धेरिति । ब्रह्मान्यस्मिन् भावे-वस्तुमात्रे एव उपलब्धेः-दृश्यत्वात् ।' इति ।

एवं, 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (ब्र-सू-2-1-14) इति सूत्रविवरणावसरे, 'यथा च मृगतृष्णिकोदकादीनां ऊषरादिभ्योऽनन्यत्वं दृष्टनष्टस्वरूपत्वात्, स्वरूपेणानुपाख्यत्वात्, एवमस्य भोग्य-भोक्त्रादि-प्रपञ्चजातस्य ब्रह्मव्यतिरेकेणाभावः इति द्रष्टव्यम् ।' इति भाष्ये मिथ्यात्वसाधकमनुमानमुपन्यस्तम् । दृष्टनष्टस्वरूपत्वादिति प्रतीकमुपादाय, 'अनेन श्रुतिसिद्धे प्रपञ्चमिथ्यात्वे अनुमानमपि दर्शितम् । विप्रतिपन्नं वियदादिकं मिथ्या, दृश्यत्वात्, विनाशप्रतियोगित्वाच्च

शुक्तिरजतादिवदिति अनुमानद्वयमत्र विवक्षितम् ।' इति प्रामाणिकाः व्याचक्षते ।

तच्च दृश्यत्वं दृग्विषयत्वम् । तत्स्वरूपपर्यालोचने द्वैतप्रपञ्चस्य मिथ्यात्वं सिद्धयतीति विषयतास्वरूपमत्र चिन्त्यते ।

अत्र केचित्, साक्षात्करोमीति प्रतीतिनियामकलौकिकसंनिकर्षाधीनायाः अतिरिक्ताया विषयतायाः कल्पनापेक्षया लाघवात् संनिकर्षस्यैव क्लृप्तस्य विषयतात्वकल्पनमुचितम् । अतश्च ज्ञानजनककरणसंनिकर्षाश्रयत्वं विषयत्वम् । घटचाक्षुषे जनकीभूतः यः चक्षुषः करणस्य घटेन संनिकर्षः—संयोगः, स एव घटस्य चाक्षुषज्ञानविषयता । ईश्वरज्ञानस्य नित्यत्वात् ज्ञानकरणसंनिकर्षासंभवात् अगत्या ईश्वरज्ञानविषयता अतिरिक्ता स्वीक्रियते । न च यत्र एकेन संनिकर्षेण भूतलं घटवदिति, भूतले घटः इति च ज्ञानद्वयं जातम्, तत्र प्रथमज्ञाने भूतलस्य विशेष्यता घटस्य प्रकारता, द्वितीये तु घटस्य विशेष्यता भूतलस्य प्रकारतेति व्यवस्था न संभवति । उभयज्ञानानुरोधेन भूतलसंयोगे विशेष्यतात्वस्येव प्रकारतात्वस्य, घटसंयोगे प्रकारतात्वस्येव विशेष्यतात्वस्यापि स्वीकरणीयत्वादिति शङ्कनीयम् । घटवद् भूतलमिति ज्ञाने घटविषयता-भूतलविषयतयोः प्रकारतात्व-विशेष्यतात्वाभ्यां निरूप्यनिरूपकभावः, भूतले घटः इति ज्ञानीययोस्तु न तथा निरूप्यनिरूपकभावः इति निरूप्यनिरूपकभाववैचित्र्यादेवोक्तज्ञानयोः विशेष्यविशेषणभावव्यत्यासोपपत्तेः । विषयतायाः संनिकर्षातिरिक्तत्वमतेऽपि निरूप्यनिरूपकभाववैचित्र्यमङ्गीकरणीयमेव । अन्यथा घटवद्भूतलवानयं देशः इति ज्ञाने घटांशे भूतलस्य विशेषणत्वापत्तिः । घटनिष्ठप्रकारतायाः घटत्वांशे विशेष्यतारूपत्वात् । भूतलनिष्ठविशेष्यतायाः देशांशे प्रकारतारूपत्वात्, एकव्यक्तिनिष्ठयोः एकज्ञानविषयतयोर्भेदा-

भावात् । तथाच लाघवात् ज्ञानजनककरणसंनिकर्ष एव विषयता इति वदन्ति ।

तन्न युक्तम्—घटचाक्षुषजनकस्य घटचक्षुःसंयोगस्य द्विनिष्ठत्वेन चक्षुष्यपि वृत्तेः चक्षुषोऽपि घटचाक्षुषविषयत्वापत्तेः । यदि संनिकर्षानुयोगित्वमेव विषयता, घटचक्षुस्संयोगानुयोगिता घटस्यैव न चक्षुषः इति न चक्षुषो विषयत्वापत्तिरित्युच्यते, तदा हस्तस्योपरि पतितस्य दण्डस्य त्वाचप्रत्यक्षविषयता न स्यात् । तत्र ज्ञानजनकत्वग्दण्डसंयोगे त्वच एवानुयोगित्वात् । एवं यत्र विनश्यदवस्थसंयोगात् घटप्रत्यक्षं जातम्, तत्र प्रत्यक्षकाले संनिकर्षाभावेन घटे विषयताप्रतीतिः न स्यात् । किंच, पर्वतो वह्निमानित्यनुमितिविषयता लिङ्गिनो वह्नेः न स्यात् । अनुमितिकरणलिङ्गज्ञानादिसंनिकर्षाभावात् । यदि च तत्र करणस्य स्वविषयलिङ्गव्यापकत्वं संनिकर्षो वह्नावस्तीति विषयत्वमुच्यते । तदा वह्नित्व-वह्निसंयोगयोः विषयता न स्यात्, तयोः करणविषयलिङ्गव्यापकतात्मकसंनिकर्षाभावात् । व्यापकाघटकत्वात्मकसंनिकर्षसत्त्वेन तयोः विषयत्वाङ्गीकारे, व्याप्तिघटकप्रतियोगित्वादीनामपि पर्वतो वह्निमानित्यनुमितिविषयत्वापत्तिः । तस्मात् संनिकर्षस्य विषयतात्वकल्पनं न समञ्जसम् ।।

अन्ये तु, मणेः अपृथक्सिद्धा मणिप्रभा अपवरकादौ प्रसरणक्रियावती द्रव्यरूपेत्युच्यते । एवमेव अणोः आत्मनः अपृथक्सिद्धं ज्ञानं चक्षुरादिद्वारा विषयदेशे प्रसरणक्रियावत् द्रव्यमित्युच्यते । तच्च ज्ञानं नित्यम् । 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' इति श्रुत्या आत्मधर्मज्ञानस्य नाशाप्रतियोगित्वप्रतिपादनात् । घटज्ञानमुत्पन्नं, नष्टम् इति व्यवहारस्तु तदीयप्रसरणक्रियायाः उत्पत्तिविनाशाववलम्बते । तस्य प्रसरणक्रिया च 'प्रज्ञा च तस्मात् प्रसृता पुराणी' इति

वचनसिद्धा । तथाच क्रियावत्त्वात् ज्ञानं द्रव्यम् । तस्य घटादिना संयोगो विषयता । परोक्षस्थलेऽपि सूक्ष्मं प्रसरणमस्तीत्यङ्गीक्रियते । अतः तत्रापि संयोगो विषयता । यद्वा, तत्रातिरिक्ता विषयता । घटो रूपवानिति ज्ञाने रूपावच्छिन्नघटे ज्ञानसंयोगः । तथाच तादृशज्ञानसंयोगानुयोगित्वं घटस्य विशेष्यता । तादृशानुयोगितावच्छेदकत्वं रूपस्य प्रकारता । तादृशावच्छेदकतानिरूपितसंबन्धानवच्छिन्नावच्छेदकत्वं संसर्गविधया अवच्छेदकत्वम् । अपृथक्सिद्धत्वं संबन्धस्य संसर्गता । तादृशावच्छेदकतानिरूपितयत्किञ्चित्संबन्धावच्छिन्नावच्छेदकत्वं रूपत्वादेः प्रकारतावच्छेदकता । अयं रसो गुणः इति ज्ञाने रसो विशेष्यः । तस्य गुणत्वात् ज्ञानसंयोगो न संभवतीति तस्य विशेष्यता न संयोगरूपा । अपि तु, ज्ञानसंयुक्तानुयोगिकत्वविशिष्टापृथक्सिद्धत्वसंबन्धप्रतियोगितारूपेति मन्तव्यमिति वदन्ति ।

तदपि न साधु । संयोग-संयुक्तानुयोगिकत्वविशिष्टापृथक्सिद्धत्वप्रतियोगित्व-अतिरिक्तविशेष्यतादिसाधारणस्य अनुगतस्य विशेष्यतात्वस्याभावेन तेषु विशेष्यता इत्यनुगतप्रतीत्यसंभवात् । प्रसरणक्रियादिधर्मवतो ज्ञानस्य नित्यत्वासंभवः । प्रसरणस्योत्पत्तिविनाशवत्त्वात् धर्मधर्मिणोः तादात्म्येन तद्धर्मकस्य ज्ञानस्यापि उत्पत्तिविनाशादिविकारवत्त्वात् 'उपयन्नपयन्धर्मो विकरोति हि धर्मिणम्' इति न्यायात् । 'अविनाशी वा अरेऽयमात्मा अनुच्छित्तिधर्मा' इति श्रुत्या अनुच्छेदरूपधर्मवत्त्वमेवात्मनः उच्यते, न तु उच्छेदरहितज्ञानरूपधर्मवत्त्वम् । न उच्छित्तिः यस्य, अनुच्छित्तिः धर्मः यस्येति च बहुव्रीहिद्वयाश्रयणे गौरवात् । उच्छेदाभावमात्रस्य विवक्षितत्वे 'अविनाशी' इत्यनेन पुनरुक्ततेति न शङ्कनीयम् । णिनेः ताच्छील्यार्थकतया अविनाशी इति पदेन विनाशशीलत्वाभावस्य नाशसामग्रीरहितत्वरूपस्य उच्छेदा-

भावे हेतोरभिधानेन सामञ्जस्यात् । आत्मा उच्छेदाभाववान् नाशसामग्रीरहितत्वादिति श्रुत्यर्थः । इत्थं च हेतोः साध्याविशेषोऽपि नास्ति । 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' इत्यत्र विज्ञातुः यः विज्ञातिः- ज्ञानं, तस्येति व्यधिकरणषष्ठीमाश्रित्य ज्ञातृनिष्ठज्ञानस्य नाशो नास्तीत्यर्थवर्णनं न समीचीनम् । ज्ञानस्य सदा ज्ञातृनिष्ठत्वेन विज्ञातृनिष्ठत्वस्याव्यावर्तकत्वेन तत्कथनस्य निष्प्रयोजनत्वात् । अपितु, विज्ञातुः विज्ञातेः इति समानाधिकरणषष्ठ्यौ । विज्ञातृस्वरूपभूत-ज्ञानस्य नाशो नास्तीत्यर्थः । जन्य-वृत्तिज्ञानव्यावृत्तये विज्ञातुः इति विशेषणेन विज्ञात्रभिन्नत्वं विज्ञातिशब्दितज्ञानस्योक्तमिति सामञ्जस्यात्। तस्मात् आत्मनः अपृथक्सिद्धनित्यज्ञानसंयोगादेः विषयतात्वकथनं न साधु इति विभावनीयम् ॥

आत्मतत्त्वविवेककृतस्तु, प्रकाशस्य सतः तदीयतामात्रनिबन्धनः स्वभावविशेषो विषयता इति निरूपयन्ति ।

प्रकाशस्य—ज्ञानस्य, सतः— विद्यमानस्य तदीयतामात्रनिबन्धनः स्वभावः— तदीयत्वोपहितं स्वरूपमित्यर्थः । इत्थंच यत् ज्ञानं यदीयस्वभावं सः तस्य विषयः इति फलितम् । तदीयेत्यत्र तद्धितार्थः संबन्धः विषयतारूप एवेति, तद्विषयकज्ञानस्वरूपं तस्य विषयता इति पर्यवसानात् आत्माश्रयो दोषः । यदि चात्र तदीयत्वं न लक्षणप्रविष्टम्, किन्तु ज्ञानविशेषपरिचायकमात्रमिति, वस्तुगत्या यदीयं यत् ज्ञानं तत् तस्य विषयता इत्युच्यते, तदा रूपज्ञानस्य रूपज्ञानाभावाभावरूपत्वेन रूपज्ञानाभावीयत्वात् रूपज्ञानं रूपज्ञानाभावस्य विषयतारूपमिति रूपज्ञानस्य रूपज्ञानाभावविषयकत्वापातात् । तथा तादृशं ज्ञानं कालसंबन्ध्यपि वस्तुगत्येति, तस्य कालविषयकत्वापाताच्च । किंच ज्ञानस्यैव विषयतारूपत्वे, घटपटौ इति समूहालम्बनज्ञानस्य

भ्रमत्वापत्तिः । घटत्वप्रकारतानिरूपिता घटनिष्ठविशेष्यता यथा उक्त-समूहालम्बनरूपा, तथा पटनिष्ठविशेष्यतापि तादृशज्ञानरूपेति पटविषयतायाः घटनिष्ठविशेष्यत्वाभिन्नत्वात् घटत्वनिष्ठप्रकारतानिरूपितपटनिष्ठविशेष्यताशालित्वेन व्यधिकरणप्रकारकत्वात् । एवं, ज्ञानविशेषाणामेव विषयतात्वे, घटविषयकज्ञानत्वेन हेतुता न वक्तुं शक्यते । विषयतायाः तत्तज्ज्ञानरूपत्वेनाननुगतत्वात् । तस्मात् विषयता नामातिरिक्तः पदार्थः । स च ज्ञानविषययोः संबन्धः इति **शिरोमणिभट्टाचार्याः** व्यवस्थापयन्ति ।

अत्रेदं चिन्तनीयम् । घटादीनां ज्ञानस्य च संबन्धत्वेन विषयता सिद्धयति । संबन्धिभ्यां घट-पटाभ्यां समवायेन संबद्ध एव संयोगः घटपटयोः संबन्धो भवति । अतिप्रसङ्गापत्त्या असंबद्धस्य संबन्धत्वायोगात् । एवमत्र विषयता संबन्धिभ्यां घट-ज्ञानाभ्यां संबद्धैव घट-ज्ञानयोः संबन्धः इति वक्तव्यम् । यदि विषयतायाः घटेन संबन्धः विषयतातिरिक्तः स्वीक्रियते, तदा तस्याप्यतिरिक्तसंबन्धस्य संबन्धिना असंबद्धस्य संबन्धत्वायोगात् संबन्धान्तरं वक्तव्यम् । एवं तस्य, तस्यापीत्यनवस्था स्यात् । ततश्च—

> 'अनवस्थादयो दोषाः सत्तां निघ्नन्ति वस्तुनः ।
> अद्वैतिनां ते सुहृदः प्रपञ्चे सत्प्रसञ्जकाः ।।

इति **खण्डनरीत्या** अनवस्थादोषदूषितस्य संबन्धस्य न सत्यतेति मायिकत्वमेव पर्यवस्यति ।

न च घट-तज्ज्ञानयोः संबन्धः विषयता संबन्धिभ्यां घट-ज्ञानाभ्यामतिरिक्ता । सा च संबन्धिनि घटे स्वरूपेण संबद्धा । स्वरूपस्य संबन्धत्वे संबन्धान्तरापेक्षा नास्ति । परस्वरूपस्य स्वप्रतियोगिक-

स्वरूपत्वाभावेन अतिप्रसङ्गस्याप्रसक्तेः। तथाच विषयताख्यसंबन्धस्य स्वरूपेण संबन्धिना संबद्धत्वात् तस्य संबन्धान्तराभावात् नानवस्था-दोषः इति शङ्कनीयम्। स्वरूपं संबन्धः इत्यनेन किं विषयतास्वरूपं विवक्षितं, उत विषयस्वरूपम्। उभयथापि पटज्ञाने घटो विषयः स्यात्। विषयतास्वरूपस्य विषये संबन्धत्वे, यथा पटः विषयतास्व-रूपाद्भिन्नः, तथा घटोऽपि विषयतास्वरूपाद्भिन्नः इति घटेनापि विषय-त्वस्य संबद्धता कुतो न स्यात्, स्वरूपानपायात्। एवं, स्वं न स्वीय-मित्यनुभवेन स्वस्मिन् स्वप्रतियोगिकत्वाभावेन स्वरूपे स्वीयसंबन्धता न संभवति ।

यदि पटस्वरूपं विषयतायाः संबन्धः इति विवक्षितम्, तदापि पटस्येव घटस्यापि अतिरिक्तविषयतानात्मत्वं संबन्धान्तरेणासंबन्धित्वं चाविशिष्टमिति, पट एव स्वरूपेण विषयतासंबन्धी न घटः इत्यस्य दुर्वचत्वेन घटस्यापि पटज्ञानविषयताप्रसङ्गः। यत् ज्ञानं यद्विषयकं, तद्विषयत्वस्य तत्स्वरूपमेव संबन्धः, नान्यस्वरूपमित्यपि न वक्तुं शक्यते। अयं पटः इति ज्ञानविषयत्वस्य घटेनासंबन्धनिश्चये सति उक्तज्ञानस्य घटाविषयकत्वनिश्चयः। घटाविषयकत्वनिश्चये सति पटज्ञानविषयत्वस्य घटेनासंबन्धनिश्चयः इत्यन्योन्याश्रयदोषात्। एवं, स्वं न स्वीयमित्यनु-भवात् स्वस्मिन् स्वप्रतियोगिकत्वाभाववत् स्वानुयोगिकत्वस्याप्य-भावात् पटादिविषयस्वरूपस्य पटानुयोगिकसंबन्धत्वमपि न संभवति। तथाच घट-तज्ज्ञानयोः संबन्धस्य अतिरिक्तविषयत्वस्य स्वरूपेण संबन्धि-संबद्धत्वस्यासंभवात्, संबन्धान्तरेणैव संबन्धिना संबद्धत्वं वक्तव्यमिति, एव तस्य तस्यापि इति रीत्या संबन्धानवस्थादोषो दुष्परिहर इति बोध्यम्। किंच, घटादीनां स्फुरणेन सह विषयतात्मकः संबन्धः केन प्रमाणेन सिद्ध्यतीति विवेचनीयम्। घटस्फुरणेनैव सा विषयता विषयीक्रियते

इति न वक्तुं शक्यते । अयमस्य संबन्धः इति ग्रहणे संबन्धिनोऽपि ग्रहणमावश्यकम् । स्फुरणमपि विषयतासंबन्धस्य संबन्धीति स्फुरणस्य स्फुरणमावश्यकम् । न च घटस्फुरणेन स्वमपि गृह्यते, आत्माश्रयात्, मानाभावाच्च । उभयीयत्वग्राहकमानशून्यः संबन्धो न भवति । तस्मात् घटविषयकस्फुरणेन घट-स्फुरणयोः विषयतात्मकसंबन्धो गृह्यते इति नोपपद्यते । अतः घटविषयकं स्फुरणं तादृशस्फुरण-विषयकेणान्येन स्फुरणेन विषयीक्रियते इति स्वीकरणीयम् । अन्यस्य स्फुरणस्य प्राथमिकस्फुरणविषयकत्वं न तेनैव सिद्ध्यति । संबन्धिनः स्वस्य स्वेनाविषयीकरणात् । अतः तद्विषयकेणापरेण स्फुरणेन पूर्व-स्फुरणविषयत्वसिद्धिरिति वक्तव्यम् । तथा चानवस्था दोषः ।

न चाविरललग्नवित्तिधारास्वीकारे अनवस्था स्यात् । विरल-व्यक्तिधाराभिरनवस्था न भवतीति वाच्यम् । ताभिः वित्तिधाराभिः अवश्यं भाव्यमित्यत्र मानाभावात् । अथ माभूत् सर्वासां वित्तिधारा-णां वित्तिः, तथापि द्वित्रा वित्तयः तद्विषयकवित्त्यन्तरे मानमिति चेन्न । अन्त्यवित्तेः उपान्त्यवृत्तिविषयकत्वे किं प्रमाणमिति वक्तव्यम् । उपान्त्यवित्तिविषयतासंबन्धिन्याः अन्त्यवित्तेः स्वेनाग्रहणात् । तद्विषयक-वित्त्यन्तरेण ग्रहणे च तस्या अन्त्यवित्तित्वं व्याहतं भवति । तथा च अन्त्यवित्तेः उपान्त्यवित्तिविषयकत्वासिद्ध्या उपान्त्यवृत्तिः न सिद्ध्यति । तथैव तत्पूर्वतनवित्तिधारापि न सिद्ध्यतीति वित्तेः घटविषयकत्वमपि न सिद्ध्यति । संबन्धिनोऽग्रहणेन विषयताग्रहणासंभवात् ।

तस्मात् प्रमाणाभावात् ज्ञानेन विषयाणां संबन्धः न पारमार्थिकः संभवतीति मायिक एव संबन्धः अनिर्वचनीयः । मायिकेन संबन्धेन संबन्धिनोः घटादिविषय-स्फुरणयोः मायिकत्वेऽपि चितः स्वरूपेण

बाधासंभवेन पारमार्थिकत्वात् अधिष्ठानत्वसंभवेन चित्-घटयोः अधिष्ठानाध्यस्तभावः इति मायिकं चित्तादात्म्यमेव विषयता संबन्धः इति पर्यवसितम् ।

यत्तु, चित्तादात्म्यस्य विषयतात्वे चितः स्वयंप्रकाशत्वानुपपत्तिः । स्वविषयत्वस्य स्वयंप्रकाशत्वस्वरूपत्वात् चिति संबन्धनियतभेदाभावेन चित्तादात्म्यरूपविषयताया अभावात् । अन्यादृशस्य स्वयंप्रकाशत्वरूपत्वे, तस्य पारिभाषिकत्वापत्तेः इति चोद्यम् ।

तत् सिद्धान्तानाकलननिबन्धनम् । न हि चितः स्वयंप्रकाशत्वं चिद्विषयत्वरूपं संभवति । न ह्यग्निरात्मानं दहति । संबन्धस्य भेदनियतत्वेन स्वस्मिन्नसंभवात् । 'यत्तदद्रेश्यम्' इति श्रुत्या चिद्विषयत्वस्य निषेधाच्च । न च साकल्येन ब्रह्म न ज्ञानविषयः इति निरुक्तश्रुत्यर्थ इति वाच्यम् । साकल्येनेति पदाध्याहारे मानाभावात् । परंतु अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वं स्वयंप्रकाशत्वम् । अवेद्यत्वं च फलव्याप्यत्वाभावः । फलं चिदेव । तथाच चिद्विषयत्वाभावघटितमेव स्वयंप्रकाशत्वमिति चिद्विषयत्वाभावस्य स्वयंप्रकाशत्वानुकूलत्वमेवावधेयम् । न चास्य स्वयंप्रकाशत्वरूपत्वे पारिभाषिकत्वापत्तिः । स्वयं-अन्यनैरपेक्ष्येण-वृत्त्यपेक्षां विनैव, प्रकाशः— अपरोक्षव्यवहारयोग्यः इति पदार्थसामञ्जस्येन पारिभाषिकत्वासंस्पर्शात् । किंच प्रदीपः स्वयंप्रकाशः, तद्वत् चिदपि स्वयंप्रकाश इति व्यवह्रियते । न हि दीपप्रकाशस्य स्वात्मकप्रकाशविषयत्वेन स्वयंप्रकाशत्वव्यवहारः । स्वात्मकप्रकाशप्रकाश्यत्वस्य स्वस्मिन् बाधात् । परन्तु, सजातीयप्रकाशाप्रकाश्यत्वे सति प्रकाशरूपत्वात् तथा व्यवहारः । तस्मात् स्वयंप्रकाशत्वव्यवहारप्रयोजकं सजातीयप्रकाशाप्रकाश्यप्रकाशरूपत्वमेव । तच्च

चित्-प्रदीपप्रकाशसाधारणम् । प्रकाशत्वं आवरणाभिभावकस्वरूपत्वम् । तच्च प्रकाशस्य तेजोविशेषत्वेन, चितः चित्त्वेन । अज्ञानस्य तमसश्च आवरणत्वं अर्थव्यवहारप्रतिबन्धकत्वम् । तच्च अज्ञानस्य साक्षात्, तमसः ज्ञानप्रतिबन्धद्वारा इत्यन्यदेतत् । स्वयंज्योतिः इत्यस्याप्ययमेवार्थः । तथाच चिद्विषयत्वाभावः चितः स्वयंप्रकाशत्वानुकूल एवेति न किंचिदसमञ्जसम् ।

इदं रजतमित्यादौ, इदं रजतं जानामीति इदमवच्छेदेन रजततादात्म्यावगाह्यनुभवात् सर्वदृश्यतादात्म्यापन्नायां चिति इदमवच्छेदेन रजततादात्म्यं स्वीक्रियते । रजततादात्म्याभावश्च घटाद्यवच्छेदेन स्वीक्रियते । एकस्मिन्नधिकरणे समानसत्ताकयोः भावाभावयोः वृत्तेर्विरोधात् । एकस्मिन्नेव वृक्षे कपिसंयोग-तदभावयोः वृत्तौ विरोधपरिहाराय अग्रमूलाद्यवच्छेदकभेद इव, चिति रजततादात्म्य-तदभावयोः वृत्तौ विरोधपरिहाराय इदमः घटादेश्चावच्छेदकत्वं स्वीक्रियते । अग्रादेः कपिसंयोगाद्यवच्छेदकताजातीयमेव इदमादेः रजततादात्म्याद्यवच्छेदकत्वम् । तत्रावच्छेदकीभूताग्रदेशस्य वृक्षस्य च संबन्धोऽपि यथा कपिसंयोगावच्छेदकः, तथा इदमः चितश्च यः संबन्धः तादात्म्यलक्षणः, तस्यापि रजततादात्म्यावच्छेदकत्वम् । तथाच इदंतादात्म्याच्छिन्नं भवति रजततादात्म्यम् । एवम्, अवच्छेद्यकपिसंयोगसंबन्धस्यापि अवच्छेद्यत्ववत् रजततादात्म्यस्य चिता संबन्धरूपस्य विषयतात्मकस्यापि इदंचित्तादात्म्यरूपविषयत्वावच्छिन्नत्वं भवतीति, इदंविषयत्वावच्छिन्नरजततादात्म्यविषयताशालि इदं रजतमित्याकारकज्ञानमिति बोध्यम् ।

रजततादात्म्यविषयतायाः इदंविषयत्वावच्छेद्यत्वे रजतविषयताऽपि इदंविषयत्वावच्छेद्या भवति, अवच्छेद्यविशेषणत्वात् । इदंविषयता

रजतविषयताविशिष्टायां तादात्म्यविषयतायामवच्छेदिका । विशेषणीभूता विषयता प्रकारता, विशेष्यभूता संसर्गता, तदवच्छेदकविषयता विशेष्यता इत्युच्यते । तथाच विषयतानिष्ठं विषयतावच्छेदकत्वं विशेष्यतात्वम् । तादृशावच्छेदकतानिरूपकविषयतात्वं संसर्गतात्वम्, विषयतानिष्ठायां तादृशावच्छेदकतानिरूपकतायामवच्छेदकविषयतात्वं प्रकारतात्वमिति निष्कर्षः ।

यत्तु, विशेष्यतालक्षणस्य प्रकारतायामतिव्याप्तिः । 'प्रकारता ज्ञाननिरूपिता' इति ज्ञाने प्रकारता विशेष्यतया भासते । तत्र, रजततादात्म्यविषयतायाः संसर्गतायाः इदमवच्छिन्नत्ववत्, ज्ञाननिरूपिततादात्म्यविषयतायाः इदं-स्थानापन्न प्रकारतावच्छिन्नत्वमस्ति । तथाच विषयतारूपायां प्रकारतायां ज्ञाननिरूपिततादात्म्यविषयतावच्छेदकतायाः सत्त्वात् प्रकारतायामतिव्याप्तिरिति ।

तन्न । विषयतावच्छेदकतानवच्छेदकत्वे सति विषयतावच्छेदकत्वं विशेष्यतात्वम् । उक्तस्थले प्रकारताविषयतानिष्ठायां ज्ञाननिरूपिततादात्म्यविषयतावच्छेदकतायां प्रकारतायाः, इदंविषयत्वनिष्ठायां रजततादात्म्यविषयतावच्छेदकतायां इदम इव अवच्छेदकत्वेन, विषयतावच्छेदकतानवच्छेदकत्वाभावेनातिव्याप्तिविरहात् । विषयतानिष्ठत्वं चोक्तानवच्छेदकत्वनिवेशतात्पर्यग्राहकं बोध्यम् ।

उक्तावच्छेदकतानवच्छेदकत्वमित्यनेन उक्तावच्छेदकतावच्छेदकत्वाभावः यदि विवक्षितः, तदा उक्तावच्छेदकतावच्छेदकतायाः भवन्मते मिथ्यात्वेन तदभावस्य उक्तावच्छेदकतावच्छेदकेऽपि सत्वात् पूर्वोक्तस्थले प्रकारतायामतिव्याप्तिः । यदि उक्तावच्छेदकतावच्छेदकभेदो विवक्षितः,

तदापि समानाधिकरणप्रतीतौ भेदाभेदयोर्भानस्य भवद्भिरङ्गीकारात्, प्रकारता विषयतावच्छेदकतावच्छेदिका इति समानाधिकरणप्रतीतिसिद्धस्य उक्तावच्छेदकतावच्छेदकभेदस्यापि प्रकारतायां सत्वादतिव्याप्तिः दुर्वारा **इत्यनन्ताचार्यदूषणपरिपाटी** नोत्थानमर्हति ।

यतः विषयतावच्छेदकतानवच्छेदकत्वमित्यनेन लोकसिद्धविशेषणतासंबन्धेन निरुक्तावच्छेदकत्वाभाववत्वं विवक्षितम् । यथा वस्तुतः पर्वतानुयोगिक - पर्वतीयवह्निप्रतियोगिकसंयोगस्य संयोगत्वेन संसर्गता पर्वतो वह्निमानिति प्रतीतिसिद्धा, तथा लोकसिद्धविशेषणताया अपि विशेषणतात्वेन संसर्गता प्रामाणिकी । तथाच उक्तावच्छेदके लोकसिद्धविशेषणतया उक्तावच्छेदकत्वाभावविरहान्नातिव्याप्तिः । एवं अभेदविरोधिनः विषयतावच्छेदकतावच्छेदकभेदस्य निवेशेऽपि नातिव्याप्तिः । समानाधिकरणप्रतीतिसिद्धस्य भेदस्य अभेदाविरोधित्वेन तादृशप्रतीतिविषयभेदमादाय दोषानवकाशात् ।

एवं, विशिष्टशुद्धयोः भेदसमानाधिकरणाभेदरूपतादात्म्यस्वीकारेण विशिष्टसत्तायां सत्ताभेदस्य सत्वेऽपि विशिष्टसत्ता सत्ता नेति प्रतीतिविरहात् अभेदविरोधिभेद एव नञर्थो वाच्यः। तथाच समानाधिकरणप्रतीतिसिद्धभेदस्य अभेदविरोधित्वाभावात् न नञुल्लेख्यता । नञुल्लेख्यस्य विषयतावच्छेदकतावच्छेदकभेदस्य विवक्षणेऽपि समानाधिकरणप्रतीतिसिद्धं निरुक्तभेदमादाय उक्तस्थले प्रकारतायां नातिव्याप्तिः संभवतीति विशेष्यतालक्षणं निरवद्यमिति बोध्यम् ।

तथाच दृश्यानां मायिकं अधिष्ठानभूतचित्तादात्म्यं विषयता इति, दृश्यत्वेन हेतुना द्वैतप्रपञ्चमिथ्यात्वं सिद्ध्यति । ततः अद्वैतब्रह्मसाक्षात्कारात् अद्वैतब्रह्मभावरूपमोक्षः आविर्भवतीति शिवम् ॥

आरम्भणाधिकरणे सूत्रे भाष्येऽपि च स्फुटम् ।

दृश्यत्वं विश्वमिथ्यात्वे प्रमाणं समुदीरितम् ।। 1 ।।

तच्चात्र विषयत्वस्य समालोचनवर्त्मना ।

विशदीकृतमेतेन सद्गुरुः संप्रसीदतु ।। 2 ।।

इति विषयतासमालोचनं (विमर्शनं) नाम षष्ठं प्रसूनं समाप्तम् ।

—:o:—

माया - विमुक्तिनिरूपणम्

सप्तमं प्रसूनं

तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते ।
योगी मायाममेयाय तस्मै योगात्मने नमः ।।
विरुद्धधर्मद्वयसंनिपातेऽप्यभेद एवेति विभावयन्तम् ।
पुनातु भेदप्रनिभासशून्यं स्त्रीपुंसरूपं शिवयोः शरीरम् ।।

वेदान्ताः, केनापि धर्मेणासंसृष्टमसङ्गं कूटस्थं विकाररहितं स्वप्रकाशपरिपूर्णानन्दात्मकं सद्रूपं ब्रह्म जगतः प्रकृतिं घोषयन्ति । 'सच्च त्यच्चाभवत्' इति श्रुतिः ब्रह्मण एव इन्द्रियग्राह्य-इन्द्रियाग्राह्य-भूतात्मना भवनमभिधत्ते । भूतादिरूपेण परिणामे सति ब्रह्म विकारि स्यात् । ततः निर्विकारं ब्रह्म कं सहायमवलम्ब्य जगतः प्रकृतिरभूत् इति विचिन्त्य, तत्त्वदर्शिनो महर्षयः ध्यानमास्थिताः, सत्वरजस्तमोगुण-मयीं मायां शक्तिं सहायभूतामपश्यन्, इति श्वेताश्वतरोपनिषत् ब्रूते । 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम् ।' (श्वे.) इति । 'दैवी ह्येषा गुणमयी मम माया दुरत्यया ।' इति भगवद्गीता-स्मृतेः गुणमयी मायेत्यवगम्यते । 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।' इति श्रुतिः मायां प्रकृतिमाह । ब्रह्मेव मायाऽपि जगतः प्रकृतिः । मृत्तिकायाः जडरूपाया विकारो घटः स्वप्रकृतिगतजाड्य-

धर्मवान् भवति। ब्रह्मणः सत्ता स्फुरणं च जगति भासते। घटोऽस्ति, स्फुरति इति प्रतीमः। तथा घटो जड इत्यपि। जाड्यं मायारूपप्रकृतिगतं, सत्तादिकं ब्रह्मरूपप्रकृतिगतं च भासते। तथाच भूतादिप्रपञ्चः मायापरिणामः मायिको न पारमार्थिकः। अतश्च मायिकविकारवतोऽपि ब्रह्मणः पारमार्थिकविकाररहितत्वरूपं कूटस्थत्वं न विरुद्धचते। तस्मात् ब्रह्मणः कूटस्थस्वरूपोपमर्दं विना जगत्प्रकृतित्वं माया साधयति। अमुमर्थं बादरायणाचार्याः 'योनिश्च हि गीयते' (ब्र. सू-1-4-27) इति सूत्रेणोपदिशन्ति। 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' (ब्र. सू-1-4-23) इति सूत्रात् प्रकृतिरिति पदं मण्डूकप्लुत्या अनुवर्तते। ततश्चायमत्र सूत्रार्थः। न केवलं ब्रह्मैव जगदुपादानं, किन्तु 'यो योनिं योनिमधितिष्ठत्येकः' इत्यादिश्रुतिषु योनिशब्देनोक्ता मायाप्युपादानमिति गीयते - आम्नायते 'मायां तु प्रकृतिं विद्यात्' इत्यादिश्रुतिषु इति। ऐन्द्रजालिकमायानिर्मितवृक्षादीनां संबन्धेन भूतलस्य तात्विकं वृक्षादिविकाररहितत्वं न विहन्यते इति प्रसिद्धम्। विकारो मायिकः इति चिन्तितम्। इदानीं कथं माया विकारात्मना परिणमते इति चिन्त्यते।

माया स्वयंप्रकाशमात्मानमाच्छादयति। आत्मनि नास्ति, न प्रकाशते इति व्यवहारं जनयति। प्रपञ्चं जीवेश्वरादिविभागादिकं च विक्षेपं जनयति। पिटकादिकं स्वापेक्षया न्यूनपरिमाणं घटादिकमाच्छादयतीति दृष्टम्। माया हि न ब्रह्मणोऽधिकपरिमाणा, येन ब्रह्माच्छादयेदिति न शङ्कनीयम्। यतः अस्माकं नयनसंनिहितोऽङ्गुलिः अधिकपरिमाणं सूर्यमण्डलमावृणोति। यदि अङ्गुलिः नयनस्य बहिर्निर्गमद्वारमेव स्वापेक्षया परिच्छिन्नमाच्छादयतीत्युच्यते, तदा नयनस्य बहिर्गमनाभावात् अङ्गुलिरपि न भासेत। अतः आवरणीय-

ब्रह्मापेक्षया परिच्छिन्नाया अपि मायाया आवारकत्वं युज्यते । वस्तुतः अस्ति प्रकाशते इति व्यवहारप्रतिबन्धकत्वमेव मायाया आवारकत्वं तमस इव, न तु पिटकादेरिव घटाद्यावारकत्वम् इति बोध्यम् ।

इयं माया आवरणशक्तिः विक्षेपशक्तिरिति शक्तिद्वयोपेता । नास्ति, न प्रकाशते इति व्यवहारयोग्यता, तादृशव्यवहारो वा आवरणम्। तत्प्रयोजकशक्तिः आवरणशक्तिः । वियदादिकं कार्यं विक्षेपः । तत्प्रयोजकशक्तिः विक्षेपशक्तिः। एतादृशशक्तिद्वयं अविद्याशब्दिताज्ञानस्यैव शास्त्रेषूच्यते, न मायाया इति न मन्तव्यम् । मायैव अज्ञानपदाभिधेया अविद्या । न तयोर्भेदोऽस्ति । मायास्वरूप-तत्कार्यादिनिरूपिकायां नृसिंहतापिन्यामुपनिषदि 'मायाऽविद्या च स्वयमेव भवति, जीवेशावाभासेन करोति' । इति श्रवणात् ।

अविद्याभिधानमज्ञानमात्मचैतन्यस्याबारकं, ज्ञानेन निवर्त्यते । 'अज्ञानेनाबृतं ज्ञानं तेन मुह्यन्ति जन्तवः' इति भगवद्गीता ज्ञानशब्देन अभिहितस्यात्मचैतन्यस्पावारकमज्ञानं ब्रूते । तथा 'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।' इति ज्ञानेन तस्य नाशमभिधत्ते । एवं आत्मस्वरूपावारकत्वं, ज्ञाननाश्यता चेति द्वयं मायायामपि प्रतिपादयति गीता । सत्वादिगुणसमुदायात्मकयोगमायायाः 'नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।' इति आत्मस्वरूपावारकत्वस्य,

'दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।।

इत्यत्र आत्मस्वरूपज्ञाननाश्यतायाश्च बोधनात् ।

अत्र, मामेव-सर्वोपाधिविरहितमखण्डात्मानं ये प्रपद्यन्ते-वेदान्तवाक्यजन्यसाक्षात्कारेण विषयीकुर्वन्ति, ते मायां तरन्ति-अतिक्रामन्ति ।

तरणमत्र नाशः, तरति ब्रह्महत्यां योऽश्वमेधेन यजते इत्यत्रेवेति बोध्यम् । मामेव ये प्रपश्यन्ति मायामेतां तरन्ति ते इति वक्तव्ये, प्रपद्यन्ते इत्युक्तिः अवश्यवक्तव्यार्थान्तरद्योतनार्था । ये मदेकशरणाः सन्तः मां-वासुदेवमतिवेलसुन्दरमनवरतमनुचिन्तयन्तः दिवसानतिवाहयन्ति, ते मत्प्रेममहानन्दसमुद्रमग्नमनस्तया मायागुणविकारैः नाभिभूयन्ते । परंतु, माया वारविलासिनीव क्रोधनतपोधनात् तेभ्योऽपसरति । अतः मायातरणार्थी मामीदृशमनुचिन्तयेत् इत्यपि अभिप्रेतं भगवतः इति पूर्वाचार्याः व्याचक्षते । तथाच आत्मस्वरूपज्ञानावारकत्वं ज्ञाननाश्यत्वं चेति अज्ञानलक्षणद्वयं मायायामपि बोधयतो भगवतः मायाऽविद्ययोरैक्यमभिमतमिति निश्चीयते ।

अथापि स्फुरणरूपे स्वप्रकाशे आत्मनि कथमविद्या घटते, प्रकाशाप्रकाशयोर्विरोधादिति शङ्कोन्मिषति । सा चेत्थं निवर्तनीया । घूकाः दिवसे प्रकाश एव तमोदृष्टिमन्तः दिवान्धाः दृश्यन्ते । तिष्ठतु तिरश्चामनुभवः । अस्माकं मरुप्रदेशस्थितसूर्यमरीचिकासु तोयभ्रमो जायते । न हि मरीचीनामज्ञानेनावरणं विना तोयभ्रमः उदेतुमर्हति । न हि विस्फारितलोचनस्य मरीचीनामज्ञानं घटते । तथापि यस्य संबन्धात् अन्यत्राज्ञानावरणं निवर्तते, तादृशे सूर्यप्रकाशे प्रकाशमाने एवाज्ञानावरणमनुभूयते । तदुक्तं 'मध्याह्नार्कमरीचिकास्विव पयःपूरो यदज्ञानतः ।' इति । अपि च बहुलालोकात् बहिः प्रदेशात् मध्याह्ने गृहान्तरागतानामपवरके तमोबुद्धिरुदेति । तत्र स्थितालोकाज्ञानमालोकावरणं चानुभूयते । एवं, दूरस्थिते वनस्पतिद्वये एको वनस्पतिरिति भ्रमो जायते । वनस्पत्योः भेदः ज्ञात एव । यतः भेदः अधिकरणरूपः । अधिकरणादतिरिक्तत्वे, भेद-भेदोऽपि अतिरिक्तः स्वीकरणीयः इत्यनवस्था स्यात् । तथाच वनस्पत्योः परस्परं भेदः वनस्पतिरूप

एव। वनस्पतिश्च स्फुरित एव। तदात्मकस्य भेदस्य स्फुरितत्वेऽपि अस्फुरितत्वमेवानुभूयते, एकत्वभ्रमदर्शनात्। एवं, अपरिचितप्रदेशे सत्यपि जलचक्षुस्संयोगे, इदं जलं न वेति संशयो जायते। तदुपपादनाय जलस्वरूपाज्ञानं जलज्ञाने सत्यपि वर्तते इत्यङ्गीकरणीयम्। एवं च ज्ञातस्याज्ञातत्वं बहुषु स्थलेषु अनुभवसिद्धमिति स्फुरणरूपस्य स्वप्रकाशस्याप्यात्मनः अविद्याविषयतायां न कोऽपि विरोधः। एतत्सर्वमभिप्रेत्य, **श्रीविद्यारण्यस्वामिपादाः**—

> 'स्वप्रकाशे कुतोऽविद्या तां विना कथमावृतिः।
> इत्यादितर्कजालानि स्वानुभूतिर्ग्रसत्यसौ ॥'

इत्युपादिशन्।

एतावता मायाया आवरणशक्तिः चिन्तिता। विक्षेपशक्तिमद्य चिन्तयामः। मायायां प्रलयकाले वियदादीनां सूक्ष्मरूपाणि संस्कारपदेनाभिधीयमानानि लीनानि सन्ति। सर्गकाले तानि ततो निस्सृत्य स्थूलतया अभिव्यज्यन्ते। तथाच भगवद्गीता—

> 'सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।
> कल्पक्षये, पुनस्तानि कल्पादौ विसृजाम्यहम् ॥'

(भ-गी-9-7) इति।

अत्रेयं मायैव प्रकृतिशब्देनाभिहिता। 'प्रकृतिं-त्रिगुणात्मिकाम्' इति **भगवत्पादभाष्यम्**।

वर्षाकाले जलाधारेषु स्थितानि मण्डूकशरीराणि वर्षापाये तत्रत्यमृद्भावमापन्नानि, पुनः वर्षासु मृदः सकाशात् स्थूलरूपेणाविर्भवन्ति। तथा स्थावरजङ्गमलक्षणं जगत् प्रलये सूक्ष्मरूपेण लीनं सर्गादावाविर्भवतीति मण्डूकमृदुदाहरणेन निरूपयन्ति श्रीवाचस्पतिमिश्राः। 'यथा

वा वर्षापाये प्राप्तमृद्भावानि मण्डूकशरीराणि तद्वासनावासिततया घनाघनासारसुहितानि पुनर्मण्डूकदेहभावमनुभवन्ति। तथा पूर्ववासनावशात् पूर्वसमाननामरूपाण्युत्पद्यन्ते ।' इति **भामती** ।

संकुचित - प्रसारितचित्रपटदृष्टान्तेन प्रलये मायायां संस्काररूपेण स्थितानामनभिव्यक्तिं, सर्गकाले अभिव्यक्तिं च विशदीकुर्वन्ति **श्रीविद्यारण्यस्वामिपादाः** । 'अस्य सत्वमसत्वं च दर्शयति' इति **तापनीयश्रुति**रिममेवार्थमाह ।

'अस्य सत्वमसत्वं च जगतो दर्शयत्यसौ ।

प्रसारणाच्च संकोचाद्यथा चित्रपटस्तथा ।।' (चि-दी-31)

इयं चैतन्यविषयिणी चैतन्याश्रिता चेति तद्बलात् भूतजातं स्वस्मिन् संहरति, विसृजति च । अतः सांख्योक्तत्रिगुणात्मकप्रकृतेर्विलक्षणेयं त्रिगुणात्मिका माया । तदुक्तं **सर्वज्ञात्मश्रीचरणैः—**

आच्छाद्य विक्षिपति संस्फुरदात्मरूपं
जीवेश्वरत्वजगदाकृतिभिर्मृषैव ।
अज्ञानमावरणविभ्रमशक्तियोगात्
आत्मत्वमात्रविषयाश्रयताबलेन ।। (सं. शा 20) इति ।

"आत्मत्वं - सदखण्डैकचैतन्यं, तन्मात्रमेव अश्रयो विषयश्च यस्य, तस्य भावः तत्ता । तद्बलेनेत्यर्थः । अज्ञानस्य हि आत्माश्रयविषयत्वमेव परकीयप्रधानात् बलं शक्तिद्वयाश्रयताप्रयोजकं, न तु स्वतः इति प्रधानाद्विलक्षणमित्यर्थः ।" इति **श्रीमधुसूदनसरस्वतीश्रीचरणानां** टीका ।

चैतन्यप्रतिबिम्बवती चेयं माया जीवमीश्वरं च विभागेन कल्पयति। 'माया चाविद्या च स्वयमेव भवति, जीवेशावाभासेन करोति ।' इति **तापनीयश्रुतिः** । जीवः ईश्वरः प्रपञ्चः इति विभागशून्ये शुद्धे चैतन्ये

अध्यस्ता अनादिः माया सत्वगुणप्राधान्येन, स्वच्छदर्पणः मुखस्य प्रतिबिम्बमिव, चैतन्यस्य प्रतिबिम्बं गृह्णाति । प्रतिबिम्बो जीवः । बिम्बभूतः ईश्वरः । सः मायावशात् जीवस्य भोगाय भोग्यजातं प्रपञ्चं सृजति । मायायां अनेकान्तःकरणसूक्ष्मावस्थारूपाः संस्काराः सन्ति । अतः सा पञ्चभूततन्मात्रद्वारा अन्तःकरणात्मना परिणमते । अन्तःकरणानां स्वच्छत्वात् तेषु चैतन्यप्रतिबिम्बो भवति । सः चिदाभासः इति व्यवह्रियते । **बिम्ब - प्रतिबिम्बानुगतं चैतन्यं साक्षीत्युच्यते ।** तेनैव माया तत्कार्यं च प्रकाश्यते ।

दर्पणस्थः चैत्रप्रतिबिम्बः स्वं परं वा न जानाति। अचेतनशरीरांशस्य दर्पणे प्रतिबिम्बितत्वेनाचेतनत्वात् न तस्य ज्ञानवत्ता घटते। मायायां अन्तःकरणेषु च चितः प्रतिबिम्बः नाचेतनः । प्रतिबिम्बो नाम न बिम्बातिरिक्तः पदार्थः । अपितु बिम्बमेव । परंतु तत्र दर्पणाद्युपाधौ वर्तमानता कल्पिता । एवं च चित्प्रतिबिम्बः चेतनः इति तस्य ज्ञातृता । जले प्रतिबिम्बितः सूर्यः यथा स्वोपाधिभूतजलादिगतकम्पादिकमनुभवति, तथा बिम्बैक्यज्ञानोदयपर्यन्तं प्रतिबिम्बो जीवः स्वोपाधिगतमनर्थसहस्रमनुभवति । स च परिच्छिन्नः इन्द्रियादिना स्वसंबद्धं कञ्चिदेव जानातीति किञ्चिज्ज्ञो भवति । 'तस्मान्मायी सृजते विश्वमेतत्, तस्मिंश्चान्यो मायया संनिरुद्धः' । इति श्वेताश्वतरश्रुतिर्ब्रूते ।

एवं माया स्वातन्त्र्येण, निर्विभागं चैतन्यं द्वेधा विभज्य, जीवस्य भोग्यं चोत्पाद्य तस्य भोगादिना संसारबन्धक्लेशं करोतीति दुर्घटकारिणी माया । जलस्य शैत्यमिव मायाया दुर्घटकारित्वं स्वभावः इति न तत्र विस्मयः कर्तव्यः इति श्रीविद्यारण्यस्वामिपादाः निरूपयन्ति ।

कूटस्थमनुपद्रुत्य करोति जगदादिकम् ।
दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः ।। (चि-दी. 34)
द्रवत्वमुदके, वह्नावौष्ण्यं काठिन्यमश्मनि ।
मायाया दुर्घटत्वं च स्वतः सिद्ध्यति नान्यतः ।। (चि-दी-35)
न वेत्ति लोको यावत्तां साक्षात्तावच्चमत्कृतिम् ।
धत्ते मनसि पश्चात्तु मायैवेत्युपशाम्यति ।। (चि-दी-36)

परमानन्दरूपं दुःखिजीवमकरोत् इत्यंशं **श्रीकृष्णमिश्राः** सचमत्कारं 'जगत्प्रभुर्दीनदशामनीयत' इति प्रतिपादयन्ति ।

इत्थं दुर्घटकारिणी माया जडा । 'जडं मोहात्मकम्' इति तापनीयश्रुतिः । तस्याः स्फुरणं साक्षिचैतन्याधीनम् । साक्षिभास्याऽपि माया स्वभासकं साक्षिणमावृणोति - असन्तमिव करोति । मायाया आवारकत्वप्रतिपादनावसरे 'नीहारेण प्रावृताः' इति श्रुतिः मायां नीहारशब्देन ब्रूते । नीहारः हिमः । सूर्योदयात्प्रागपि सन् प्रकाशाभावान्न स्फुरति । उदिते सूर्ये स्फुरति । परन्तु स्वभासकं सूर्यप्रकाशमावृणोति । तत्सदृशी चेयं माया साक्षिचैतन्येन भासमाना साक्षिणमावृणोति । अतः स्योपजीव्यप्रच्छादकतया दुष्करकार्यकारिणी माया । तदुक्तं **सुरेश्वराचार्यैः**—

'यत्प्रसादादविद्यादि सिद्ध्यतीह दिवानिशम् ।
तमप्यपह्नुतेऽविद्या नाज्ञानस्यास्ति दुष्करम् ।।' इति ।

'तम आसीत्' इत्यादिश्रुतिषु तमःशब्देन चेयं माया अभिधीयते । तमोरूपः राहुः आकाशे स्थितः स्वयं न भासते । चन्द्रोपरागे सति, राहुणैवावृतेन चन्द्रेण भासते । स्वावृतचन्द्रप्रकाश्यराहुवत्, अविद्या स्वावृतचैतन्यप्रकाश्या इत्यपि वदन्ति ।

एवंच असङ्गाद्वितीयचैतन्ये जीवेयजगद्भेदादिकं, जीवात्मनाऽवस्थितिं विविधबाधनायोगादिकं च ब्रह्मचैतन्यस्वरूपानुपमर्देन कुर्वती माया स्वतन्त्रेति भाति। स्वस्फुरणस्यैव साक्षिमुखनिरीक्षणादस्वतन्त्रेत्यपि भाति। 'स्वतन्त्रास्वतन्त्रत्वेन' इति तापनीयश्रुतिः।

'अस्वतन्त्रा हि माया स्यादप्रतीतेर्विना चितिम्।
स्वतन्त्राऽपि तथैवस्यादसङ्गस्यान्यथाकृतेः॥'

इति **श्रीविद्यारण्यश्रीचरणाः।**

माया चेयं न परमार्थसती। 'क्षरं प्रधानममृताक्षरो हरः' इति श्रुतौ प्रधानशब्दोदितमायायाः ब्रह्मतत्वज्ञामबाध्यत्वरूपस्य क्षरत्वस्य बोधनेन अबाध्यत्वरूपसत्त्वायोगात्। नापि शशश्रृङ्गादिवदसती निःस्वरूपा। प्रत्यक्षप्रतीतिविषयत्वात्। नापि सदसती, सत्वासत्वयोर्विरुद्धयोरेकत्रासमावेशात्। अतः सदसद्विलक्षणा अनिर्वचनीया मिथ्याभूतैव। यत् स्पष्टं भासते, स्वरूपकारणादिविचारं च न सहते सा माया इति, ऐन्द्रजालिकप्रदर्शितपदार्थेषु लोकाः मायाशब्दं प्रयुञ्जते।

'ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि।
तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः॥'

इति **भागवतस्मृतिश्च** मिथ्यात्वमेव मायापदप्रवृत्तिनिमित्तमाह। अर्थमृतेअर्थं विना - अर्थाभाववति यत् प्रतीयेत, तत् मायां विद्यात्। स्वाभाववति प्रतीयमानं मायापदार्थं जानीयात्। स्वप्रकारकप्रतीतिविशेष्ये विद्यमानाभावप्रतियोगित्वं मायात्वमित्युक्तं भवति।

मायामृगं दयितयेप्सितमित्यादौ मिथ्यार्थे एव मायापदं प्रयुज्यमानमस्ति। न च मिथ्यात्वस्य मायापदबोध्यत्वे शुक्तिरूप्यं माया इति प्रयोगापत्तिरिति वाच्यम्। सर्वोऽपि व्यापारः दुःखकर एव। अत

एव कष्टं कर्मेति वदन्ति । तथापि लौकिकाः भोजनादिव्यापारे कष्टपदं न प्रयुञ्जते । विजातीयदुःखविशेषजनके एव तथा व्यवहारो लौकिकानाम् । एवं शुक्तिरूप्यस्य मृषात्वान्मायात्वेऽपि विचित्रकार्यकारिणि मिथ्याभूते एव लौकिकानां मायाशब्दप्रयोगः । वस्तुतस्तु, वज्रादीनां पृथिवीत्वेऽपि तत्र पृथिवीत्वव्यञ्जकज्ञानविधुराः पृथिवीति न व्यवहरन्ति । व्यञ्जकज्ञानवन्तस्तु पृथिवीति व्यवहरन्ति । एवमेव शुक्तिरूप्यादेः मिथ्यात्व - मायात्वव्यञ्जकज्ञानवन्तः शुक्तिरूप्यं मायेति व्यवहरन्त्येव । अत एव **सांख्यप्रवचने**—'यत्तु दृष्टिपथं प्राप्तं तन्मायैव सुतुच्छकम्' इति दृश्यसामान्ये एव मायापदं प्रयुक्तमस्ति ।

माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद ।
सर्वभूतगुणैर्युक्तं मैवं मां ज्ञातुमर्हसि ।।

इत्यादावितिहासे च मिथ्यार्थे मायापदं प्रयुक्तं बोध्यम् । मायायाः अनिर्वचनीयत्वे, 'नासदासीत् नो सदासीत्तदानीम् ... तम आसीत्' इति श्रुतिः प्रमाणम् । प्रलये सदपि नासीत् असदपि नासीदिति सदसती निषिध्य, तम आसीत् इत्युक्त्या सदसद्विलक्षणा तमश्शब्दाभिधेया माया आसीदित्युक्तत्वात् ।

'नासद्रूपा न सद्रूपा माया नैवोभयात्मिका ।
अनिर्वाच्या ततो ज्ञेया मिथ्याभूता सनातनी ।।'

इति **बृहन्नारदीयपुराणवचनं** मायायाः स्पष्टमेव सदसद्विलक्षणत्वमनिर्वचनीयत्वं बोधयति । 'अनृतेन प्रत्यूढाः' इति छान्दोग्योपनिषत् अनृतपदेन मायां व्यवहरति ।

शास्त्रार्थविवेकवतामपि मायेयं भ्रममुत्पादयति । विधिहरिहरेषु भेदबुद्ध्या वैषम्यबुद्धिमतः पण्डितान् पश्यामः । तत्सर्वं दुर्घटकारिण्याः मायायाः चेष्टितमेव । तथाऽऽहुः भगवत्पादाः—

विधिहरिहरभेदमप्यखण्डे बत विरचय्य बुधानपि प्रकामम् ।
भ्रमयति हरिहरभेदभावानघटितघटनापटीयसी माया ।। इति ।

ज्ञानवासिष्ठे मायास्वरूपमतिसमीचीनया पद्धत्या निरूपितमास्ते—

न लक्ष्यते स्वभावोऽस्याः प्रेक्ष्यमाणैव नश्यति ।
विवेकमाच्छादयति जगन्ति जनयत्यलम् ।
न च विज्ञायते कैषा पश्याश्चर्यमिदं जगत् ।
अप्रेक्ष्यमाणा स्फुरति प्रेक्षिताऽनुविनश्यति ।
मायेयमपरिज्ञायमानरूपैव वल्गति ।। इति ।

तदेवं संक्षेपेण मायायाः स्वरूपं चिन्तितम् । विमुक्तिं चिन्तयामः । प्रधान - अक्षर - योनि - अव्यक्त - शक्ति - अविद्या - अज्ञान - तमः प्रभृति-शब्दैः श्रुतिषु व्यवह्रियमाणेयं मायैव बन्धः, तन्निवृत्तिरेव मोक्षः । तदुक्तं - 'अविद्यास्तमयो मोक्षः सा च बन्ध उदाहृतः ।' इति । अत्र, अहमर्थो बन्धाश्रयः, स च मोक्षे नास्ति केवला चिदेव वर्तते इति बन्धमोक्षयोर्वैयधिकरण्यशङ्का न प्रसरति । चित एवाविद्यारूपबन्धाश्रयत्वात्, मुक्तिदशायामपि तस्या एवाविद्यानिवृत्त्याश्रयत्वात् ।

ननु अनादिमायायाः निवृत्तिरेव न संभवति । घटस्योत्पत्तौ सत्यामनादिः घटप्रागभावो निवर्तते । तथा अनादिरपि माया निवर्ततामित्युक्तिः न समञ्जसा । भावभूतस्यानादेः क्वापि निवृत्तेरदर्शनादिति चेन्न ।

प्रागभावस्यापि स्वरूपसत्तारूपभावत्वाक्रान्तत्वात् तद्दृष्टान्तेन मायाया निवृत्तेरुपपत्तेः । अनादिभावस्य निवृत्तेरयोगः इत्यत्र भावत्वं अबाध्यत्वादिसत्तायोगित्वं विवक्षितमिति यद्युच्यते, तदा सदसद्विलक्षणायां मायायां सत्तायोगित्वरूपं भावत्वं नास्तीति तस्या निवृत्तौ न काप्यनुपपत्तिः ।

वस्तुतस्तु, अनाद्यभावस्य अत्यन्ताभावस्य नाशादर्शनात् प्रागभावस्यापि अनाद्यभावस्य नाशो न स्यात् । यदि च प्रागभावस्य नाशाभावे घटाद्युत्पादकव्यापारवैयर्थ्यं स्यादिति, अनाद्यभावस्यापि प्रागभावस्य नाशोऽङ्गीक्रियते इत्युच्यते, तदा अनादेर्भावस्य नाशादर्शनेऽपि प्रमाणव्यापारवैयर्थ्यापत्त्या अनादिभावस्यापि अज्ञानस्य नाशः स्वीक्रियते । तस्मात् अनाद्यभावत्वं यथा नाविनाशप्रयोजकं, तथा अनादिभावत्वमपि नाविनाशित्वे प्रयोजकम् । नापि जन्यत्वस्य विनाशित्वप्रयोजकता, जन्यस्य ध्वंसस्याविनाशित्वात् । परंतु विरोधिसामग्रीसंनिपात एव विनाशप्रयोजकः इति ध्येयम् ।।

मुक्तिश्च ब्रह्मात्मैक्यसाक्षात्कारात् भवति । 'तत्र को मोहः कः शोकः एकत्वमनुपश्यतः' । इति **ईशावास्योपनिषत्** एकत्वसाक्षात्कारवतः शोकमोहोपलक्षितसंसारबन्धमोक्षं ब्रूते । **तैत्तिरीयश्रुतिः** 'उदरमन्तरं कुरुते अथ तस्य भयं भवति' इति वाक्येन भेदज्ञानात् संसारभयप्राप्ति, 'यदा त्वेतस्मिन्नदृश्ये ... प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति' । इति वाक्येन ब्रह्मणि स्वाभेदज्ञानात् अभयप्राप्ति - मोक्षप्राप्ति च प्रतिपादयति । 'आत्मानमेवावेदहं ब्रह्मास्मीति, तस्मात् तत् सर्वमभवत् ।' इति **बृहदारण्यकं** ब्रह्मात्मैकत्वज्ञानात् सर्वभावरूपं मोक्षं शास्ति ।

'तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनम् ।
ज्ञाने त्वनाहृते तस्मिन् सर्वं ब्रह्ममयं भवेत् ।।'

इति **बृहन्नारदीयम्**— महावाक्यजन्यज्ञानस्य मोक्षसाधनत्वं घोषयति ।

अत्रेयं शङ्का प्रसरति - अहं ब्रह्मास्मीति साक्षात्कारः ब्रह्मविद्यापदाभिधेयः मायापरिणामत्वादविद्यामय एव, तस्य परमार्थसत्यत्वे अद्वैतहानेः । सः कथं स्वोपादानाविद्यां नाशयेत्, अविद्या वा स्वविरोधिनं साक्षात्कारं जनयेदिति ।

सा चेत्थं निरसनीया । स्वप्ने पर्यापतन्तो व्याघ्रादयो दृश्यन्ते । ते चापारमार्थिकाः अविद्यामयाः । ते चाकुलतामुत्पाद्य स्वप्नदृशं पुरुषं समुत्थापयन्ति । अविद्यामया व्याघ्रादयः पुरुषोत्थापनेन स्वोपादानाविद्यानिवर्तका भवन्ति । तद्वत् अविद्यया जनितोऽपि साक्षात्कारः सत्यविषयकः स्वोपादानाविद्यां नाशयेत् । अविद्याकार्यसाक्षात्काररूपविद्यया अविद्यानिवृत्तिश्च—

'विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।।'

इति मन्त्रवर्णेन प्रतिपादिता । विद्यां - ब्रह्मसाक्षात्काररूपान्तःकरणवृत्तिं, अविद्यां च - तदुपादानाविद्यां चेत्युभयं, सह - कार्यकारणभावेन सहितं यो वेद - जानाति, सः अविद्यया - अविद्योपादानकतया अविद्यारूपया साक्षात्कारात्मकवृत्त्या, मृत्युं - संसारबन्धकारणीभूतां स्वोपादानाविद्यां तीर्त्वा - नाशयित्वा, विद्यया - स्वरूपचैतन्यरूपविद्यया, उपलक्षणे तृतीया । तादृशविद्योपलक्षितं, अमृतं - मोक्षमाप्नोति इति मन्त्रवर्णार्थो बोध्यः ।

एवं श्रवणादिकमनुष्ठितवतः परमेश्वरप्रसादाज्जाता अहं ब्रह्मास्मीति साक्षात्कारवती ब्रह्मविद्या स्वसमानविषयकाविद्यां बन्धकारणीभूतां मायां निवर्तयति, ज्ञानेन स्वसमानविषयकाज्ञाननाशस्य सर्वानुभवसिद्धत्वात् । मायाया अपाये तन्निबन्धनबन्धस्यापायो भवति ।

अग्निर्यथा इन्धनानि दग्ध्वा स्वयं शाम्यति, तथा विद्या अज्ञानं तत्कार्यं च विनाश्य स्वयमपि नश्यति । रोगनाशाय पीतमौषधं रोगं विनाश्य स्वयमपि नश्यति, कालुष्यनिवृत्तये जले प्रक्षिप्तं कतकरजः जलगतं कालुष्यं विनाश्य स्वयमपि नश्यति, तद्वत् ज्ञानमज्ञानतत्कार्यं

विनाश्य स्वयं नश्यतीति सुबोधान्युदाहरणानि पूर्वाचार्याः निरूपयन्ति। एवमेकत्वसाक्षात्कारेणाविद्यायां निवृत्तायां तत्कार्याणामपि निवृत्तौ अद्वितीयाखण्ड स्वप्रकाश परिपूर्णानन्दात्मनाऽवस्थानमेव मोक्षः। न च मुक्तौ अविद्यानिवृत्तेः सत्वात् तथा सद्वितीयत्वात् ब्रह्मणः अद्वैतहानिः इति शङ्कनीयम्। तस्याः ज्ञातात्मरूपतया ब्रह्मातिरिक्तत्वाभावात्।

न च ज्ञानस्य नाशानन्तरं ज्ञानविषयीभूतस्वात्मरूपमुक्तेरवस्थानं न स्यादिति वाच्यम्। ज्ञातत्वोपलक्षितात्मन एवाविद्यानिवृत्तिरूपत्वात् ज्ञानात्पूर्वं नात्मा ज्ञातत्वोपलक्षितः। 'निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः' इति श्रीसुरेश्वराचार्यवार्त्तिकम्।

साक्षात्कारेणाविद्याया निवृत्तौ, तत्कार्यशरीरादिस्थितेरयोगात् उपदेष्टुः ज्ञानिनोऽभावात् असांप्रदायिकमिदं शास्त्रं स्यादिति न चोदनीयम्। तत्त्वसाक्षात्कारानन्तरं सत्संपत्तौ देहपातः विलम्बोऽस्ति। भोगेन प्रारब्धकर्मक्षये देहपातानन्तरं सत्संपत्तिः (परममुक्तिः) भवति इति 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये। अथ संपत्स्ये।' इति छान्दोग्यश्रुतिः बोधयति। तत्त्वसाक्षात्कारानन्तरमपि प्रारब्धकर्माधीनदेहसंबन्धोऽस्ति। स एव तत्त्वज्ञानेन निवृत्ताविद्योऽपि अनुवृत्तदेहादिप्रतिभासः जीवन्मुक्तः इत्युच्यते। स एव शास्त्रार्थोपदेष्टा आचार्यः इति नासांप्रदायिकं शास्त्रं भवति। रज्ज्वां सर्पभ्रमात् भयकम्पादिकं जायते। निवृत्तेऽपि भ्रमे कञ्चित् कालं तदीयसंस्कारवशात् भयादिकमनुवर्तते। चक्र - दण्डसंयोगेन चक्रभ्रमणं जायते। दण्डसंयोगे कारणे निवृत्तेऽपि संस्कारात् भ्रमणमनुवर्तते। एवं देहादिहेतोरविद्याया नाशेऽपि अविद्यासंस्कारवशात् देहादिकार्यानुवृत्तिः संभवति। न च संस्कारः, देहः, प्रारब्धकर्मेत्यादिकमध्यस्तं, तच्च स्वोपादाने एव तिष्ठति। तथाच संस्कारदेहादेः स्थित्यर्थं तदुपादानाविद्या अपेक्षितैवेति कथमुपा-

दानाविद्यानाशेऽपि तेषां स्थितिः संभाव्यते इति वाच्यम् । यत्र तन्तुनाशेन पटनाशः, तत्र तन्तुनाशक्षणे पटोऽस्ति । तन्तुनाशकाले तन्तोरभावेन विनश्यदवस्थः पटः क्षणमुपादानं विनैव तिष्ठति इति नैयायिका वदन्ति । एवमुपादानाविद्यानाशे विनाऽप्युपादानं देहादिकं चिरानुवृत्तं कञ्चित्कालं तिष्ठतीति युज्यते । अथवा, यागस्य स्वर्गसाधनताबोधकश्रुतिबलात् यागसूक्ष्मावस्थारूपमपूर्वं चिरध्वस्तस्य यागस्य स्वर्गाव्यवहितपूर्ववर्तितानिर्वाहकं कल्प्यते । एवं, 'तस्य तावदेव चिरम्', 'भूयश्चान्ते विश्वमायानिवृत्तिः' 'विमुक्तश्च विमुच्यते' इत्यादिजीवन्मुक्तिबोधकशास्त्रबलात्, ज्ञानेनाविद्याया निवृत्तावपि अविद्यासूक्ष्मावस्थारूपलेशः देहादिप्रतिभासानुकूलः कल्प्यते । तस्मात् निवृत्ताविद्यस्यापि सूक्ष्मावस्थारूपाविद्यालेशात् देहादेरनुवृत्तिरुपपद्यते ।

जीवन्मुक्तः स्वरूपानन्दमनुभवति । प्रपञ्चं मिथ्यात्वेन पश्यति । तदुक्तमात्मविद्याविलासे—

'सवितर्यपि शीतरुचौ चन्द्रे तीक्ष्णेऽप्यधोवहत्यग्नौ ।
मायिकमिति जानन् जीवन्मुक्तो न विस्मयी भवति ।।' इति ।

जीवन्मुक्तः कदाचित् समाधिस्थो भवति । तदा परिपूर्णतमानन्दमनुभवति । समाधेः व्युत्थितः बहिः व्यवहरति । तस्मिन्नपि समये, परपुरुषसंभोगाभिनिवेशवती नारी गृहकार्यकरणदशायामपि परसङ्गरसायनमिव, अन्ते परब्रह्मानन्दमनुभवन्नेवास्ते इति ज्ञानवासिष्ठं बोधयति ।

'परव्यसनिनी नारी व्यग्रापि गृहकर्मणि ।
तदेवास्वादयत्यन्तः परसङ्गरसायनम् ।।

एवमेव परे तत्वे धीरो विश्रान्तिमागतः ।
तदेवास्वादयत्यन्तः बहिर्व्यवहरन्नपि ।।' इति ।

आत्मानन्दानुभवपरवशः जीवन्मुक्तः कदाचित् कुत्रचिद्देशे गायति, कुत्रचित् नृत्यति इति, स्वीयवृत्तनिवेदनमुखेनैव **श्री सदाशिवब्रह्मेन्द्रसरस्वत्यः अस्मान् बोधयन्ति** ।

'तिष्ठन् परत्र धाम्नि स्वीयसुखास्वादपरवशः कश्चित् ।
क्वापि ध्यायति कुहचिद् गायति कुत्रापि नृत्यति स्वैरम् ।।'
(आ.वि.विलासः) इति ।

एवं भासमानं प्रपञ्चं मिथ्यात्वेनानुसन्दधानः प्रारब्धकर्मणा प्राप्तान् विषयान् रागद्वेषरहितोऽनुभवति । तेन भोगेन प्रारब्धकर्मणः क्षये अन्ते वेदान्तवाक्यजन्यचरमसाक्षात्कारेण सूक्ष्मावस्थारूपस्याविद्यालेशस्यापि निवृत्तेः सर्वमायानिवृत्तिः भवति । संचितकर्माणि पूर्वोत्पन्नसाक्षात्कारेण निवृत्तानि । प्रारब्धं कर्मापि भोगेन निवृत्तम् । मायायाः सर्वथा निवृत्तेः किमपि कार्यं न जायते । प्राणाः अत्रैव समवनीयन्ते । स च विदेहकैवल्यभाक् भवति । 'सलिल एको द्रष्टा अद्वैतो भवति' । सलिलवत् स्वच्छः सजातीय - बिजातीय - स्वगतभेदरहितदृशिमात्ररूपो भवति । अत्र, पूर्वं दृष्टेः अन्तःकरणवृत्तिरूपाया अनित्यदृष्टेः कर्ता द्रष्टा (साक्षी) आसीत् । इदानीं अद्रष्टा भवति केवलं दृष्टिस्वरूपः संपद्यते इति अद्रष्टा इति पदच्छेदेनापि व्याचक्षते पूर्वाचार्याः ।

इदमत्रावधेयम् — अश्रुतवेदान्तानां पुंसां प्रपञ्चे पारमार्थिकत्वभ्रमः । श्रुतवेदान्तानामनुत्पन्नतत्त्वसाक्षात्काराणां व्यावहारिकत्वभ्रमः । उत्पन्नब्रह्मसाक्षात्काराणां पुरुषधौरेयाणां वसिष्ठ-वामदेव-याज्ञवल्क्यादीनां यावद्देहपातं प्रातिभासिकत्वभ्रमः । एवमविद्यायां तत्त-

द्भ्रमानुकूलाः तिस्रः शक्तयः सन्ति । शास्त्रेण नश्येत् परमार्थबुद्धिः, कार्यक्षमं नश्यति चापरोक्षात्, प्रारब्धनाशात् प्रतिभासनाशः इति वदन्ति । प्रारब्धकर्मणः भोगेन क्षये देहपातसमये जातात् तत्त्वसाक्षात्कारात् पूर्वोक्तसर्वशक्तिविशिष्टमायाया निवृत्तिः । 'तस्याभिध्यानात् योजनात् तत्त्वभावात् भूयश्चान्ते विश्वमायानिवृत्तिः' इति श्वेताश्वतरश्रुतिः। अत्र भूयः विश्वमायानिवृत्तिः इत्यन्वयः स्वरससिद्धः। तत्त्वभावात् इत्यस्य ब्रह्मसाक्षात्कारादित्यर्थः । तत्त्वं-ब्रह्म, भावः-साक्षात्कारः । भू प्राप्तावित्यनुशासनात् प्राप्तिः धात्वर्थः। ब्रह्मणश्च अज्ञानवशादप्राप्तस्य प्राप्तिः साक्षात्कार एव । तस्मादेव, अन्ते भोगावसाने भूयः - पुनः विश्वमायानिवृत्तिः - अवशिष्टशक्तिमन्मायातत्कार्यादिसर्वमायानिवृत्तिः इत्यर्थः, इति **श्रीब्रह्मानन्दसरस्वतीस्वामिपादाः** निरूपयन्ति इति ॥

तथाच निवृत्तसर्वमाय - स्वप्रकाशपरिपूर्णानन्दात्मकब्रह्मरूपेणावस्थानं विदेहकैवल्यं परममुक्तिरिति सिद्धम् ॥

ननु अविद्यानिवृत्तेः कथं पुरुषार्थता? सुखदुःखाभावेतरत्वात् । अविद्यानिवृत्तेः ज्ञातत्वोपलक्षितब्रह्मरूपत्वात् ब्रह्मणश्चानन्दरूपत्वात् पुरुषार्थता इत्यपि न युज्यते । अन्यपुरुषस्यानन्दः नान्यस्य पुरुषार्थः । अपितु स्वसंबन्धितया भासमान एवानन्दः स्वस्य पुरुषार्थो भवति । विदेहकैवल्ये विश्वमायानिवृत्तेः आनन्दविषयकवृत्त्यात्मकसाक्षात्कारस्याभावेन स्वीयत्वेन भासमानानन्दाभावेन पुरुषार्थता अयुक्ता इति चेन्न । दुःखाभावस्येव दुःखसाधनाभावस्यापि पुरुषार्थता नव्यनैयायिकैरिष्यते । ते हि आत्यन्तिकं दुःखजनकदुरितध्वंसं मुक्तिपुरुषार्थमभ्युपगच्छन्ति । तथैवास्मन्मतेऽपि अविद्यायाः दुःखजनकत्वात् तन्निवृत्तेः दुःखजनकाभावतया पुरुषार्थता युज्यते ।

वस्तुतस्तु, अविद्योच्छेदोपलक्षितः पूर्णानन्दरूप आत्मा मोक्षः। साक्षात्क्रियमाण आनन्दः पुरुषार्थः। तत्त्वं च न वृत्तिविषयत्वं, किन्तु अनावृतत्वम्। चैत्रस्यानन्दः मैत्रं प्रत्यावृतः। अतो न चैत्रानन्दस्य मैत्रं प्रति पुरुषार्थता। साध्यत्वमिव स्वीयत्वेन प्रतिभासमानत्वमपि न पुरुषार्थत्वशरीरप्रविष्टम्। मुक्तात्मनि स्वप्रकाशे पूर्णानन्दे विश्वमाया-निवृत्त्या आवरणसामान्याभावसत्त्वेन पुरुषार्थता अक्षुण्णैवेति, तादृगा-नन्दात्मरूपाविद्योच्छेदेऽपि पुरुषार्थता अव्याहतेति सर्वं सुस्थम्॥

जगद्गुरुनिदेशेन सुब्रह्मण्येन निर्मितम्।
निरूपयन्तं याथात्म्यं मायामुक्त्योः समासतः॥ (1)

लघुलेखमिमं प्रेक्ष्य स्नेहपूरितया दृशा।
सन्तो मामनुगृह्णन्तु सद्गुरुश्च प्रसीदतु॥ (2)

इति माया-विमुक्तिस्वरूपनिरूपणं नाम सप्तमं प्रसूनं समाप्तम्

उत्तमदृष्टिः

अष्टमं प्रसूनम्

ललितैः पदविन्यासैः या नृत्यति विबुधवदनरङ्गेषु ।
सच्छास्त्रवेदवाद्यैः सरस्वतीं तां नमस्यामः ।।
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ।।

परमपुरुषार्थो मोक्षः अद्वैतात्मसाक्षात्कारेण लभ्यते । अद्वैतात्मभावो मोक्षः । 'शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः' (मा-7) 'एकधैवानुद्रष्टव्यम् (बृ-6-4-20) 'सलिल एको द्रष्टाऽद्वैतो भवति' (नृ. 6-3-32) 'तत्र को मोहः कः शोकः एकत्वमनुपश्यतः' (ईश. 7) इत्यादिश्रुतेः ।

तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनम् ।
ज्ञाने त्वनाहते तस्मिन् सर्वं ब्रह्ममयं भवेत् ।। (बृहन्नारदीयम्)

अहमेव परं ब्रह्म वासुदेवाख्यमव्ययम् ।
इति स्यान्निश्चितो मुक्तः बन्धवानन्यथा भवेत् ।।
(वररुचिस्मृतिः)

अत्रात्मव्यतिरेकेण द्वितीयं यो न पश्यति ।
ब्रह्मभूतः स एवेह दक्षपक्ष उदाहृतः ।। (दक्षस्मृतिः)

इत्यादिकानि स्मृतिवचनानि च पूर्वोक्तश्रुत्यर्थमुपबृंहयन्ति । अद्वैतात्मबोधसिद्धये च तत्तदधिकारिभेदेन विभिन्नाः प्रक्रियाः विरचिता पूर्वाचार्यैः ।

यया यया भवेत्पुंसः व्युत्पत्तिः प्रत्यगात्मनि ।
सा सैव प्रक्रिया ज्ञेया साध्वी सा चानवस्थिता ।।

तत्रैका सृष्टदृष्टिप्रक्रिया मध्यमाधिकारिणां सुबोधा । अपरा दृष्टिसृष्टिप्रक्रिया अतिशुद्धान्तःकरणानामुत्तमाधिकारिणां सुबोधा । ब्रह्मैवैकं परमार्थसत् । सत्त्वं नामाबाध्यत्वम् । परमार्थसत्वं नाम त्रिकालाबाध्यत्वम् । अनवच्छिन्नो बाधाभावः इति यावत् । व्यवहारकाले - मुक्त्युपधायकात्मतत्वसाक्षात्कारात् पूर्वकाले अबाध्यं घटादि द्वैतजातं व्यावहारिकसत् । व्यवहारकाले एव, इयं शुक्तिः नेदं रजतमित्यादिज्ञानेन बाध्यं शुक्तिरजत - स्वाप्नगजादिकं प्रातिभासिकसत् । एवं पारमार्थिक-व्यावहारिक-प्रातिभासिकभेदेन सत्ता त्रिविधा । व्यावहारिकमाविद्यकं घटादिकं अस्मद्दृष्टेः— अस्मदीयदर्शनात् प्रागपि स्वकारणैः उत्पन्नं विद्यमानमेव तत्तदिन्द्रियसंनिकर्षादिना कारणेन दृश्यते । व्यावहारिकं प्रातिभासिकं चेति द्विविधमपि द्वैतं मिथ्यैव । अद्वैतं ब्रह्मैव परमार्थसत्यमिति सृष्टदृष्टिप्रक्रिया । ब्रह्मभिन्नं द्वैतजातं सर्वमपि प्रातीतिकमेव । तथाहि - मिथ्याभूतं शुक्तिरजतं, इदं रजतमिति प्रतिभासात् पूर्वं नासीत् । शुक्तितत्वाज्ञानेन यदा रजतप्रतिभासः तदेव जायते, यावत् प्रतिभासमनुवर्तते - प्रातिभासिकमिति यावत् । तच्च निरुपाख्यात् नरशृङ्गादेः तुच्छाद्विलक्षणम्, सदिदं रजतमिति सत्वेन प्रतीयमानत्वात् । तस्य सृष्टिः तद्दृष्टिसमसमया इति यथा स्वीक्रियते, तथैव ब्रह्माज्ञानात् यदा अयं घटः इत्यादिदृष्टिर्जायते, तदैव घटादिरपि सृज्यते । स च यावत्प्रतिभासमनुवर्तते । सन् घटः इति

प्रतीयमानत्वादसद्विलक्षणश्च। दृष्टेः पूर्वं नासीत्, तदा सत्वे माना-भावात्। ब्रह्मभिन्नं द्वैतजातं प्रातिभासिकमेव। दृष्टिसमसमया सृष्टिः दृष्टिसृष्टिः। सृज्यमानः ज्ञातैकसत्ताकः नाज्ञातसत्ताकः—नाज्ञायमानं ज्ञानोदयात्पूर्ववर्ति। यदा घटः तदा तज्ज्ञानमिति, यदा घटः तदा तदज्ञानाभावः इति च कालिकेन संबन्धेन ज्ञानार्थयोः अज्ञानाभावार्थयोश्च व्याप्यव्यापकभावः। एवंच स्वज्ञानव्याप्यत्वं, स्वाज्ञानाभावव्याप्यत्वं वा दृष्टिसृष्टिः इति निष्कर्षः। न च वियदादि-प्रपञ्चस्य प्रातिभासिकत्वे 'आकाशाद्वायुः' इति आकाशात् वायूत्पाद-बोधकश्रुतेरत्यन्ताप्रामाण्यं स्यादिति वाच्यम्। सृष्टदृष्टिपक्षेऽपि पूर्वोक्त-वाक्यानां पारमार्थिकप्रामाण्यं नाङ्गीक्रियते। अस्मत्पक्षे तु स्वाप्ना-र्थानां दण्डघटादीनां कार्यकारणभावबोधकस्वाप्नवाक्यतुल्यतैव स्वीक्रि-यते। न च वेदस्याप्रामाण्ये क्व समाश्वास इति वाच्यम्। 'सर्वे वेदा यत्पदमामनन्ति' (का-2-15) इति श्रुतेःसर्ववेदानां अद्वितीयब्रह्मण्येव परमतात्पर्येण तत्राप्रामाण्यविरहात्। अर्थवादानामिव यथाश्रुतार्थेऽ प्रामाण्येऽपि क्षत्यभावात्। न च शुक्तिरजत-स्वाप्नगजादिवत् घटादि-प्रपञ्चस्यापि प्रातिभासिकत्वे, घटादिज्ञानं प्रमा, शुक्तिरजतादिज्ञानं भ्रमः इति व्यवस्था नोपपद्येत इति शङ्कनीयम्। दृष्टिसृष्टेरज्ञाने सति यावत्व्यवहारकालं न यस्य बाधः, तद्विषयकत्वमेव तत्प्रमात्वम्, तद्विपरीतं भ्रमत्वमिति व्यवस्थाया अभिमतत्वादिति दृष्टिसृष्टि-प्रक्रिया।

अत्र प्रमाणानि चिन्तयामः।

बृहदारण्यके अजातशत्रुब्राह्मणे प्राणादीनां सृष्टिबोधिका, 'एव-मेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे वेदाः सर्वाणि भूतानि सर्व एते आत्मानः व्युच्चरन्ति'। (बृ. 4-1-20) इति श्रुतिः दृष्टि-सृष्टौ प्रमाणम्। इयं हि श्रुतिः सुप्तोत्थितात् जीवात् प्राणादि-

सृष्टिं ब्रूते । सुषुप्तिकाले प्राणादीनां सत्वे नोत्थिततादात्मनः सृष्टिर्घटते । अतस्तदानीं तेषां स्थित्यभावो वाच्यः । स च न दृष्टिसृष्टिं विना संगच्छते । न च सुप्तिकालेऽपि पार्श्वस्थैः प्राणादयो दृश्यन्ते इति तेषामभाव इति न शङ्का कार्या । यतः 'न तु तद्द्वितीयमस्ति ततोऽन्य-द्विभक्तं यत्पश्येत्' (बृ-6-3-16) इति श्रुतौ अविशेषेण सर्वद्वैतविलयः सुषुप्तौ श्रूयते । सुप्तिकाले भोगप्रदकर्मविरामात् सुप्तस्य भोगाभावात् सुप्तपुरुषभोगप्रदप्राणेन्द्रियादिलयः समुचित एव । अतः आञ्जस्येनोप-पद्यमाना श्रुतिः न क्लेशेन नेतुमुचिता । पार्श्वस्थैः दृश्यमानः प्राणादिस्तु पार्श्वस्थपुरुषीयदृष्टिसृष्टिः प्रपञ्चः, न सुप्तपुरुषीयः । तस्मात् सुप्तो-त्थितात् जीवात् प्राणादिसृष्टिं बोधयन्ती श्रुतिः दृष्टिसृष्टौ प्रमाणम् ।

न चेयं श्रुतिः सुषुप्तपुरुषाधारात् ब्रह्मण एव प्राणादिसृष्टिं बोधयति, न तु सुप्तोत्थितात् जीवात् । 'यत्रैष एतत्सुप्तोऽभूत् क्वैष तदाऽभूत्' इति सुषुप्तपुरुषाधारस्य पृष्टत्वादिति शङ्कनीयम् । अजात-शत्रुब्राह्मणे 'यत्रैष एतत्सुप्तोऽभूत् य एष विज्ञानमयः पुरुषः क्वैष तदाऽभूत्' इति प्रश्नः, 'यत्रैष एतत्सुप्तोऽभूत् य एष विज्ञानमयः पुरुषः, तदेतेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशः तस्मिन् शेते ।' इति प्रतिवचनं च दृश्यते । तत्र क्वेति सुप्ताधारप्रश्नः, आकाशे-ब्रह्मणि शेते इत्युत्तरदर्शनात् । यत्र इति कालस्य निर्देशः । यस्मिन् काले इति तदर्थः । न सुप्ताधारस्य निर्देशः । अत एव यत्रेत्यस्य कालबोधकः 'तदा' इति प्रतिनिर्देशः संगच्छते । तस्मात् सुप्ताधारत्वेन यत्रेत्यत्र यच्छब्देनोक्तस्य ब्रह्मणः 'अस्मादात्मनः' इत्यनेन परामर्शः इति कृत्वा, ब्रह्मणः सकाशात् प्राणादिसृष्टिः एतच्छ्रुत्यर्थः इति न समञ्जसम् । न च तथापि पूर्ववाक्ये 'आकाशः तस्मिन् शेते' इत्यत्र आकाशशब्देनाभिहितस्य ब्रह्मण एव 'अस्मादात्मनः' इत्यत्र परामर्श इति वाच्यम् । एवमेवैष एतच्छेते इत्यव्यवहितपूर्ववाक्ये

प्रथमान्तपदार्थस्य जीवस्यैव बोधनात् सर्वनाम्नां प्रक्रान्तप्रधानपरामर्शिताया एव युक्तत्वात् ।'पुरत्रये क्रीडति जीव एकः ततस्तु जातं सकलं विचित्रम्' इति कैवल्योपनिषदि निस्सन्दिग्धं जीवात् जगतः सृष्टयभिधानात् तदैकार्थ्येन अस्मादात्मन इत्यत्र जीवपरामर्शिताया एव युक्तत्वाच्च । सुप्तोत्थितात् जीवात् सर्वलोककर्मिका सृष्टिः नोपपद्यते इति न शङ्कनीयम् । तत्तद्दृष्टिव्यक्तिमभिप्रेत्य तथोक्तम् । यदा यत्पश्यति, तत्समकालं तत् सृजतीति तात्पर्यात्। 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' (तै. 2-1) इति तैत्तिरीयकमपि ब्रह्मात्मकजीवस्य जगत्कारणत्वं बोधयति । अत एव प्रत्यगात्मनि रूढस्य आत्मशब्दस्य तत्रोपादानं सार्थकं भवति । अपिच 'असतोऽधि मनोऽसृजत । मनः प्रजापतिमसृजत । तच्चेदं मनस्येव प्रतिष्ठितम् यदिदं किञ्च' । इति श्रुत्या द्वैतमात्रस्य मनःपरिणामत्वमवगम्यते । 'एतत्सर्वं मन एव' (बृ-3-5-3) इति श्रुतिव्याख्यानावसरे, **वार्त्तिककाराः—**

'धीर्विपर्ययरूपेयं यतः शुक्लादिरूपिणी ।
मन एवेत्यतः प्राज्ञाः सर्वं रूपं प्रचक्षते ।।' इति निरूपयन्ति ।

'यतो धीः मनःपरिणामः, अतस्तद्विषयोऽपि । सुषुप्तौ मनोऽभावे दृश्यदर्शनयोरभावात् सुप्तोत्थितस्य मनोऽन्वये कार्यान्वयाच्चेत्यर्थः ।' इति तद्वार्त्तिकं विवृण्वन्ति **श्रीब्रह्मानन्दसरस्वतीस्वामिपादाः** ।

'अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ।।(भ-गी. 2-28) इति

भगवद्गीताऽपि दृष्टिसृष्टयभिप्राया ।

'आदौ-जन्मनः प्राक् अव्यक्तानि-अनुपलब्धानि पृथिव्यादिभूतमयानि शरीराणि, मध्ये-जन्मानन्तरं मरणात् प्राक् व्यक्तानि-उपलब्धानि

सन्ति निधने पुनरव्यक्तान्येव भवन्ति । यथा स्वप्नेन्द्रजालादौ प्रतिभासमात्रजीवनानि शुक्तिरूप्यादिवत्, न तु ज्ञानात् प्रागूर्ध्वं वा स्थितानि दृष्टिसृष्टयभ्युपगमात् ।' इति तत्र गूढार्थदीपिका ।

'अदर्शनादापतितः पुनश्चादर्शनं गतः ।' इति च पुराणवाक्यम् । अत्र भूतसङ्घ इति शेषः ।

'अविद्यायोनयो भावाः सर्वेऽमी बुद्बुदा इव ।
क्षणमुद्भूय गच्छन्ति ज्ञानैकजलधौ लयम् ।।' इति

ज्ञानवासिष्ठम् । वासिष्ठे तत्त्वबोधनं दृष्टिसृष्टिप्रक्रिययैव कृतम् ।

रज्जुसर्पादिवद्विश्वं नाज्ञातं सदिति स्थितम् ।
प्रबुद्धद्रष्टृदृष्टत्वात् सुषुप्तौ च लयश्रुतेः ।। इति

श्रीमधुसूदनसरस्वतीस्वामिपादाः ।

न च दृष्टिसृष्टयभ्युपगमः, द्यावापृथिव्यादिकस्य जगतः स्थैर्यबोधिकया 'ध्रुवा द्यौः ध्रुवा पृथिवी ध्रुवासः पर्वता इमे ध्रुवं विश्वमिदं जगत् ।' इति श्रुत्या विरुद्धः इति वाच्यम् । पृथिव्यादीनामनित्यत्वेन सर्वस्मिन्नपि मते तत्रत्यध्रुवपदस्य ध्वंसाप्रतियोगित्वलक्षणनित्यत्वरूपमुख्यार्थपरित्याग आवश्यकः । अस्माभिः दृष्टिसृष्टिबोधकप्रमाणानुरोधेन स्थूलसूक्ष्मान्यतररूपेणावस्थानात्मकः प्रवाहाविच्छेद एव ध्रुवपदेन विवक्षितः इति स्वीकारात् न तच्छ्रुतिविरोधः । सृष्टदृष्टिपक्षे यावत् पृथिव्यादिकं तिष्ठति, तावत्कालं पृथिव्यादेरवस्था स्वीक्रियते । स्थूलावस्थादृष्टयभावकालेऽपि सूक्ष्मावस्थादृष्टिसंभवात् । युक्तं चैतदेव व्याख्यानम् । ध्रुवं विश्वमिदं जगत् इत्यस्यानन्तरं 'ध्रुवो राजा विशामयम्' इति वाक्यशेषोऽस्ति । राजत्वाश्रयस्य देहस्य न मरणपर्यन्तं स्थैर्यम्, बाल्ययौवनादौ उपचयापचयाभ्यां परिणामित्वेनास्थिरत्वात् ।

अतः स्थूलसूक्ष्मभावापन्नदेहप्रवाहाविच्छेदस्यैव स्थैर्यरूपत्वं विवक्षितमित्यस्यावश्यं स्वीकरणीयत्वात् । एतेन'—ध्रुवेत्यादेः राजस्थैर्यशासने विनियोगः, पृथिव्यादि यथा स्थिरं, तथा त्वं राजा स्थिरः इति चार्थः ।' इति माधवीयभाष्योक्तिविरोधः इत्यपास्तम् । सन्तानाविच्छेदस्यैव स्थैर्यत्वात् ।

घटादीनां स्थूलसूक्ष्मभावापन्नावस्थाविच्छेदाभावरूपमेव स्थैर्यं प्रत्यभिज्ञाबलात् सिद्धयतीति भावानां बौद्धाभिमतक्षणिकत्वनिराकरणं सूत्र - भाष्यादिषु कृतम् । एतेन—दृष्टिसृष्टौ, प्रतिभासभेदेनार्थभेदात् क्षणभङ्गवादनिराकरणमयुक्तमिति परास्तम् । घटादीनां सूक्ष्मावस्थायाः स्थिरायास्तैरनङ्गीकारात् । न च तर्हि सांख्यैः स्थूलतादात्म्यापन्नसूक्ष्मावस्थायाः स्वीकारात् सांख्यमतप्रवेशापत्तिरिति वाच्यम् । ब्रह्मसाक्षात्कारपर्यन्तमनुवर्तमानाया अपि तस्याः अस्मन्मते मिथ्यात्वस्वीकारात् । तेषां मते सत्यत्वात् । "सर्वदा व्यवहारकाले कार्यस्य तादात्म्यापन्नं किञ्चित् कार्यरूपमस्ति तत्त्वदर्शनं विना तदुच्छेदासंभवादिति सत्कार्यवादः सांख्यानामिवास्माकमपि । परंतु अस्माकं तद्रूपं मिथ्येति विशेषः ।" इति लघुचन्द्रिका ।

अपिच, सृष्टदृष्टिमते अनन्तपदार्थ-कार्यकारणभावादिकल्पनया गौरवमिति दृष्टिसृष्टिरेव युक्ता । न च सृष्टदृष्टिपक्षे दशदिनस्थायी एको घटः वर्तते, दृष्टिसृष्टौ तु तेषु दिनेषु यदा यदा घटप्रतिभासः, तदा तदा विभिन्नाः अनेके घटाः कल्पनीयाः इति गौरवमिति वाच्यम् । अज्ञातसत्ताकघटस्य स्वीकारे, तत्र अनन्ताः पवनपरमाणुसंयोगाः कल्पनीयाः । वायुपरमाणूनां सततप्रचलस्वभावत्वात् अपरिमितत्वाच्च । विभुभिः, मूर्तान्तरैश्च संयोगाः विभागाश्चानन्ताः कल्पनीयाः । घटादिप्रत्यक्षं प्रति चक्षुरादीन्द्रियसंयोगस्य कारणत्वं कल्पनीयम् । रजतेन

कटकादिकं जायते । प्रातिभासिकसाधारणेन रजतत्वेन कटकादिकार्यजनकतास्वीकारे प्रातिभासिकादपि तादृशकार्योत्पत्त्यापत्तिरिति परस्परव्यावृत्तरूपेण कटकाद्यर्थक्रियाकारणता कल्पनीयेति महागौरवम्। दृष्टिसृष्टौ तु उक्तकल्पनानां विरहात् लाघवम् । सृष्टदृष्टिमते यत्र कार्ये घटज्ञानत्वेन हेतुता कल्प्यते, तत्र दृष्टिसृष्टिनये घटत्वेनैव हेतुतेति लाघवम् । प्रत्यक्षे विषयस्य कारणताया अकल्पनाच्च लाघवम् । घटं पश्यामीत्यादौ स्तोकं पचतीत्यादाविव द्वितीयार्थ अभेदः धात्वर्थान्वयी । ततश्च घट-चाक्षुषयोरभेद एव भासते न भेदः घटादेरेव चाक्षुषत्वादिधर्मवत्त्वमित्यादयोऽपि लाघवतर्काः दृष्टिसृष्टिवादे अनुसन्धेयाः । पराक्रान्तं चात्र पूर्वाचार्यैः । तदेवं दृष्टिसृष्टिप्रक्रियायां श्रुति-स्मृति-तर्काः चिन्तिताः ।।

अत्रायमाक्षेपः प्रसरति—

शुक्तिरजतादिवत् घटादिः द्वैतप्रपञ्चः प्रातिभासिकः इति दृष्टिसृष्टिवादो न युज्यते । शुक्तिरजताध्यासस्यैव तन्नयेऽसंभवात् । तत्र शुक्त्यज्ञानं हेतुर्वाच्यः । अधिष्ठानीभूतशुक्तेरपि दृष्टिसृष्टित्वेन, इदं रजतमित्यध्यासात् पूर्वं शुक्तिज्ञानाभावे शुक्तेरेवाभावेन कस्याज्ञानं भवेत् । शुक्तिज्ञानसत्त्वे तु नैव शुक्त्यज्ञानं स्यात् समानविषयकज्ञानाज्ञानयोर्विरोधात् । अतश्च शुक्त्यज्ञानरूपकारणाभावान्नाध्यासः संभवति। एवं सत्यानृतमिथुनीकरणात्मकस्य सत्यमिथ्यावस्तुतादात्म्यावभासरूपस्य अध्यासस्वरूपलक्षणस्यापि इदं रजतमिति ज्ञाने विरहः । शुक्तेरपि दृष्टिसृष्टित्वेन सत्यत्वाभावात् ।

नेदं रजतमिति बाधकप्रत्ययेन इदं रजतमिति ज्ञानस्याध्यासत्वं निर्वहति । एतन्नये नेदं रजतमिति प्रत्ययस्य इदं रजतमिति प्रत्यय-

बाधकत्वमेव न संभवति, भिन्नविषयत्वात् । यथाप्रतिभासं सृष्टेरङ्गीकारात् । इदं रजतमिति प्रत्यये इदमात्मकरजतस्य नेदं रजतमित्यत्र स्वप्रतियोगिकत्वसंबन्धेनाभावगतरजतस्य च विषयत्वात् । रजतस्येव रजताभावस्यापि दृष्टिसृष्टित्वेन तज्ज्ञानस्य रजतज्ञानबाधकत्वासंभवाच्च । तस्मात् शुक्तिरजतादिवत् घटादिः द्वैतप्रपञ्चः प्रातिभासिकः इति न संगच्छते इति । स चेत्थं परिहरणीयः—

इदं रजतमित्यध्यासात् पूर्वं शुक्तिज्ञानाभावात् शुक्तित्वं नास्ति । सृष्टदृष्टिपक्षे यथा भाविपदार्थविषयकज्ञानं स्वीक्रियते, तथा दृष्टिसृष्टिपक्षे भाविशुक्त्यादिविषयकमज्ञानमनुभवबलात् कार्यान्यथानुपपत्तेश्च स्वीक्रियते इति नाध्यासकारणाज्ञानानुपपत्तिः । नापि अध्यासलक्षणायोगः, इदमवच्छिन्नचैतन्यस्याधिष्ठानत्वात्, इदमः उपाधेः मिथ्यात्वेऽपि तदवच्छेदेनाधिष्ठानताश्रयस्य चैतन्यस्य सत्यत्वात् सत्यमिथ्यासंभेदावभासत्वस्य इदं रजतमित्यध्यासे अव्याहतत्वात् । नेदं रजतमिति प्रत्ययविषयस्य इदं रजतमित्यध्यासविषयस्य च रजतस्य भिन्नत्वेऽपि अनादिना रजतत्वेन सारूप्यात् स्वाप्नरजत-तदभावधियोरिव जाग्रत्कालिकयोः रजततदभावदृष्ट्योः बाध्यबाधकभावो न विरुध्यते । स्वाप्नगजज्ञाने स्वाप्नगजाभावज्ञानस्य बाधकतादर्शनात् अभावे बाध्यान्यूनसत्ताकत्वस्यैव बाधकतायां प्रयोजकत्वात् रजताभावस्य दृष्टिसृष्टित्वेऽपि तज्ज्ञानस्य बाधकताया अव्याहतत्वात्' इति ॥

ननु दृष्टिसृष्टिवादे प्रतिभासभेदेन विषयभेदात् प्रातर्दृष्टस्य घटस्य सायंदृष्टिसमये विरहेण अन्यस्यैव घटस्य तद्दृष्टिविषयत्वात् सोऽयं घटः इति प्रत्यभिज्ञाया अनुपपत्तिः ऐक्यस्याभावात् । न च सेयं दीपज्वाला इति प्रत्यभिज्ञा यथा भ्रमः इति स्वीक्रियते, तथा सोऽयं घटः इति प्रत्यभिज्ञापि भ्रमः स्यादिति वाच्यम् । पूर्वोत्तरयोः

दीपज्वालयोः परिणामभेदर्शनेन ऐक्ये बाधकस्य परिणामभेदस्य सत्वात् दीपज्वालाप्रत्यभिज्ञाभ्रमः । प्रातर्दृष्टस्य सायंदृष्टस्य च घटस्य ऐक्ये बाधकस्यादर्शनेन प्रत्यभिज्ञाया भ्रमत्वकल्पनायोगात् । असत्यपि बाधके भ्रमत्वस्वीकारे, घटादेरेकस्मिन्नपि क्षणे भेदप्रसङ्गः ऐक्यज्ञानस्य भ्रमत्व-कल्पनासंभवादिति चेत् । न—

'नेह नानाऽस्ति किंचन' (बृ. 6-4-19) इत्यादिश्रुतिभिः ब्रह्मभिन्नस्य द्वैतप्रपञ्चसामान्यस्य मिथ्यात्वमवधृतम् । तच्च मिथ्यात्वं शुक्तिरजतादेरिव प्रतिभासमात्रशरीरत्वम् । प्रातः घटदर्शनस्य सायं घटदर्शनस्य च मध्यकाले प्रतिभासशून्यकालेऽपि घटस्य सत्वे तस्य प्रतिभासमात्रशरीरत्वमनुपपन्नं भवेत् । अतश्च प्रतिभासकालातिरिक्त-कालेऽपि सत्वेन घटस्यैक्ये प्रमाणावधृतं प्रतिभासमात्रशरीरत्वं बाधकं वर्तते इति दीपज्वालाप्रत्यभिज्ञावत् सोऽयं घटः इति प्रत्यभिज्ञाभ्रम एव । एकस्मिन् क्षणे घटस्याभेदे बाधकं नास्ति । अतः तत्राभेदज्ञानं न भ्रमः इति एकस्मिन्नेव क्षणे घटस्य न भेदः ।

परंतु एकस्मिन्नेव क्षणे विभिन्नपुरुषैर्ज्ञायमानः घटः भिन्नभिन्न एव । तत्तत्पुरुषीयप्रतिभासभेदेन विषयभेदात् । अतः एककाला-वच्छेदेन पुरुषान्तरज्ञातघटेन स्वेन ज्ञातघटस्याभेदज्ञानं भ्रम एव । सृष्टदृष्टिपक्षेऽपि, एकस्यामेव रज्ज्वां बहुभिः पुरुषैः सर्पभ्रान्त्या भयेन पलायनं क्रियते । प्रातिभासिकस्य प्रतिनियतपुरुषज्ञेयत्वात्, बहूनां जातसर्पभ्रान्तिविषयः सर्पः भिन्नभिन्न एव । तत्र एकेन भ्रान्तेनावगत-सर्पादन्यावगतसर्पस्याभेदज्ञानं भ्रमः इति स्वीक्रियते । तथाऽत्रापि एकपुरुषावगतघटाद्भिन्न एव पुरुषान्तरावगतघटः इति तयोरभेदज्ञानं भ्रमः इति मन्तव्यम् । सादृश्यादेः भ्रमहेतोः प्रतिभासाभावेनासिद्धया कथमभेदभ्रमः इति न शङ्कनीयम् । यथाप्रतिभासं तत्राभेदस्य दृष्टि-

सृष्टित्वाभ्युपगमात् । ननु सुषुप्तौ जीवब्रह्मविभागदृष्टिर्नास्ति । अतः दृष्टिसृष्टेः जीवब्रह्मविभागस्याभावात् सुषुप्तजीवः ब्रह्मरूपतां प्राप्तः । अत एव मुक्तोऽपि भवति । स यदि सुषुप्त्यनन्तरं प्रतिबुध्यते, तदा मुक्तस्य पुनः संसारापत्तिः स्यात् । वस्तुतस्तु प्रबोध एव न स्यात्, तद्धेतोः संस्कारस्य प्रतीत्यभावेनासत्वात् । एवं स्वाप्नमोक्षवत् मोक्षस्य दृष्टिसृष्टित्वापत्तिः इति चेत् ।

न— जीव ईशो विशुद्धा चित् विभागश्च तयोर्द्वयोः ।
अविद्या तच्चितोर्योगः षडस्माकमनादयः ।। इति

सांप्रदायिककारिकायामभिहिताः अनादयः पदार्थाः । सृष्टिः सादेरेव नानादेः । अतः दृष्टिसृष्टिः नानादीनाम् । 'ब्रह्मातिरिक्तं कृत्स्नं द्वैतजातं ज्ञानज्ञेयात्मकमाविद्यकमेवेति प्रातिभासिकत्वं सर्वस्य ।' इति अद्वैतसिद्धिवाक्ये द्वैतजातमिति पदं जातद्वैतमिति विवृण्वन्ति **श्री ब्रह्मानन्दसरस्वतीस्वामिपादाः** । दृष्टिसृष्टित्वाभावेऽपि दृश्यत्वादिना अनादीनां मिथ्यात्वं सिद्ध्यति । जीवब्रह्मविभागस्य अनादितया दृष्टिसृष्टित्वाभावात् सुषुप्तौ तज्ज्ञानाभावेऽपि सत्वात्, सुषुप्तौ जीवब्रह्मविभागाभावेन जीवस्य मुक्तावचनमसंगतम् । एवमनादेः दृष्टिसृष्टित्वशून्यायाः अविद्यायाः सुषुप्तौ सत्वात् नैव सुषुप्तस्य अविद्यानिवृत्तिरूपा मुक्तिः संभावनापदमधिरोहति । अतश्च प्रबोधे मुक्तस्य पुनः संसारापत्तिः सुदूरापास्ता भवति । नापि प्रबोधानुपपत्तिः । तद्धेतोः संस्कारस्य कारणगतसूक्ष्मावस्थारूपेण सत्वात् । तस्य च रूपस्य न दृष्टिसृष्टिः, असंभवात् । न हि प्रलये सुषुप्तौ वा संस्काररूपसूक्ष्मावस्था जीवेन ज्ञातुं शक्यते । सर्वकार्याणां ज्ञातैकसत्वनियमभङ्गाभावाय सूक्ष्मावस्था (अज्ञायमाना) न स्वीक्रियतामिति वाच्यम् । ब्रह्मतत्त्वसाक्षात्कारपर्यन्तं दृश्यानामुच्छेदाभावेन कस्याश्चिदवस्थाया अवश्यवाच्यत्वात् । दृष्टिसृष्टिमत्वाभावेऽपि दृश्यत्वादिना अनादीनामिव

मिथ्यात्वं तस्याः सिद्ध्यति । एवमेव धर्माधर्मयोरपि विहित-निषिद्ध-क्रियासूक्ष्मावस्थारूपत्वेन दृष्टिसृष्टिमत्त्वाभावो बोध्यः ।

एतेन— दृष्टिसृष्टौ प्रतिभासभेदेनार्थभेदात् क्षणभङ्गवादतुल्यतेति तन्निराकरणं पूर्वाचार्याणामनुपपन्नमिति—परास्तम् । सूक्ष्मावस्थारूपेण भावानां स्थैर्योपगमात् तद्वादनिराकरणसंगतेः । मोक्षस्य अविद्योच्छेदोपलक्षितब्रह्मरूपत्वेन दृग्रूपत्वात् अनादित्वाच्च स्वाप्नमोक्षवत् दृष्टि-सृष्टित्वापत्तिः न शङ्कितुमप्यर्हति ।

तस्मात् कृत्स्नद्वैतप्रपञ्चबाधकेनाद्वैतात्मसाक्षात्कारेण अद्वैतात्म-भावरूपो मोक्षः संपद्यते । यद्यपि आत्मसाक्षात्कारोऽपि दृष्टिसृष्टिरेव, तथापि तत्त्वज्ञानत्वप्रयोजकस्य अबाधितात्मविषयकत्वस्य सत्वेन तत्त्व-ज्ञानत्वात् सकलद्वैतप्रपञ्चनाशकः आत्मतत्त्वसाक्षात्कारः इति ज्ञेयम् ।

दृष्टिसृष्टिरेव अत्यन्तपरिशुद्धान्तःकरणानामुत्तमानां उत्तमाया दृष्टेः विषयः । यदाहुः **सर्वज्ञात्मश्रीचरणाः**—

‘तत्त्वावेदकमानदृष्टिरधमा तत्त्वक्षतिर्मध्यमा
तत्त्वप्रच्युतिविभ्रमक्षतिकरी तत्रान्यदृष्टिर्मता ।
जीवैकत्वमुमुक्षुभेदगतितो व्यामिश्रदृष्टिर्द्विधा
भिन्ना तत्र च पूर्वपूर्वविलयादूर्ध्वोर्ध्वदृष्टिर्भवेत् ।।’ इति ।

तत्वावेदकमानदृष्टिः— तत्वावेदकं मानसामान्यमिति दृष्टिः प्रत्यक्षादीनामपि तत्वावेदकत्वमिति दृष्टिरिति यावत् । सा अधमा-श्रुतियुक्तिभिः विश्वमिथ्यात्वसिद्धौ प्रत्यक्षादीनां तत्वावेदकत्वासंभवात् । तत्त्व-क्षतिः— तत्वस्य क्षतिः यया दृष्ट्या सा दृष्टिर्मध्यमा । अत्र तत्पदेन तत्वावेदकमानं परामृश्यते । तस्य भावः- तत्त्वम् - परमार्थसद्बोधकत्वं,

तस्य क्षतिः- तस्यैव क्षतिः- न व्यावहारिकसद्बोधकत्वस्य। तथाच प्रत्यक्षादयः व्यावहारिकसद्बोधकत्वेन व्यावहारिकप्रामाण्यभाजः, श्रुतिरेव केवलं पारमार्थिकप्रामाण्यवती इति दृष्टिर्मध्यमा। स्वाप्नप्रपञ्च-शुक्तिरूप्यादिप्रातीतिकसिद्धौ विश्वमात्रस्य तद्दृष्टान्तेन प्रातीतिकत्वा-भ्युपगमेऽपि सर्वव्यवहारस्योपपादितत्वेन व्यावहारिकसत्वाभ्युपगमस्यापि निरर्थकत्वात् तत्वप्रच्युतेः— व्यावहारिकमानत्वस्य प्रत्यक्षादिषु यो विभ्रमः तस्य क्षतिकरी - निवर्तिका दृष्टिः। ब्रह्माद्वैतश्रुत्यतिरिक्त-सर्वमानानां व्यावहारिकमपि न प्रामाण्यं, अपि तु प्रातीतिकमेवेति दृष्टिः दृष्टिसृष्टिपक्षानुसारिणी तृतीया। तासु अन्त्यदृष्टिः मता-सर्वो-त्तमा मतेत्यर्थः।

अयमत्र निष्कर्षः— घटादिद्वैतप्रपञ्चबोधकानि प्रत्यक्षादीनि तत्त्वावेदकमानानि इति दृष्टिः अधमा। द्वैतप्रपञ्चस्य व्यावहारिक-सत्वात् प्रत्यक्षादीनां व्यावहारिकं प्रामाण्यमिति दृष्टिः मध्यमा। जन्यमात्रं प्रातिभासिकमेव। शुक्तिरजतादिबुद्धाविव प्रत्यक्षादिषु व्यावहारिकप्रामाण्यबुद्धिः भ्रमः इति दृष्टिरुत्तमा। एतादृशोत्तम-दृष्टिविषयः दृष्टिसृष्टिवादः मुख्यो वेदान्तसिद्धान्तः इति शिवम्।

इति उत्तमदृष्टिर्नामाष्टमं प्रसूनं समाप्तम्।

—:o:—

श्रुतिप्रतिज्ञा

नवमं प्रसूनम्

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ।।

मातृशतादपि वत्सला श्रुतिः श्रेयःप्राप्तये प्रेक्षावद्भिरवश्यं ज्ञातव्यं तत्त्वं सप्रतिज्ञानिर्वहणमुपदिशति । श्रुत्यन्ततात्पर्यावधारणाय परमर्षिणा वेदव्यासेन रचितेषु ब्रह्मसूत्रेषु, ब्रह्मणः अभिन्ननिमित्तोपादानत्वव्यवस्थापनावसरे 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' (ब्र.सू. 1-2-23) इति सूत्रेण, वियतः ब्रह्मकार्यतासाधनप्रसङ्गे 'प्रतिज्ञाऽहानिरव्यतिरेकाच्छब्देभ्यः' (ब्र.सू. 2-3-6) इति सूत्रेण, मैत्रेयीब्राह्मणगतस्य प्रियसंसूचितेन भोक्त्रा जीवेनोपक्रमस्य सामञ्जस्यनिरूपणप्रस्तावे, 'प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः' (ब्र.सू. 1-4-20) इति सूत्रेण च श्रुत्यभिहिता एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा समुद्धृता लक्ष्यते ।

एकस्मिन् ज्ञाते सर्वं विज्ञातं भवतीति शिष्टानां प्रवादं श्रुतवान् शौनकः, तद्विशेषं बुभुत्सुः अङ्गिरसमाचार्यं 'कस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवती'ति पप्रच्छ इत्येवमुपक्रममाणा, 'शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसंपन्नः पप्रच्छ, कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ।' (मु-1-1-3) इति **मुण्डकोपनिषत्** निरुक्तप्रतिज्ञायाः सारिष्ठतां सूचयति ।

बृहदारण्यके चतुर्थे षष्ठे चाध्याये, मैत्रेयीब्राह्मणं ग्रथितमास्ते। षष्ठावसाने स्थितं मैत्रेयीब्राह्मणं सर्वोपनिषदर्थानां निगमनस्थानीयमिति भगवत्पादा निरूपयन्ति। तत्र याज्ञवल्क्यः, 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यभिधाय, 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम् (बृ. 6-5-6) इत्युपदिशति आत्मविज्ञानेन सर्वविज्ञानम्। तच्च निर्व्यूढं 'ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद...इदं सर्वं यदयमात्मा' इत्यादिना प्रबन्धेन। अतश्चेयं प्रतिज्ञा सारिष्ठेत्यवगच्छामः। छान्दोग्ये षष्ठे सद्विद्या प्रस्तुता। सैव सर्वासां ब्रह्मविद्यानां पुरोवादरूपा। 'यतो वा इमानि भूतानि जायन्ते' (तै- 3-1) इति श्रुतिः यच्छब्दयोगादनुवादरूपा पुरोवादमपेक्षते। 'सदेव सोम्येदमग्र आसीत्' इत्यादिका छान्दोग्यश्रुतिः पुरोवादः इति प्रामाणिका निरूपयन्ति। तत्र, यस्य विज्ञानेन सर्वं विज्ञातं भवति, तस्य समस्तशास्त्रार्थवेदिभिरपि गुरूपदेशं विना दुरधिगमत्वं, एकविज्ञानेन सर्वविज्ञानासंभवशङ्कायाः दृष्टान्तनिरूपणमुखेन परिहारः, दृष्टान्तानुसारेण दार्ष्टान्तिकार्थनिर्वहणमित्येतत्सर्वमपि निरूपयन्नयं षष्ठोऽध्यायः तस्याः प्रतिज्ञायाः अतीव मुख्यतां प्रकटीकरोति। गुरुकुलात् सर्वानपि वेदानधीत्याऽऽगतं स्तब्धं मानिनं स्वपुत्रं श्वेतकेतुं उद्दालकः तदीयस्तब्धतापनोदाय पप्रच्छ, 'उत तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति' (छा, 6-1-3) इति। अत्र आदेशशब्दे आङ्पूर्वदिशिना उपदेशो बोध्यते। छान्दोग्ये, 'आदित्यो ब्रह्मेत्यादेशः', (3-19-1) 'विद्युद् ब्रह्मेत्यादेशः,' (3-18-1) 'गुह्या एवादेशा मधुकृतः' (3-5-1) इत्यादेः, 'तदादिष्टेन वर्त्मना' इत्यादौ लोके च उपदेशार्थे प्रचुरप्रयोगदर्शनात्। आदिश्यते इत्यादेशः इति कर्मणि घञन्तोऽयमत्रादेशशब्दः। 'अकर्तरि च कारके संज्ञायाम्' (पा. सू. 3-3-19) इति सूत्रे संज्ञायामित्यस्य प्रायिकत्वमिति शाब्दिकैः

व्यवस्थापितत्वात् नात्र कर्मणि घञोऽनुपपत्तिः । एवंच उपदेशगम्यः इति आदेशशब्देन विवक्षितम्, न तु प्रशासनकर्ता विवक्षितः, 'अकर्तरि' इति कर्तुः पर्युदासेन कर्तरि घञोऽसंभवात् । कर्तर्येव करणत्वोपचारः इति क्लेशकल्पनायां प्रमाणाभावात्, अक्लेशेनार्थान्तर-संभवाच्च । उपदेशगम्यत्वविवक्षायामेव 'उत तमादेशमप्राक्ष्यः' इत्युत्तर-वाक्यं संगच्छते, उपदेशस्य प्रश्नपूर्वकत्वात् । अत्रोद्दालकवाक्ये, अविज्ञातं सर्वमपि येन ज्ञातेन ज्ञातं भवतीति एकविज्ञानेन सर्वविज्ञान-प्रतिज्ञामुपक्षिप्तामद्भुतमिव श्रुत्वा, कथमन्यस्य ज्ञानेनान्यत् ज्ञातुं शक्यते इति तत्राविश्वासेन 'कथं नु भगवः स आदेशः' इति पितरं पप्रच्छ श्वेतकेतुः । एवं पुत्रेणानुयुक्तः उद्दालकः दृष्टान्तकथनपूर्वक-मेकविज्ञानेन सर्वविज्ञानमुपपाद्य, 'एवं स आदेशः' इति स्वीयवाक्य-स्यार्थं स्पष्टीचकार । ततः तादृशादेशोपदेशाय पुत्रेण प्रार्थितः पिता 'सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम्' इत्युपक्रम्य षष्ठप्रपाठक-समाप्तिपर्यन्तमुपदिदेश ।

एकविज्ञानेन सर्वविज्ञानस्य दृष्टान्तवर्णनपरं वाक्यं 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्, वाचारम्भणं विकारो नामधेयम् मृत्तिकेत्येव सत्यम् ।' (छा.6-1-4) इति । मृत्स्वरूपे ज्ञाते तदुपादानकाः घटशरावादयः सर्वे मृद्विकाराः ज्ञाता भवन्ति । अत्रेयं शङ्कोदेति - घटशरावादयः मृदो भिन्नाः । अन्यस्य ज्ञाने नान्यत् ज्ञातं भवति । न हि अश्वे ज्ञाते तदन्यो महिषो ज्ञातो भवति । मृत्तिका इति ज्ञातेऽपि घटो वा शरावो वेति संशयोऽनुभूयते । अतः मृत्स्वरूपज्ञानात् घटशरावादिज्ञानं न जायते इति । तस्याः शङ्कायाः परिहाराय 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति वाक्यं प्रवर्तते । घटः शरावः इत्येवं वाचा - शब्देन आरभ्यमाणः

घटादिशब्दालम्बनभूतः विकारः सर्वोऽपि, नामधेयं—स्वार्थे धेयप्रत्ययः। वाचा व्यवह्रियमाणं विकारमनूद्य नामधेयत्वं विधीयते। अयमेव स्वारसिकोऽर्थः। विकारे अर्थे नामधेयत्वस्यान्वयो न घटते। नामधेयपदस्य नामधेयवाच्ये लक्षणास्वीकारे पुनरुक्तिदोषो भवति। अतः 'मृत्तिकेत्येव सत्यम्' इति वाक्यशेषस्वारस्यात् नामधेयपदस्य अर्थपरिसंख्यार्थता स्वारसिकी। तथाच भाष्यम्—'नामधेयमात्रं ह्येतदनृतम्' इति। 'यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् (भ-गी. 16-17) इत्यादौ नामपदेन यज्ञाभासो द्योत्यते। पुत्राभासे पुत्र इति नामधेयं, नात्र पुत्रत्वमस्ति इत्यादयोऽपि व्यवहाराः समुपलभ्यन्ते। इत्थं च घटादयो विकारा मिथ्याभूताः, न हि घटो नाम वस्त्वस्ति। अपितु मृदेव तत्त्वमित्युक्तं भवति। युज्यते चैतत्। न हि घटो मृदो भिन्नः इति वक्तुं शक्यते। मृद्धटः इति सामानाधिकरण्येन प्रतीतेरनुभवात्। नाप्यभिन्नः इति वक्तुं युक्तम्। मृदि ज्ञातायामपि घटत्वादिविशिष्टस्याज्ञानात्। मृत्स्वरूपेणासाध्यस्य जलाहरणादेः घटादिना करणाच्च। नापि भिन्नाभिन्नः, भेदाभेदयोर्विरोधेनैकत्रासंभवात्। तस्मात् मृदो भिन्नत्वेनाभिन्नत्वेन वा निर्वक्तुमशक्यः विकारः अनिर्वचनीयः। तथाच भामती—न च मृदः शरावादयो भिद्यन्ते, न चाभिन्नाः, न वा भिन्नाभिन्नाः। किंतु अनिर्वचनीया एव। यथाऽऽह श्रुतिः, 'मृत्तिकेत्येव सत्यम्' इति। एवं विकारः असन्नोत्पद्यते। असतः शशशृङ्गादेः सर्वदा असत्वेन निष्पत्तेरयोगात्। नापि विकारः सन्निति युज्यते। यत् सत् तत् सर्वदा सदेवेति तन्निष्पत्तेरयोगात्। नापि विकारः सदसन्, विरोधात्। न च घटादेः उत्पत्तेः पूर्वमसत्वं धर्मः, उत्पत्तेरनन्तरं तु सत्वं धर्मः इति न घटः सदसद्रूप इति वाच्यम्। धर्मिणं विना धर्मसत्वायोगात् उत्पत्तेः प्राक् घटस्यैवाभावेन असत्वस्य घटधर्मत्वायोगात्। अतः सत्वेनासत्वेन सदसत्वेन वा निर्वक्तुमशक्याः विकारा अनिर्वच-

नीया अनृताः। तदुक्तमारम्भणाधिकरणभाष्ये 'दृष्टनष्टस्वरूपत्वात्।' इति। **छान्दोग्यवाक्यकारो ब्रह्मनन्दी** 'संव्यवहारमात्रत्वात्' इत्यनृतत्वमाह। एवंच विकाराणां घटादीनां अनिर्वचनीयत्वेनानृतत्वात् तेषां तत्त्वं कारणीभूतमधिष्ठानं मृदादिकमेव। तज्ज्ञाने च विकाराणां घटादीनां तत्त्वं ज्ञातं भवति।

ननु, नाधिष्ठानज्ञानेनाऽऽरोपितानां विकाराणां ज्ञातत्वं भवति। प्रत्युत निवृत्तिरेव भवति। अधिष्ठानाज्ञानादेवारोपितानां ज्ञानं भवति। एवंच दार्ष्टान्तिकेऽपि, ब्रह्मज्ञानान्न सर्वेषां ज्ञातत्वम्, किंतु ब्रह्माज्ञानादेव सर्वेषामारोपितानां ज्ञातत्वं संभाव्यते। तदुक्तं—

कथं हि ब्रह्मविज्ञानाद्विज्ञातं सकलं भवेत्।
न हि शुक्तिस्वरूपस्य विज्ञानाद्रजतज्ञता॥

प्रत्युत,

शुक्तितत्वापरिज्ञानाद्यथैव रजतज्ञता।
ब्रह्मतत्वापरिज्ञानात्तथा सर्वज्ञतोचिता॥ इति

इति चेत्, न—रज्ज्वामारोपितस्य भुजङ्गस्य तत्त्वं—अनारोपितं रूपं रज्जुरेव। एवंच विवर्तवादे अधिष्ठानज्ञानेनारोपितानां तत्त्वतो ज्ञातत्वं संप्रतिपन्नमेव। न हि रज्जोरज्ञानात् भुजङ्गस्यारोतितस्य तत्त्वतो ज्ञातत्वं भवति। इत्थंच मृदादिज्ञाने सति घटादिः सर्वोऽपि विकारः तत्त्वतो ज्ञातो भवति। एवमेव ब्रह्मणि सर्वाधिष्ठाने ज्ञाते सर्वमपि तत्वतो ज्ञातं भवति। तदुक्तं भामत्याम्—"रज्ज्वां ज्ञातायां भुजङ्गतत्वं ज्ञातं भवति। सा हि तस्य तत्त्वम्। तत्त्वज्ञानं च ज्ञानम्। अतोऽन्यन्मिथ्याज्ञानमज्ञानमेव।" इति। ननु एवं सति रज्जुज्ञानेन भुजङ्गतत्त्वस्य रज्जोर्ज्ञानं भवति। तथा ब्रह्मज्ञानेन सर्वप्रपञ्चतत्त्वस्य

ब्रह्मणो ज्ञानं भवतीति पर्यवसितम् । तच्चायुक्तं, स्वस्य स्वहेतुत्वासंभवादिति चेत् । न—

ब्रह्मज्ञानेन सर्वं तत्त्वतो ज्ञातं भवति, रज्जुज्ञानेन भुजङ्गः तत्त्वतो ज्ञातो भवति इत्यादौ, नाधिष्ठानज्ञाने आरोपिततत्त्वज्ञानहेतुत्वं विवक्ष्यते । येन स्वस्य स्वहेतुत्वानुपपत्तिदोष आपतेत् । परंतु सर्वेषां तत्त्वतो ज्ञानं ब्रह्मज्ञानमेव । रज्जुज्ञानमेव भूजङ्गस्य तत्त्वतो ज्ञानमित्येव विवक्षितम् । ब्रह्मज्ञानेनेत्यत्र तृतीयार्थो न जन्यत्वम् । किंतु धान्येन धनवानित्यत्रेवाभेदः । तस्य च ज्ञातमित्यत्र ज्ञाधात्वर्थज्ञानेऽन्वयः । सर्वस्य तत्त्वज्ञानं ब्रह्मज्ञानमेव । स्वीयतत्त्वज्ञानाभिन्नज्ञानविषयब्रह्मकं सर्वमिति पर्यवसितार्थः । तथाच नोक्तायाः शङ्काया अवसर इति बोध्यम् ।

तत्सिद्धं, 'वाचारम्भणं विकारो नामधेयम्' इति वाक्यं, घटशरावादिवागालम्बनभूतं विकारमनूद्य, तस्य नामधेयत्वं विधत्ते । तच्च निरुक्तसरण्या मिथ्यात्वरूपमिति, योजनाध्याहारादिक्लेशलेशं विना श्रुतिस्वरससिद्धोऽर्थः इति ।

अथवा, विकारः— मृदादिव्यतिरिक्त इव भासमानः घटशरावादिरूपः सर्वोऽपि विकारः, वाचारम्भणं - वाचाया आरम्भणम् । आरभ्यते इत्यारम्भणम् । पुंल्लिङ्गविशेषणत्वेऽपि लिङ्गसामान्यविवक्षया नपुंसकता, 'द्विगुरेकवचनम्' (पा.सू.) इतिवत् । वाचा केवलमारभ्यते इत्यर्थः । वाचा इति तृतीयान्तं पृथक्पदं वा । मृदादिभिरारम्भणीयो घटः कथं वाचारम्भणः इत्याशङ्कायां, वाचारम्भणशब्दतात्पर्यं स्फुटयति नामधेयमिति। किममसन्नेव विकारो भाति, तत्राह-मृत्तिकेत्येव सत्यमिति। कारणं मृदादिरेव सत्यः, घटादिस्तु अनिर्वचनीयः विचारासहः ।

"वाचया केवलमारभ्यते विकारजातम्, न तु तत्त्वतोऽस्ति, यतो नामधेयमात्रमेतत्। यथा पुरुषस्य चैतन्यम्, राहोः शिरः इति विकल्पमात्रम्।" इति भामतीरीत्या योजनायां, नामधेयत्वं वाचारम्भणत्वे हेतुतया प्रतीयते।

'मृत्तिकेत्येव सत्यम्' इत्यत्र हेतुः वाचारम्भणमिति। वाचाशब्दः प्रथमान्तः असमस्तः। आरम्भणं - उत्पत्तिः, वाचा - वागेव केवलम् विचारासहम्। सतः असतो वा निरुक्तरीत्या उत्पत्तेः वक्तुमशक्यत्वात्। तथा अनादि दृश्यमपि विकारः - विनाशित्वेन विकृतम्, नामधेयं - नाममात्रमिति योजयन्ति **वेदान्तसूत्रमुक्तावल्यां श्रीब्रह्मानन्दसरस्वतीस्वामिपादाः**।

न च वाचा इति पदोपादानं किमर्थम्? वागित्यनेनैवालमिति शङ्कनीयम्। तस्य पदस्य तृतीयान्तत्वपक्षेऽपि, शब्देन इत्यनभिधाय वाचा इति तृतीयान्तोपादानस्य किं प्रयोजनमिति शङ्काया अनिवृत्तेः। स्वतन्त्रायाः श्रुतेरनुयोगाभावश्च तुल्य इति वेदितव्यम्। न च पर्वतो वह्निमानिति साध्यनिर्देशानन्तरं, कुतः इति जिज्ञासायां सत्यां, धूमात् इति हेतुवाक्यं प्रयुज्यते। अतश्च मृतिकेत्येव सत्यमित्यतः प्राक् वाचारम्भणं विकारो नामधेयम् इति हेतूक्तिः न समञ्जसेति शङ्कनीयम्। 'ईक्षतेर्नाशब्दम्' (ब्र.सू-1-1-5) इत्यत्र साध्यनिर्देशात् प्राक् उपक्रमे एव ईक्षतेरिति हेतुनिर्देशस्य सत्वेन साध्यनिर्देशानन्तरमेव हेत्वभिधानमिति नियमाभावात्। लोके हेतूक्तिसमनन्तरं साध्यनिर्देशकवाक्यानां बहुलमुपलम्भात्,

चक्रभ्रमणकरत्वात् कुदृष्टिभिर्दूरवर्ज्यमानत्वात्।
श्रुत्यन्तखेलनत्वात् मशक त्वामेव माधवं मन्ये ।।

इत्यादिकविकाव्यादौ प्रथम हेतूक्तेः समुपलम्भाच्च।

विकारस्यानिर्वचनीयत्वे घटः सन् इत्येवंरूपेण विकारे सत्प्रतीतिः कथमुपपद्यते इति शङ्कायाः, कारणस्वरूपेण सद्व्यवहारः इत्येवं परिहारं सूचयन्ती 'मृत्तिकेत्येव सत्यम्' इति श्रुतिः, प्रकृतं कारणमात्रस्य अबाध्यत्वरूपं सत्यत्वमुपसंहरति। पिण्डावस्थाया अपि विचारदशायां न सत्यता, किंतु विचारासहत्वमेवेति सूचनाय, कारणस्य मृत्पिण्डपदं परित्यज्य मृत्तिकापदेनोपन्यासः। न च तथापि पिण्डावस्थानुगतमृत्स्वरूपस्यैवोपादानत्वात् एकेन मृत्पिण्डेन इत्यत्र उपादानस्य मृत्पिण्डशब्देनोक्तिः कथं संगच्छते? पिण्डोपमर्देन घटादेर्जननादिति वाच्यम्। मृत्पिण्डस्याप्युपादानत्वात्। कार्योत्पत्तौ क्वचिदुपादानगतस्य कस्यचिदाकारस्य तिरोधानं भवति, क्वचिदुपमर्दो भवतीति द्वैविध्यं लोके दृश्यते। प्राकारोपादानेष्टकानां चतुरश्रत्वाद्याकारतिरोधानमात्रं भवति। न कस्याप्याकारस्योपमर्दः। ऋषभोपादानस्य वत्सस्य ककुदादिरहितस्वल्पपरिमाणाकारस्योपमर्दः न च कस्याप्याकारस्य स्थितस्य तिरोधानम्। अत एव प्रकृतौ अभिधेयायां ष्यङ्प्रत्ययविधायकसूत्रे आर्षभ्यो वत्स इत्युदाहरन्ति वैयाकरणाः। एवंच घटाद्युत्पत्तौ मृदाद्यात्मनाऽनुवृत्तेषु मृत्पिण्डादिषु सतां पिण्डत्वादीनामुपमर्देऽपि, वत्सादीनां ऋषभाद्युपादानत्वमिव पिण्डादीनां घटाद्युपादानत्वमुपपद्यते। यत्र सर्वात्मनोपमर्दः तत्राप्युपादानत्वमिष्यते एव। कुण्डलमेव कटकं कृतमिति प्रत्यभिज्ञानात्। परंतु अयं विशेषः, मृत्पिण्डादीनां घटादिभावापत्तौ पिण्डत्वाद्याकारस्योपमर्दः, ब्रह्मणः प्रपञ्चभावापत्तौ तु आनन्दत्वाद्याकारस्य तिरोधानमिति।

ननु कारणमात्रस्य सत्यत्वावधारणतात्पर्ये, मृत्तिकैव सत्यमिति निर्देशः स्वारसिकः। अतः इतिशब्दोपादानं व्यर्थमिति चेत्। न—

अत्र कारणस्य सत्यत्वबुबोधयिषया मृत्तिका सत्यमित्युक्तम् । परंतु सापि न परमार्थसती । घटादिविकाराणां विचारदशायां मिथ्यात्वमिव, मृत्तिकाया अपि विकाररूपाया मिथ्यात्वमेव । तत्कारणीभूतानि पृथिव्यादिभूतान्येव सत्यानि । तेषामपि विचारदशायां मिथ्यात्वमेवेति, तत्कारणमेव सत्यमिति प्रणाल्या मूलकारणं ब्रह्मैव सत्यमिति बोधयितुं मृत्तिकेति इतिशब्दः प्रयुक्तः । इतिशब्दस्य आद्यर्थकत्वात् मृत्तिकादि सत्यमित्यर्थः । इतिशब्दस्याऽऽद्यर्थकत्वं च 'इति हेतुप्रकरणप्रकारादिसमाप्तिषु' इति **अमरकोशसिद्धम्** । प्राचीननिबन्धेषु आद्यर्थे इतिशब्दः प्रयुक्तो दृश्यते । 'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्' इति **न्यायसूत्र**व्याख्यानावसरे, "लोकविरोधश्च, एकस्यानेककारकवाच्यत्वात् वृक्षस्तिष्ठतीति । तत्रैकं वृक्षाख्यं वस्तु अनेकेन कारकशब्देनोच्यते, तस्य तस्य निमित्तस्य संनिपातात् ।" इति **न्यायवार्त्तिक**मुपलभ्यते । तत्र **तात्पर्यटीका**— "वृक्षस्तिष्ठतीति इतिशब्दः आद्यर्थे । तेन वृक्षं पश्यति, वृक्षेण चन्द्रमसं पश्यति इत्यादयो वेदितव्याः ।" इति ।

मृत्तिकेत्येव इत्यत्र इतिशब्दः उपादानत्वरूपप्रकारपरः । तथा चोपादानत्वावच्छिन्नस्य सत्यता बोध्यते इत्यन्ये ।

मनो ब्रह्मेत्युपासीत इत्यादौ इतिशब्दोपादानस्थाले मनसो यथा न ब्रह्मता पारमार्थिकीति लभ्यते, एवमत्रापि मृत्तिकायाः सत्यतापि न पारमार्थिकीति इतिशब्दतो लभ्यते इत्यपि वदन्ति ।

तथाच येनाश्रुतं श्रुतं भवति इत्यत्र तृतीयार्थः अभेदः । अश्रुतं सर्वमपि यदभिन्नं श्रुतं भवति इति वाक्यार्थः । चोरः स्थाणुः इतिवत्

बाधायां सामानाधिकरण्यम् । अतश्च ब्रह्मव्यतिरेकेण सर्वप्रपञ्चस्याभावो बोध्यते ।

न च श्रुतमिति पदोपादानं किमर्थमिति वाच्यम् । आदेशशब्देन विवक्षितं ब्रह्मैव श्रोतव्यं मन्तव्यं निदिध्यासितव्यं चेति उपनिषदन्तरेषूक्तम् । तादृशं ब्रह्मैव अश्रुतादिः सर्वः प्रपञ्चः इति बोधनेन श्रुतादिपदोपादानसार्थक्यात् । छान्दोग्ये त्रिवृत्प्रकरणे, 'अपागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्' इति वाक्यं सर्वस्य विकारस्य विचारासहत्वरूपं मिथ्यात्वं मुक्तकण्ठं निरूपयतीति तदनुसारि निरुक्तव्याख्यानमतिसमञ्जसं बोध्यम् ।

विवर्तवादविद्वेषिणां व्याख्याने, अध्याहार - लक्षणाकल्पनादिक्लेशबाहुल्यं प्रतिज्ञाया गौणता चाऽऽपतति । तथाहि—

ब्रह्म जगतः निमित्तमुपादानं चेति वादिनो रामानुजीयाः—

अत्र आदेशशब्देन प्रशासितोच्यते । तेन जगन्निमित्तत्वमुक्तं भवति । येनाश्रुतं श्रुतं भवतीत्यादिना स्थूलचिदचिच्छरीरकब्रह्मणः सूक्ष्मचिदचिच्छरीरकाभेदबोधनेन उपादानत्वमप्युक्तं भवति । ब्रह्मणः जगन्निमित्तत्वे विवादाभावात्, उपादानत्वमाश्रित्य, कथं नु भगवः स आदेशः इति प्रश्ने कृते, दृष्टान्तकथनपूर्वकं कार्यकारणयोरभेदनिरूपणं प्रक्रान्तम् । कार्यकारणयोर्भेदात् कथमेकेन मृत्पिण्डेन ज्ञातेन सर्वमृण्मयज्ञानं भवतीति शङ्कायां, वाचारम्भणमित्यादि वाक्यं तयोरभेदं निरूपयति । मृत्तिकापेक्षया पृथुबुध्नोदराद्याकारो विकारः घटः न भिन्नः । परंतु घटः इति शब्दप्रयोगरूपव्यवहाराय जलाहरणादिकार्याय च घटत्वावस्थां मृत्तिका प्राप्नोति । घटो

मृत्तिका इति प्रत्यभिज्ञानमबाधितत्वात् प्रामाणिकमेवेति कार्यकारण-योरभेद एव न भेदः इति तात्पर्यार्थः । अक्षरार्थस्तु, वाचा इत्यत्र वाक् इति शब्देन व्यवहारः जलाहरणादि कार्यं च विवक्षितम् । अध्ययनेन वसति इत्यादाविव फले हेतौ तृतीया । आरम्भणमित्यस्य स्पृश्यं-संबन्धनीयमित्यर्थे पर्यवसानम् । मृत्तिका इत्युत्तरत्र स्थितस्य तृतीयान्ततया विपरिणतस्यात्रान्वयः । तथाच घटमानयेत्यभिधान-रूपव्यवहारार्थं तन्मूलानयनादिकार्यार्थं च मृत्तिकया विकारशब्दित-संस्थानं, घट इति नामधेयं च संबध्यते इत्यर्थः । इत्थंच मृत्तिका-द्रव्यस्यैकत्वेऽपि पिण्डावस्था—घटावस्थाभेदात् नामधेयार्थक्रियादिभेदः उपपद्यते इत्युक्तं भवति । नैयायिकवत् कार्यकारणयोर्भेदेनैव नामादि-भेदः कुतो नोपगम्यते इति शङ्कायां, मृत्तिकेत्येव सत्यमिति वाक्यं प्रवर्तते । घटः इति पदाध्याहारेण, घटो मृत्तिका इति प्रत्यभिज्ञानं सत्यं-प्रामाणिकमित्यर्थः। अथवा, विकारः—घटशरावादिः (मृदो भिन्नः) इति, वाचारम्भणं - वाङ्मात्रेण व्यवह्रियते, न तु भेद इति भावः। (घटादि) नामधेयं (घटादिद्रव्यं) मृत्तिकेति - कृत्वैव, सत्यं - सति प्रामाणिकेऽर्थे साधु इति व्याचक्षते ।

अत्र 'अकर्तरि' इति पाणिनिस्मरणात् कर्तरि घञः अप्रवृत्तेः कर्तरि करणत्वोपचारेण आदेशपदप्रयोगः संगमनीयः । आदेशपदेनो-पक्रान्तस्य प्रशासितृत्वस्य समनन्तरमनुपपादनेन, प्रशासितृपरतया आदे-शपदविवरणं न स्वारसिकम् । उपदेशगम्यमिति व्याख्याने तु तस्योपदे-शैकगम्यत्वात् प्रश्नपूर्वकत्वाच्चोपदेशस्य 'उत तमादेशमप्राक्ष्यः' इति वचनं समञ्जसं भवति । एवं, विकारः नामधेयं चेति चकारार्थो योजनीयः। अभिधानशक्तस्य वाक्छब्दस्य, तत्प्रयुक्तानयनादिकार्येऽपि लक्षणायाः स्वीकरणीयतया युगपत् वृत्तिद्वयविरोधः । गङ्गायां मत्स्यघोषौ स्तः

इत्यत्रापि न युगपत् वृत्तिद्वयस्वीकारः । गङ्गापदस्य गङ्गा-तीरोभयत्वावच्छिन्ने लक्षणाङ्गीकारेण गङ्गा-तीरोभयवृत्ति मत्स्य घोषोभयम् इति शाब्दबोधस्य नैयायिकैः वर्णनात् । वाक्पदस्य अभिधानतत्प्रयुक्तानयनादिकार्योभयलक्षणाङ्गीकारे, स एव क्लेशः । उपरितनमृत्तिकापदस्य तृतीयान्ततया विपरिणामं कृत्वा पूर्ववाक्यस्थारम्भणपदार्थेनान्वये क्लेशः, मृत्तिकेत्येव इत्यत्र घटः इति पदाध्याहारक्लेशोऽपि ।

अथवेत्यादिनोक्तव्याख्याने च विकारः इति पदानन्तरं मृदो भिन्नः इति वचनस्य, मृत्तिकेत्यतः प्राक् घटादि द्रव्यमिति वचनस्य चाध्याहारेण, नाममात्रवाचकस्य नामधेयपदस्य घटादिनामधेयविशेषार्थे संकोचकल्पनया च क्लेशः स्पष्ट एव ।।

ब्रह्मणः जगन्निमित्तकारणत्वमात्रं स्वीकुर्वाणाः आनन्दतीर्थीयास्तु, अन्यथा व्याचक्षते । तद्यथा—

सादृश्यं प्राधान्यं चावलम्ब्य एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा, दृष्टान्तश्च प्रवर्तते । मृत्पिण्डज्ञाने सति सादृश्यात् मृन्मयाः सर्वेऽपि घटादयः ज्ञाता भवन्ति । एवं ब्रह्मणि ज्ञाते सादृश्यात् सर्वमपि तत्कार्यं ज्ञातं भवतीत्येकोंऽशः । प्रधाने ज्ञाते गुणीभूताः सर्वेऽपि ज्ञातप्राया भवन्ति । गुणीभूतपदार्थज्ञानफलस्य प्रधानज्ञानेन संभवात् फलतः सर्वस्यापि ज्ञातत्वं भवति । मृत्तिका इति संस्कृतशब्दः व्याकरणसंस्कृतवागिन्द्रियनिष्पाद्यः व्यापकः प्रधानः । व्याकरणसंस्कारादिरहितात् केवलात् वागिन्द्रियात् विक्रियमाणाः अपभ्रंशा बहवो वर्तन्ते । तज्ज्ञानफलं व्यवहारादिकं तदधिकं च सार्वत्रिकव्यवहारादिकं च संस्कृतज्ञानाद्भवतीति संस्कृतं प्रधानम् । एवंच प्रधानसंस्कृतशब्दज्ञाने

सति फलद्वारा विकाराः अपभ्रंशाः सर्वेऽपि ज्ञाता भवन्ति । तथैव, प्रधाने ब्रह्मणि ज्ञाते कृत्स्नफलसिद्धेः इतरत् सर्वमपि फलतो ज्ञातं, ज्ञातप्रायं भवतीत्यपरांशः । अयमेव सारार्थः । अथाक्षरार्थ उच्यते ।

'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्' इति वाक्यं एकज्ञानेन सादृश्यात् सर्वज्ञानस्य दृष्टान्तोपन्यासः । सादृश्याद्विज्ञातमिति भावः । प्रधानज्ञाने सति गुणभूतानां फलतो ज्ञातत्वमित्यस्य निरूपणं वाचारम्भणमित्यादिना क्रियते । वाचारम्भणं नामधेयं विकारः इति योजना । वाचा—व्याकरणादिनिरपेक्षवागिन्द्रियमात्रेण आरम्भणं—आरभ्यमाणं, नामधेयं—अपभ्रंशादिः, विकारः- अपभ्रंशरूपेण विक्रियमाणत्वात् । मृत्तिकेत्येव—व्याकरणसापेक्षवागिन्द्रियनिष्पाद्यः मृत्तिका इति संस्कृतशब्दः एव, सत्यं—नित्यम् । सदाशब्दात् त्यप्प्रत्यये निष्पन्नस्य सत्यशब्दस्य सदातनार्थकत्वात् । मुख्यस्यानादित्वस्यासंभवात् प्रवाहानादीत्यर्थः । प्रधानस्य ब्रह्मणो ज्ञानेन तद्गुणीभूतस्य सर्वस्यापि ज्ञाने संस्कृतापभ्रंशो दृष्टान्तः । तद्दृष्टान्ततालाभार्थं वाचारम्भणमित्यत्रापि यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादिति अनुषञ्जनीयम् । मृत् इत्यस्मिन् संस्कृतपदे ज्ञाते सर्वं मृण्मयं—मृत्पदापभ्रंशभाषापदानि ज्ञातप्रायाणि भवन्तीति तदर्थ इति ।।

अत्र पक्षे बहूनां पदानां लक्षणाश्रयणक्लेशः । वाचा इत्यत्र व्याकरणनिरपेक्षवागिन्द्रियमात्रेण इत्यर्थः लक्षणालभ्यः । अबाध्यार्थे रूढस्य सत्यशब्दस्य नित्यार्थे लक्षणा। 'अव्ययात् त्यप्' (पा.सू-4-2-104) इति सूत्रे अव्ययानां परिगणनात् सदाशब्दात् त्यप्प्रत्ययवचनं नानुमन्यन्ते वैयाकरणाः । विकारः इति पदस्य संस्कृतोच्चारणाशक्तोच्चार्यमाणः इत्यर्थे लक्षणैव ।

मृत्तिकेत्येव सत्यम् इत्यत्र, यथा सोम्यैकेन मृत्पिण्डेन इत्यादिकमनुषञ्जनीयमिति न समञ्जसम्। पूर्ववाक्यघटकभागस्य उत्तरवाक्यघटकतया प्रतिसन्धानमनुषङ्गः। प्रकृते, मृत्तिकेत्येव सत्यमित्यनन्तरं यथा सोम्यैकेन मृत्तिकेत्यनेन सर्वस्तद्विकारो विज्ञातो भवति इति, विवक्षितदृष्टान्तदृष्टान्तलाभाय कल्पनीयम्। न च तथा पूर्ववाक्ये प्रविष्टमस्ति। एकेन मृत्पिण्डेन सर्वं मृत्पिण्डमयं विज्ञातं स्यात् मृत्पिण्डमित्येव सत्यम् इति श्रुतिवाक्यं चेदभविष्यत्, गुणप्रधानभावबोधनाय संस्कृतापभ्रंशदृष्टान्तकथनमित्युक्तिः कथंचित् समञ्जसाऽभविष्यत्। अपिच, मृत्पिण्डादिशब्दस्यापि शब्दार्थकत्वं लक्षणयैव निर्वहणीयम्। गङ्गामुच्चारय इत्यादौ प्रवाहशक्तस्य गङ्गापदस्य शब्दरूपार्थे लक्षणाया नैयायिकैः एतावता अक्षरार्थनिरूपणे क्लेशश्चिन्तितः। वस्तुतस्तु सादृश्यात् प्राधान्याच्च एकज्ञानेनेतरज्ञानं न नियतम्। प्रधानज्ञानेन सर्वस्य ज्ञातप्रायत्वमित्याशयवर्णने, प्रतिज्ञेयं गौणीति पर्यवस्यति। न च गौणत्वेनाभिमतायाः प्रतिज्ञायाः महता संरम्भेण नैकदृष्टान्तकथनपूर्वकमुपपादनं घटते। अत एवेयं प्रतिज्ञा मुख्यभूता सूत्रकारैराद्रियते। पराक्रान्तं चात्र सूरिभिः।

तस्मात् भगवत्पादसंमतः एकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाः सर्वं स्वीयतत्त्वज्ञानाभिन्नज्ञानविषयब्रह्मकमिति पर्यवसितार्थः श्रुतिस्वरससिद्धः समञ्जसः इति सिद्धम्। इममेव प्रतिज्ञातार्थं 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इत्युपसंहरति श्रुतिः (छा. 6-8-7)। मोक्षधर्मे श्वेतकेतुसुवर्चलोपाख्याने सद्विद्योपबृंहणरूपे 'सदर्थं कल्पितं सर्वं सदर्थो विष्णुरेव हि।' इति सारार्थोऽभिहितः निरुक्तप्रतिज्ञार्थं निष्कर्षयति।

स्वमतिशुद्धये पूर्वाचार्यवचनभङ्गीनामनुसन्धानेन, प्रतिज्ञापूर्वकं श्रुत्या सर्वप्रपञ्चाधिष्ठानभूतमेकं सद्रूपं तत्त्वं निरधारि इत्यस्यार्थस्य समासेन निरूपयतोऽस्य लेखस्य दर्शनेन गुणग्राहिणो विद्वांसः मामनुगृह्णन्तु इति प्रार्थये ।

इति श्रुतिप्रतिज्ञाभिधानं नवमं प्रसूनं समाप्तम् ।

सद्विद्या

दशमं प्रसूनम्

सर्वविद्यासु श्रेष्ठतमा अध्यात्मविद्या भगवतो विभूतितयोपदिश्यते गीतासु । सा परा विद्या अपवर्गदायिनी रहस्याभिधानेषु वेदान्तेषु भिन्नभिन्नं पन्थानमाश्रित्य समुपदिष्टा चकास्ति । छान्दोग्ये षष्ठे प्रपाठके सद्विद्याभिधानेयं विद्या, तत्तच्छङ्कानां दृष्टान्तकथनपूर्वकं समाधाननिरूपणमुखेन श्वेतकेतवे पुत्राय उद्दालकेन कृतोपदेशसरण्या वर्णिताऽऽस्ते ।

प्रपञ्चोऽयं चेतनाचेतनात्मकः । तत्र अचेतनानि भोग्यानि, चेतनाश्च भोक्तारः । भोग्यमचेतनं सर्वमपि परमार्थसद्रूपस्य कार्यं— विकारः । कार्यं च कारणात् भेदेन अभेदेन वा न निर्वक्तुं शक्यते इत्यनिर्वचनीयम् अनृतं नाममात्रं मिथ्याभूतम् । सर्वोऽपि विकारः सद्रूपाज्जातः सद्व्यतिरेकेण निर्वचनानर्हः । स च सद्रूपे अधिष्ठाने कल्पितः । कल्पितानामधिष्ठानमेव तत्त्वम् । जले प्रतिबिम्बितसूर्य इव विकारे अहङ्कारादौ प्रतिबिम्बितं सद्रूपमेव भोक्ता जीवः । प्रतिबिम्बस्य स्वरूपं बिम्बमेव जलसूर्यस्य आकाशस्थसूर्य इव । द्वैतप्रपञ्चकल्पनाधिष्ठानं परमार्थसदेकमेव सद्रूपं जीवस्य स्वरूपम् । आचार्योपदेशलब्धसद्रूपतावबोधो जीवः सत्याभिसन्धो मुच्यते । सत्संपत्तिरेव मुक्तिः इति षष्ठप्रपाठकसारार्थः ॥

अथेदानीमयमर्थः कतिपयश्रुत्यर्थवर्णनमुखेन विव्रियते । उद्दालको महर्षिः, गुरुकुलात् सर्वान्वेदानधीत्याऽऽगतं स्तब्धं स्वपुत्रं श्वेतकेतुमेवं पप्रच्छ । येन श्रुतेन अश्रुतं सर्वमपि श्रुतं भवति, येन च ज्ञातेन अज्ञातं सर्वमपि ज्ञातं भवति, तद्वस्तु उपदेशेनैवावगन्तुं शक्यते, न स्वबुद्ध्यभ्यूहमात्रेण । आचार्याश्च पृष्टा एवोपदिशेयुः । अतः तादृशमादेशं किमप्राक्ष्यः इति ।

'उत तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवति अमतं मतमविज्ञातं विज्ञातमिति ।' (छा. 6-1-3) । अत्र आदिश्यते इत्यादेशः इति कर्मणि व्युत्पत्तिः । आदेशो नामोपदेशः उपदेशावगम्य इत्यर्थः । अतश्च 'अप्राक्ष्यः' इति उद्दालकवाक्यं साधु संगच्छते । अन्यस्य ज्ञाने अन्यविज्ञानं न संभवतीति मन्वानः पुत्रः 'कथं नु भगवः स आदेशः' इति पितरं पप्रच्छ । उद्दालकः मृदादिदृष्टान्तमुखेनादेशमुपदिदेश ।

मृदो जायमाना विकाराः घटशरावादयः । ते च मृत्स्वरूपव्यतिरेकेण न सन्ति । मृदो भिन्ना इति वा, अभिन्ना इति वा निरूपणानर्हाः । मृद्घटः इति सामानाधिकरण्येनानुभवात् न मृदो भेदो युज्यते । घटेन क्रियमाणस्य जलाहरणादिकस्य केवलमृदा कर्तुमशक्यत्वात् अभेदोऽपि न घटते । भेदाभेदौ च विरुद्धौ नैकत्र संभवतः । एवं कारकव्यापारात् पूर्वमसन् घटः नोत्पत्तुमर्हति नरविषाणवत् । नापि पूर्वमेव सन् घटः, कारकव्यापारवैयर्थ्यापातात् । अतः विकारः सर्वोऽपि अनिर्वचनीयः अनृतः, घटः शरावः इत्यादिनामधेयमात्रम्, मिथ्याभूत इति यावत् । कारणं मृदेव सत्यं - अबाध्यम् । एवं, मृदः कारणं यत् तदेव सत्यम्, एवं तस्य तस्यापीति अवगन्तव्यमित्यवोचत् ।

'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं, मृत्तिकेत्येव सत्यम् । (छा. 6-1-4)

अत्र **आरम्भणं** — आरभ्यते इत्यारभ्भणं घटादिकं, **वाचा** - वाक्-शब्द इत्यर्थः । आकारान्तः प्रथमान्तः वाचाशब्दः । स च नामार्थकः । 'यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम्' इति यज्ञाभासे नामयज्ञपद-प्रयोगात् मिथ्यारूपार्थपर्यवसायी ।

न केवलमारभ्यमाणमेव वाचा, अपितु विनाशादिविक्रियावान् अविद्या- तच्चित्संबन्ध-जीवेश्वरविभागादिरनादिरपि **विकारः नामधेयं** - नामैव - नामधेयम्, नाममात्रम् । परंतु कारणं मृत्तिकैव **सत्यं** — अबाध्यम् । एवकारेण विकारस्य सत्यत्वव्यवच्छेदः । 'मृत्तिकेत्येव' इत्यत्र इतिशब्दः आद्यर्थकः । मृत्तिकाद्येव सत्यमित्यर्थः । कोशसिद्धे आदिरूपार्थे इतिशब्दप्रयोगः प्राचीनानां दार्शनिकानां उद्योतकरादीनां परिदृश्यते । घटशरावादीनां तत्त्वं मृदेव । तत्त्वज्ञानमेव ज्ञानमि-त्युच्यते । अन्यदज्ञानमेव । अतः मृत्स्वरूपज्ञाने घटादिकं तत्त्वतो ज्ञातं भवति इत्युपादिशत् ।

एवमुपदिष्टः श्वेतकेतुः, नायमादेशः गुरोः सविधे मया पृष्टः, भवानेव तमुपदिशतु इति पितरं प्रार्थयामास । ततः पुत्राय श्वेतकेतवे सद्विद्यामुपदिदेश उद्दालकः । 'भगवांस्त्वेव मे तद् ब्रवीत्विति । तथा सोम्येति होवाच ।' (छा. 6)

परिदृश्यमानं नामरूपात्मकं जगत् सृष्टेः पूर्वं - प्रलये सद्रूपमेवाऽऽसीत् । यथा लोके वटादिवृक्षः पत्रशाखास्कन्धाद्यनेकावान्तरभेदवान्, सजातीयादश्वत्थवृक्षादेः, विजातीयात् पाषाणादितश्च भेदवान् लक्ष्यते, न तथा भेदत्रयवत् सद्रूपम् । तस्यावान्तरभेदः सजातीयभेदः, विजातीय-भेदश्च नास्ति । भेदत्रयशून्यताबोधनायैव 'सदेव सोम्येदमग्रआसी-देकमेवाद्वितीयम्' इत्यत्र एकपदं, एवकारः, अद्वितीयपदं चेति पदत्रयो-

पादानं स्वारसिकं भवति। द्वितीयपदस्य 'असिद्वितीयोऽनुससार' इत्यादाविव सहायाद्यर्थकत्वे न पदत्रयोपादानं स्वारस्यमश्नुते।

तच्च सद्रूपं 'बहु स्याम्' इति मायावृत्तिलक्षणं संकल्पं कृत्वा, तेजः आपः, अन्नं च (पृथिवीं च) असृजत। ततः तेजआदिकं भूतत्रयं सूक्ष्मत्वात् देवताशब्देन परामृश्य, हन्ताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि (छा. 6) इत्यैक्षत सद्रूपम्।

सद्रूपाज्जातानि तेजोऽबन्नानि भूतसूक्ष्माणि तन्मात्रपदेन व्यवह्रियन्ते। जले छायारूपेण सूर्य इव, भूतसूक्ष्मप्रकृतिके मनसि (सूक्ष्मशरीरे) छायात्मनाऽनुप्रविष्टं सद्रूपं जीवः इत्युच्यते। सद्रूपस्यापरिच्छिन्नत्वात् अहेः बिलादाविव प्रवेशो न संभवतीति प्रतिबिम्ब एव प्रवेशपदेनात्राभिधीयते। तेन जैवेन रूपेणानुप्रविश्य, एवंरूपोऽयमेतन्नामा इति नामरूपव्याकरणमकरोत्। सूक्ष्मभूतानां तेजःप्रभृतीनां व्यवहारार्हता नास्तीति व्यवहारनिर्वहणाय, एकैकं तेजआदि त्रिवृतं-भूतत्रयात्मकमकरोत्। भूतत्रयमपि प्रत्येकमर्धद्वयात्मना विभज्यते। तत्रैकोऽर्धांशः द्वेधा (पादद्वयात्मना) पुनर्विभज्यते। तेजसि अर्धांशः तेजः। जलात् पृथिव्याश्च एकैकपादः समाहृत्य योज्यते। एवमेव जले पृथिव्यां च त्रिवृत्करणं वेदितव्यम्। इत्थं त्रिवृत्कृतं भूतत्रयं स्थूलं व्यवहारक्षमं भवति। एतत्त्रयकार्यमेव स्थावरजङ्गमादिकं भूरादिलोकत्रयं च भौतिकमित्युच्यते।

अथ त्रिवृत्करणप्रक्रियायामुपदिष्टं किञ्चिदनुसन्दधामः। ज्वलन्नग्निरनुभूयते। सोऽयं त्रिवृत्कृतः स्थूलः। तत्रोपलभ्यमानं लोहितरूपं तेजसः, शुक्लं जलस्य, कृष्णं पृथिव्याः। एवं बुद्ध्या अग्नौ

विविच्यमाने नाग्निर्नाम पृथक् तत्त्वमस्ति । अग्नित्वमपगच्छति । कारणभूतानि त्रीणि रूपाणि (सूक्ष्मभूतान्येव) सत्यम् । अग्निरिति वाचारम्भणम् । त्रिवृत्करणप्रक्रियया चेदं तात्पर्येण प्रतिपाद्यते, यत्, सर्वोऽपि भूतभौतिकप्रपञ्चः कारणव्यतिरेकेण नास्ति । एवं तस्य तस्य कारणस्य स्वरूपे विविच्यमाने, तत्तत्कारणव्यतिरेकेणाभावात् सर्वोऽपि कार्यप्रपञ्चः मूलकारणात् सद्रूपात् व्यतिरेकेण नास्ति । केवलं वाचारम्भणमात्रम् । मूलकारणमेकमेव सद्रूपं परमार्थसत्यमिति ।

जाठराग्निना पच्यमानं भुक्तमन्नमपि स्थूल-मध्यम-सूक्ष्मरूपेण परिणमते । खजेन मथ्यमानस्य दध्नः सूक्ष्मभागः उपरि संभूय नवनीत-भावमाप्नोति । स च सर्पिर्भवति । तथैव भुक्तस्यान्नस्य रसः सूक्ष्मः मनोऽवयवैः संभूय मनः उपचिनोति । एवमेव पीतस्य जलस्य सूक्ष्मो भागः प्राणं, तेजसः सूक्ष्मो भागः वाचं चोपचिनोति । अन्नमयं मनः, आपोमयः प्राणः, तेजोमयी वागित्युच्यते । एतत् त्रयमपि मिलितं सूक्ष्मशरीरं लिङ्गशरीरमिति चोच्यते । प्राधान्येन मनः इति व्यव-ह्रियते । तत्र छायारूपेण प्रविष्टं सद्रूपं जीवसंज्ञां लभते ।

अथ जीवस्वरूपं पर्यालोचयामः ।

मनसि ध्यायति सति जीवो ध्यायतीव । अतः मनोऽनुविधायित्वात् जीवः 'मनः' इति शब्देनाऽऽख्यायते, उद्दालकोपदेशे 'तन्मनः दिशं दिशं पतित्वा' इत्यत्र । स एव सुखदुःखादिकमनुभवति जाग्रत्स्वप्नयो-रवस्थयोः । न च तत्र विश्रामं लभते । सुषुप्तौ मनआद्युपाधिविलये सति, जलापाये जलसूर्यः आकाशस्थं बिम्बं सूर्यमिव, स्वरूपमेव सद्रूपं प्रतिपद्यते, जीवत्वं च जहाति । एवं सुषुप्त्यवस्थायामेव जीवस्य जीवत्वविनिर्मुक्तं सत्स्वरूपं दर्शयामि इत्याशयेन 'स्वप्नान्तं मे सोम्य विजानीहि' इत्यादिकमवोचदुद्दालकः ।

सुषुप्तं पुरुषं लौकिकाः स्वपिति इत्याचक्षते। तस्मिन् काले जीवः सता संपन्नो भवति—सदैक्यं प्राप्नोति। मनआद्युपाध्युपरमे मनःप्रतिबिंबितं सद्रूपं जीवाख्यं स्वस्वरूपेण सता ऐक्यं प्राप्नोति। अत एव स्वमपीत इति स्वपिति इति तन्नाम गौणं भवति। स्वशब्दः स्वरूपार्थे मुख्यः। स्वीयाद्यर्थे तु लाक्षणिकः। अतोऽत्र स्वपदेन मुख्यार्थः स्वरूपं बोध्यते। अपिपूर्वस्येतेः संस्कारावस्था-प्राप्त्यनुकूलो व्यापारोऽर्थः। 'जगतः प्रभवाप्ययौ' इत्यादिप्रयोगदर्शनात्। उक्तावस्थारूपफलाश्रयत्वात् स्वमित्यस्य धात्वर्थकर्मता इति स्वमपीतो भवतीति वाक्यार्थनिष्कर्षः। एवं प्रकृतिप्रत्ययार्थपर्यालोचनया सदभेदः पर्यवस्यति। तथाच ज्वरादिरोगार्तस्य ज्वरादीनां विमोके स्वस्थतां प्राप्तस्य विश्रान्तिवत्, जाग्रत्स्वप्नावस्थयोः करणव्यापारजनितश्रमा-पनोदनाय विश्रान्तिलाभाय जीवस्य स्वस्वरूपे सद्रूपे अवस्थानमिति संपिण्डितोऽर्थः। तावता स्वपितिनामनिर्वचनेनापि जीवस्य स्वरूपं सदेवेति ब्रह्माभेदः प्रतिपादितो भवति। यद्यपि सत्संपत्तिः न सदै-क्यम्, सुषुप्तौ जीवब्रह्मभेदस्य 'प्राज्ञेनात्मना संपरिष्वक्तः' इति बृहदारण्यकेऽभिधानात्, अविद्यायाः तदा सत्वेन आविद्यकस्य जीव-ब्रह्मभेदस्य सिद्धान्ते स्वीकाराच्च, तथापि नात्र सद्रूपब्रह्मणा आत्यन्ति-काभेदो विवक्षितः। तथा सति सुषुप्तेः मुक्तेश्च विशेषाभावप्रसङ्गात्। परंतु जाग्रत्स्वप्नयोरिव सुदृढविक्षेपो नास्तीति अभिप्रायेण स्वस्वरूप-प्राप्त्युक्तिरिति मन्तव्यम्।

एवं शरीरादिद्वाराऽपि सद्रूपं ज्ञातुं शक्यते। अन्नरसमयोऽयं देहः। नास्य विकारस्य मूलं विना संभवः। अतः तन्मूलं अन्नं (पृथिवी)। तस्यापि विकारत्वात् तन्मूलं जलम्। तस्यापि मूलं तेजः। तस्यापि विकारत्वात् तन्मूलं परमार्थसत्यं सद्रूपम्। सर्वाश्च प्रजाः सतो मूलात् प्रभवन्ति, तत्रैव तिष्ठन्ति, प्रलये च लयं यान्ति।

तदिदं सद्रूपं परमसूक्ष्मं दुर्विज्ञेयम् । इदं सर्वमपि जगत् तेनैवात्मना आत्मवत् । तदेव परमार्थसत्यं त्रिकालाबाध्यम् । सद्रूपमेव सर्वस्य प्रत्यगात्मा । अतः हे श्वेतकेतो, त्वं मूलकारणपरमार्थसत्य-सद्रूपमसि (सर्वदा) इत्युपदेशमुपसंजहारोद्दालकः ।

'स य एषोऽणिमा ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो ।' (छा. 6-8-2)

एवं बोधितः श्वेतकेतुः, सर्वासामपि प्रजानां सुषुप्तौ सद्रूपे संपत्तौ सत्यां, सति संपद्यामहे इति कुतः सर्वे न जानन्ति इति शङ्काकुलः तत्समाधानबुभुत्सया 'भूय एव मा भगवान् विज्ञापयतु' इति पितरं प्रार्थयामास । समनन्तरखण्डे, वृक्षरसदृष्टान्तेन तां शङ्कां परिहरन्नु-पदिदेश पिता ।

मधुकराः विभिन्नदेशस्थितान् नानाफलरसान् समाहृत्य मधु निष्पादयन्ति । मधुनि विभिन्ना रसाः सन्तोऽपि अयमाम्रस्य रसः, अयं पनसस्येत्येवं विविच्य न गृह्यन्ते । एवमेव प्रतिदिनं सुषुप्तौ सद्रूपतां प्राप्ताः प्रजाः वयं सद्रूपं प्राप्ता इति न जानन्ति । अत एव सद्रूपताऽज्ञानात् सुषुप्ताः पुनः जीवभावं प्राप्नुवन्ति इत्युक्त्वा, पुनः पूर्वोक्तमेवादेशं व्याचख्यौ पुत्राय 'स य एषोऽणिमा...तत्त्वमसि श्वेत-केतो' इति ।

स्वगृहे सुप्तो देवदत्तः प्रातरुत्थाय ग्रामं गच्छति । स च स्व-गृहादागतोऽस्मीति मन्यते । तथा सुषुप्तौ स्वस्थाने सद्रूपे स्थितो जीवः प्रबोधे सत आगतोऽस्मि इति कुतो न प्रतिपद्यते इति शङ्कां मनसि निधाय भूयो मां बोधयतु भवानिति पृष्टवते श्वेतकेतवे, नदीसमुद्रदृष्टा-न्तकथनेन समाधानमाह पिता यथा नद्यः स्यन्दमानाः इत्यादिना ।

समुद्रादेव जलधरैराक्षिप्ताः वृष्टिरूपेण भूमौ पतिताः आपः गङ्गादिनदीरूपाः पुनः समुद्रं प्राप्य समुद्र एव भवन्ति । तत्र समुद्रागता गङ्गाऽऽहमस्मि, यमुनाऽहमिति विवेको न भवति । तद्वत् सुप्तोत्थिताः सद्रूपादागतोऽहमिति न जानन्ति इत्यभिधाय पूर्वोपदिष्टमुपदिदेश 'तत्त्वमसि' इति ।

यद्यपि नदीनां समुद्रस्य च नीरक्षीरयोरिव, मिश्रणमेव नैक्यम्, तथापि यथा नदीसमुद्रयोः भेदः स्पष्टं न भासते, स्पष्टभेदो नास्ति, तथा मनउपहितस्य सुषुप्तौ सद्रूपेण भेदो न स्पष्टः स्फुटावच्छेदकस्याहङ्कारस्य विलयात् इति दृष्टान्तदार्ष्टान्तिकयोः सांगत्यमवसेयम् । न च जीवस्य सद्रूपेणैक्यबोधने सुषुप्तौ स्पष्टभेदाभावोक्तिः कथमुपयुज्यते इति शङ्कनीयम् । सूक्ष्मोपाधिभूताहङ्कारोपलक्षितस्य सुषुप्तौ उपाधेरहङ्कारस्य विलये अविद्यारूपमहोपाध्यवच्छिन्नैक्यवत् महोपाधेरविद्यायाः विद्यया विलये अविद्यावच्छिन्नस्य अनवच्छिन्न (शुद्ध) सद्रूपैक्यं संभवेदिति संभावनाबुद्धिजननद्वारोपयोगात् इति मन्तव्यम् ।

समुद्रजलादुत्थिताः फेनतरङ्गबुद्बुदादयः पुनः समुद्रजलभावं प्राप्ताश्चेत् नष्टा एव भवन्ति । सद्रूपादुत्थिताः छायात्मानो जीवाः सुषुप्तौ मरणे च सद्रूपतां प्राप्ता अपि न नश्यन्ति इत्येतत् दृष्टान्तेन बोधनीयमिति मन्वानः 'भूय एव मा विज्ञापयतु' इति पप्रच्छ । (4)

पुरतो महान् वृक्षस्तिष्ठति । सः जीवेनात्मना अनुव्याप्तः, मूलैः जलं भौमान् रसांश्च गृह्णन् मोदमानस्तिष्ठति । अतः जीवतीत्युच्यते । वृक्षस्यास्य कस्मिंश्चित् प्रदेशे आहते, ततो रसः स्रवति । तदेव अन्तः जीवसद्भावे लिङ्गं भवति । यदा जीवः यस्मात् भागादात्मानमुपसंहरति, तदा तत्र रसाभावात् स भागः शुष्यति । सर्वतः उप-

संहारे समग्रवृक्षः शुष्यति, म्रियते। एवं जीवोऽपि यत् शरीरं जहाति, तत् जीवापेतं शरीरं म्रियते। न जीवो म्रियते। सुषुप्तौ सद्रूपप्राप्तौ नाशे सति, सुप्तोत्थितः स्वापात् पूर्वं कृतकार्यशेषं प्रतिसन्धाय नानुतिष्ठेत्। अतः जीवो न म्रियते इत्यभिधाय पूर्ववदुपदिदेशाऽऽचार्यः।

एतावता सुषुप्तौ जीवस्य सद्रूपताप्राप्तौ प्रसक्ताः शङ्काः उन्मूलिताः। ततः अतिसूक्ष्मस्य सद्रूपस्य अतिस्थूलपृथिव्यादिजगन्मूलत्वमसंभावितमिति शङ्कया, भूयो बोधनं प्रार्थयमास पुत्रः।

पुरतः स्थितस्य महतो न्यग्रोधस्य बीजे अन्तः सूक्ष्मा धानाः सन्ति। तासां भेदने न किमपि पश्यसि। यं सदणिमानमतिसूक्ष्मत्वात् न पश्यसि, एष अणिमैव दृश्यमानमहान्यग्रोधवृक्षाभिन्नस्तिष्ठति। संस्काररूपायामणिमावस्थायां सूक्ष्मायामपि धानायां स्थितिः संभवति। एवमतिसूक्ष्मात् सद्रूपात् स्थूलं नामरूपादिमज्जगदुत्पन्नमिति बोधयित्वा पूर्वोक्तमुपदिदेश पिता।

एवमभिहितेन पुत्रेण, यदि सद्रूपं जगतो मूलं, तदा तत्प्रत्यक्षेणोपलभ्येत इति शङ्कमानेन भूयोऽवबोधनाय प्रार्थितः उद्दालकः, विद्यमानमपि वस्तु नोपलभ्यते, उपायान्तरेण ज्ञायते इति लवणखण्डदृष्टान्तेन निरूपयामास।

लवणपिण्डः चक्षुषा दृश्यते, त्वचा च स्पृश्यते। जले प्रक्षिप्तस्तु स विलीनो भवति। चक्षुषा त्वचा च न प्रत्यक्षीक्रियते। नाप्यादातुं शक्यते। परंतु पीयमानं तज्जलं लवणरसभूयिष्ठमनुभूयते। जले एव स्थितं लवणं रसनया अनुभूयते। एवमिहैव विद्यमानं जगन्मूलं सद्रूपं न प्रत्यक्षीभवति। उपायान्तरेण ज्ञायते इत्यभिधाय पूर्वोक्तमुपदिदेश।

जगन्मूलसद्रूपबोधस्योपायं जिज्ञासुना पुनः प्रार्थितः उद्दालकः गन्धारपुरुषदृष्टान्तेन आचार्योपदेशं तदुपायं निरूपयति 'यथा सोम्य पुरुषं गन्धारेभ्यः' इत्यादिना ।

तस्कराः गन्धारजनपदे स्थितं कञ्चन धनिनं पुरुषं बद्धचक्षुषं विधाय तदीयधनान्यपहृत्य, विजने घोरेऽरण्ये विसृज्य पलायिताः । स च पुरुषः बन्धमोक्षार्थी, अहं गन्धारेभ्यः अभिनद्धाक्ष आनीतः विजनेऽस्मिन्नरण्ये विसृष्टोऽस्मीति विक्रोशति । तथा दैववशात् कश्चन कारुणिकः तं देशमागच्छति । स च विक्रोशतः पुरुषस्य बन्धं मोचयित्वा, गन्धारजनपदमार्गं तस्मै उपदिदेश । पुरुषोऽपि तमुपदेशं प्राप्य सुखी अभूत् । एवं सद्रूपात् स्वस्थानात् प्रच्याव्य अविद्यामोहपटबद्धचक्षुः पुण्यपापतस्करैः अनेकानर्थसंकुले देहारण्ये प्रवेशितः, अहममुष्य पुत्रः, सुखी, दुःखी इत्येवमादि विक्रोशति । पुण्यसञ्चयवशात् सद्ब्रह्मात्मविदाचार्यः यदि आसाद्यते, तदा तेन प्रदर्शितसंसारविषयदोषदर्शनेन विरक्तः, नासि त्वं संसारी अमुष्य पुत्रत्वादिधर्मवान्, किंतु सद्रूपं ब्रह्मैवेति उपदेशेन अविद्यामोहपटबन्धनान्मोक्षितो भवति । तदुपदेशं यथावदवधार्य पण्डितः सन् स्वयमूहापोहकुशलो मेधावी, स्वमेवाऽऽत्मानं सद्रूपं प्राप्य निर्वृतः सुखी भवति । एवमाचार्योपदेशलब्धविज्ञानस्य विदुषः प्रारब्धकर्माधीनशरीरस्य पातपर्यन्तं सत्संपत्तेर्विलम्बो भवति । शरीरपाते सत् संपद्यते ।

'तस्य तावदेव चिरं यावन्न विमोक्ष्ये । अथ संपत्स्ये' (छ. ०) इति श्रुतिः जीवन्मुक्तौ प्रमाणं भवति ।

एवमुपदिष्टः श्वेतकेतुः, विदुषः सत्संपत्तिक्रमजिज्ञासया भूयोऽपि बोधनं प्रार्थयामास । पिता च अविदुषः संसारिणो यः मरणे सत्संपत्तिक्रमः, स एव विदुषोऽपीति, 'पुरुषं सोम्योपतापिनम्' इत्यादिनोपदिदेश ।

विदुष इव अविदुषोऽपि मरणसमये सत्संपत्तेरविशेषात्, अविद्वान् कुतः पुनरावर्तते, विद्वांश्च नावर्तते इति शङ्कया पुनरुपदेशे प्रार्थिते, उद्दालकः, सत्याभिसन्धिबलात् विद्वान् नावर्तते-मुक्तो भवति । अनृताभिसन्धिमत्त्वात् अविद्वानावर्तते - बद्धो भवति इत्येतत् स्तेनस्य तप्तपरशुग्रहणदृष्टान्तकथनपूर्वकमुपदिदेश ।

स्तेयकारितया सन्दिह्यमानं, नाहं स्तेयस्य कर्ता इति वादिनं पुरुषं बद्धहस्तमानीय, राजपुरुषाः तप्तपरशुग्रहणेनाऽऽत्मनः शुद्धिं प्रकाशय इत्याज्ञापयन्ति । बद्धः पुरुषः स्तेन एव सन्, नाहं स्तेयस्य कर्तेति वदन् यदि अग्निना तप्तं परशुं गृह्णाति, तदा सः अनृताभिसन्धिमत्त्वात् परशुना दह्यते। ततः तं स्तेनं निश्चित्य बध्नन्ति राजपुरुषाः। यदि च वस्तुतः स्तेयस्याकर्ता नाहं स्तेयस्य कर्ता इत्यभिधाय, परशुं गृह्णाति, तदा सः सत्याभिसन्धिमत्त्वान्न दह्यते । बन्धाच्च तं मोचयन्ति राजकीयाः । एवमविद्वान् सत्यात्मज्ञानरहितत्वात् मरणे सत्संपन्नोऽपि पुनर्बन्धमवाप्नोति । विद्वान् सत्याभिसन्धिबलात् सत् संपन्नः पुनर्बन्धमनवाप्य मुक्तो भवति इत्येवं निरूप्य 'स य एषोऽणिमा ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि' इति वाक्येनोपदेशमुपसंजहार पिता । श्वेतकेतुः तत्त्वदर्शी बभूव । 'तद्धास्य विजज्ञौ ।' इति ।

अत्रेदमवधेयम् - इदं सर्वं ऐतदात्म्यम् इत्यत्र, 'एष चासौ आत्मा एतदात्मा, एतदात्मन इदं ऐतदात्म्यम् । सर्वं जगत् एतदात्मसंबन्धीत्यर्थः ।' इति विवरणं, संबन्धरूपार्थे ष्यङ्प्रत्ययस्य व्याकरणानुशासनासिद्धत्वादसमञ्जसम् । परंतु, एष आत्मा यस्येति बहुव्रीहिसमासेन एतदात्मसंबन्धीति लभ्यते । स्वार्थे ष्यङ्प्रत्ययः । एतदात्मैव ऐतदात्म्यमिति, सुखमेव सौख्यमितिवत् ।

'एतत्-सत् आत्मा यस्य सर्वस्य तत् एतदात्म । तस्य भावः ऐतदात्म्यम् ।' इति भगवत्पादभाष्यम् । तत्र भावार्थकः प्रत्ययः इति प्रतीयते । इदं सर्वं ऐतदात्म्यमिति सामानाधिकरण्यं भावभवित्रोरभेदोपचारात्, 'यो वै भूमा तत्सुखम्' (छा.) इत्यत्रेव निर्वहणीयम्। अथवा भाष्ये भावशब्दः स्वरूपार्थकः इति न सामानाधिकरण्यानुपपत्तिः, एतदात्मकस्वरूपं सर्वमिति ऐतदात्म्यमिदं सर्वमिति वाक्यतो बोधात् । भावार्थकप्रत्ययस्य स्वरूपपरत्वं च, "इत्येषा **परमार्थता**" इति श्रुतौ,

'प्रत्यस्तमितभेदं यत् **सत्तामात्रमगोचरम्** ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥'

इति स्मृतौ, सामान्यलक्षणाविचारे 'इन्द्रियसंबद्ध**विशेषणता**' इति तत्त्वचिन्तामणौ च दृष्टचरं बोध्यम् । आनुमानिकाधिकरणे, 'तस्य भावः **सत्ता**' इति टीकायामपि भावशब्दः स्वरूपवाची ।' इति परिमलकारा वर्णयन्ति ।

वस्तुतस्तु, भाष्ये भावशब्दः प्रकृतिजन्योपस्थितिप्रकाररूपभावमेव बोधयति । एतदात्म इति ष्यङ्प्रत्ययप्रकृतितः जन्ये एतदात्मसंबन्धीति प्रत्यये प्रकार आत्मा । स एव ष्यङ्प्रत्ययार्थः । तथाच 'इदं सर्वं यदयमात्मा' इति बृहदारण्यकानुसारी,' सदेव सोम्येदमग्र आसीत्' इत्युपक्रमानुसारी च इदं सर्वं एष आत्मा इति वाक्यार्थः संपद्यते । आत्मात्मीयभावेन सामानाधिकरण्याभावबोधनाय बहुव्रीहि - भावप्रत्यययोरुपादानम् । इदं सर्वं एष आत्मेति सामानाधिकरण्यं न मृद् घटः इतिवदिति बोधनाय तत् सत्यमित्युक्तम् । तथाच यश्चोरः स स्थाणुः इत्यत्रेव बाधायां सामानाधिकरण्यमित्युक्तं भवति । मोक्षधर्मे च सद्विद्योपबृंहणभूते श्वेतकेतुसुवर्चलोपाख्याने, 'सदर्थे कल्पितं सर्वं

सदर्थो विष्णुरेव हि' इति जगतः सद्रूपविवर्तता स्पष्टमभिहिता ।। स आत्मा—सद्रूपं सर्वस्य प्रत्यगात्मा । निरुपपदस्याऽऽत्मशब्दस्य प्रत्यगात्मनि निरूढत्वात् । अतः त्वं-तदसि-जगन्मूलभूतं सद्रूपं ब्रह्मासि । सोऽयं देवदत्तः इति वाक्यं देवदत्तस्वरूपैक्यमिव, तत्त्वमसिवाक्यं जीवस्वरूपं ब्रह्मैवेति स्वरूपैक्यं बोधयति । इदं महावाक्यमिति व्यवहरन्ति । इत्थं च प्रपञ्चस्य वाचारम्भणमात्रत्वात्, जीवस्य च सद्रूपमेकमेव तत्त्वमिति, तज्ज्ञाने सर्वमपि तत्त्वतो ज्ञातं भवतीति सद्विद्योपक्रमे प्रस्तुता एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा साधु निर्व्यूढा भवति ।।

जीवब्रह्मणोः भेद एव शास्त्रार्थः इति मन्यमानाः केचित्, तत्त्वमसिवाक्यमन्यथा व्याचक्षते । स्वरूपैक्यबोधकत्वाङ्गीकारे, सर्वज्ञत्वादिविशिष्टचैतन्यवाचकस्य तत्पदस्य, किञ्चिज्ज्ञत्वादिविशिष्टचैतन्यवाचकस्य त्वंपदस्य च विशेष्यमात्रे जहदजहल्लक्षणाया आश्रयणीयत्वेन गौरवात्, एकस्मिन्नेव तत्पदे तदधीनाद्यर्थलाक्षणिकत्वस्वीकारः समुचितः । तदधीनस्त्वमसि इत्यादिको वाक्यार्थः इति वर्णयन्ति ।

पूर्वोक्तरीत्या उपक्रमोपसंहारादितात्पर्यग्राहकप्रमाणैः अद्वितीयसद्रूपे तात्पर्यस्य निर्णयात् तात्पर्यविषयार्थावबोधाय पदद्वये जहदजहल्लक्षणाश्रयणं युक्तमेव । उपक्रमाद्यवधृततात्पर्यानुसारेण वृत्तिः कल्पनीया, न तु वृत्तिकल्पनालाघवानुरोधेन तात्पर्यं कल्पनीयम् । अन्यथा विधिवाक्येनैकवाक्यतामाश्रित्य अनेकेषामर्थवादानां प्राशस्त्ये लक्षणाश्रयणमसंगतं स्यात् । यत्र तु तात्पर्यनिर्णायकमुपक्रमादिकं नास्ति, तत्र निषादस्थपतिं याजयेदित्यादौ वृत्तिकल्पनायां लाघवमाद्रियते । तदुक्तं चिन्तामणिकृद्भिः "तात्पर्याद्धि वृत्तिः, न तु वृत्तेस्तात्पर्यम् ।" इति ।

परमार्थतस्तु तत्त्वमसीत्यत्र शक्त्यैव स्वरूपबोधः, न लक्षणया। तत्र प्राचामाचार्याणां लक्षणेत्युक्तिरौपचारिकी। तदुक्तं **श्री मधुसूदन-सरस्वतीस्वामिपादैः**—"जहदजहल्लक्षणाश्रयणेन शक्यैकदेशपरित्यागेऽपि सोऽयं देवदत्तः इत्यादिवाक्ये इव शक्यैकदेशस्यान्वयाभ्युपगमात्, विशेषणबाधेन विशेष्यमात्रान्वयस्यैवात्र लक्षणाशब्देन व्यपदेशात्"। इति। "**विशेष्यमात्रान्वयस्य** - विशेष्यमात्रशब्दधीप्रयोजकविशेष्यमात्रोपस्थितेः। **व्यपदेशादिति** विशिष्टशक्तिज्ञानाकार्यशाब्दधीजनकोपस्थितित्वरूपलक्षणासाधर्म्यात् शक्योपस्थितेरपि लक्षणात्वोपचारः" इति व्याचक्षते **श्री ब्रह्मानन्दसरस्वतीस्वामिपादाः**। बलवदनिष्टाननुबन्धित्वसमानाधिकरणेष्टसाधनत्वे विधिप्रत्ययस्य शक्तत्वेऽपि श्येनेनाभिचरन्यजेतेत्यादौ बलवदनिष्टाननुबन्धित्वांशं विहाय केवलेष्टसाधनत्वस्य बोधः विनैव लक्षणां भवतीति मणिकारादयो वदन्ति। तथाच तत्त्वमसीत्यत्र स्वरूपबोधाय लक्षणाया एवानाश्रयणात् पदद्वये लक्षणायां गौरवात् एकस्मिन्नेव तत्पदे लक्षणेत्युक्तिः सुदूरापास्तेति विभावनीयम्।

एवं तत्पदोपरि सप्तम्यादीनां विभक्तीनां 'सुपां सुलुक्' इति अनुशासनेन लोपं परिकल्प्य महता क्लेशेन, तस्मिन् त्वमसि, तेन त्वमसि, तस्य त्वमसि इत्यादिनैकविधव्याख्यानमप्यनादरणीयमेव।

एवं 'शरीरशरीरिभावाभिप्रायकं तत्त्वमसिवाक्यम्। शरीरवाचकानां शब्दानां शरीरिपर्यन्तता अहं मनुष्यः इत्यादिषु दृष्टा। जीवश्चेश्वरस्य शरीरम्, 'यस्यात्मा शरीरम्' इति श्रुत्यन्तरात्। अतः जीवबोधकेन त्वच्छरीरकं (जीवशरीरकं) बोध्यते इति अपरेषां विवरणमपि न समञ्जसम्।

अत्र असीति मध्यमपुरुषश्रवणात् त्वमिति पदमेव विशेष्यसमर्पकम्, न तत्पदम्। त्वंपदं न विशेषणसमर्पकम्। दृश्यते च श्रुत्यन्तरे, त्वंपदार्थस्य विशेष्यत्वे विशेष्यवाचकपदानुसारिणः मध्यमपुरुषस्य, विशेषणत्वे विशेष्यवाचकपदानुसारिणः उत्तमपुरुषस्य च प्रयोगः 'त्वं वा अहमस्मि भगवो देवते, अहं वै त्वमसि,' इत्यादौ। तस्मादत्र त्वंपदार्थविशेष्यको बोधो वक्तव्यः। त्वंपदार्थे एव तत्पदेन ब्रह्मशरीरत्वं बोधनीयम्। ब्रह्म च न जीवस्य शरीरमिति, शरीरवाचकानां शरीरिपर्यन्तताभ्युपगमेऽपि वाक्यस्वारस्यहानिः स्पष्टैवेति।

अन्ये भेदाभिनिवेशिनः, शब्दो नित्यः घटवत् इति वाक्ये घटदृष्टान्तानुसारेण अनित्यः इति पदच्छेदः क्रियते। तथैव 'स आत्मा तत्त्वमसि' इत्यत्र शकुनि-सूत्रादीनां, नदीसमुद्रादीनां च दृष्टान्तानामनुसारेण अतत्त्वमसीति पदच्छेदं कृत्वा, नवकृत्वः जीवे त्वंपदार्थे ब्रह्मभेद एवोपदिष्टः इति व्याचक्षते।

शब्दो नित्यः इति वाक्ये अनित्यः इति पदच्छेदाकरणे न कथमपि घटदृष्टान्तः संगच्छते। प्रकृते तु जीवब्रह्माभेदोपपादकतयैव स्वरसतः सर्वदृष्टान्तानां प्रवृत्तेरुपपादितत्वात् अतदिति पदच्छेदो नावश्यकः। अपिच जीवब्रह्माभेदस्य कथमप्यप्राप्तेः भेदबोधकं अतत्त्वमसीति वाक्यं अप्रसक्तप्रतिषेधकं भवेत्। नाहं ब्रह्मेति प्रत्यक्षसिद्धजीवब्रह्मभेदबोधकत्वेन शास्त्रस्याप्राप्तार्थबोधकत्वलक्षणं प्रामाण्यमपि भज्येत। अप्राप्ते शास्त्रमर्थवदिति न्यायात्। ब्रह्मणः वेदैकमेयत्वेन तदीयभेदः न मानान्तरप्राप्त इति न शङ्कनीयम्। स्तम्भे अतीन्द्रियपिशाचप्रतियोगिकभेदस्येव जीवे ब्रह्मप्रतियोगिकभेदस्य नाहं ब्रह्मेति प्रत्यक्षसंभवात्। जीवब्रह्मभेदाङ्गीकारे, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानिर्वाहस्य ब्रह्म-

ज्ञानेन जीवज्ञानासंभवेन कथमप्यसंभवाच्च । ब्रह्मज्ञानेन सादृश्यात् जीवज्ञानोक्तौ प्रतिज्ञाया गौणतया मुख्यत्वासंभवेन ब्रह्मसूत्रेषु प्राधान्येन तत्प्रतिज्ञानिर्वाहकरणस्यासंगतत्वापत्तेश्च । तस्मात् अतत्त्वमसीति पदच्छेदेन व्याख्यानमत्यन्तमनुपादेयमिति बोध्यम् ।

तथाच अद्वितीयमेकं सद्रूपं तत्त्वं तात्पर्येण नवकृत्वः उपदिशन्तीयं सद्विद्या राजविद्येति पूर्वाचार्यैर्व्यवस्थापितमित्यवधातव्यमिति शिवम् ।

इति सद्विद्याभिधानं दशमं प्रसूनं समाप्तम् ।

फलवाक्यार्थनिरूपणम्

एकादशं प्रसूनम्

ललितैः पदविन्यासैः या नृत्यति विबुधवदनरङ्गेषु ।
सच्छास्त्रवेदवाद्यैः सरस्वतीं तां नमस्यामः ।।
विरुद्धधर्मद्वयसंनिपातेऽप्यभेद एवेति विभावयन्तम् ।
पुनातु भेदप्रतिभासशून्यं स्त्रीपुंसरूपं शिवयोः शरीरम् ।।

छान्दोग्ये अष्टमेऽध्याये- एकशतवर्षब्रह्मचर्यवासेन सम्यक् प्रक्षीण-कलमषाय देवेन्द्राय, ब्रह्मा आत्मविद्यां तत्फलं चोपदिदेशेति श्रूयते । जागरिते स्वप्ने च जरामरणभयशोकादिमान् जीवः इति भ्रान्ति-निवारणाय, शरीरनिन्दापूर्वकं, तेषां सांसारिकदोषाणां स्थूल-सूक्ष्म-शरीरधर्मत्वमेव न जीववृत्तिता । निर्मलेऽपि वस्त्रे मालिन्यादिदोष-युक्तकर्दमसंबन्धेन मालिन्यादिदोष इव सांसारिकदोषाश्रयस्थूलसूक्ष्म-शरीरद्वयसंबन्धात् जीवे सांसारिकदोषसंबन्धः इत्यपि न वक्तुं शक्यते । यतोऽयं जीवः अशरीरः—शरीरसंबन्धरहितः । तस्य शरीरेण सह अध्यासातिरिक्तः न कोऽपि पारमार्थिकः संबन्धोऽस्ति । परंतु जपाकुसुम-गतलौहित्यस्य स्फटिके इव आध्यासिकानुभव एव आत्मनि जरा-मरणभयशोकादिमत्त्वानुभवः इत्यभिसन्धिना 'मघवन् मर्त्यं वा इदं शरीरमात्तं मृत्युना, तदस्यामृतस्याशरीरस्याऽऽत्मनोऽधिष्ठानम्' । छा.

इत्युवाच प्रजापतिः । तदनन्तरं, संसारदोषनिदानं सशरीरत्वमेव, अशरीरत्वं संसारदोषविरोधि, सशरीरेणानुभूयमानं सर्वमपि प्रियमप्रिय-संसृष्टमेव, कार्यकरणात्मकशरीररहिताः वायुः, अभ्रं, स्तनयित्नुः इत्येवमादयः प्रियाप्रियसंबन्धरहिताः, तद्वत् अशरीरः प्रियाप्रियसंबन्ध-रहितः इति 'आत्तो ह वै सशरीरः प्रियाप्रियाभ्यां. न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति, अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः, अशरीरो वायुरभ्रं विद्युत् स्तनयित्नुः इत्येतान्यशरीराणि ।' इत्यादि-वाक्यैः उपदिदेश ।

सशरीरो भूत्वा स्वात्मनः अन्येषां चानुभवेन यत् प्रियं लभते स एव पुरुषार्थः । तद्रहितः नष्टप्रायः सुषुप्तजीवस्तु न पुरुषार्थः इति इन्द्रस्य भ्रान्तिरभूत् । अत्र प्रियस्य अप्रियसंसृष्टतास्वभाववर्णनेन हेयतायाः प्रदर्शनात् सा भ्रान्तिरिन्द्रस्य निवारिता भवति । तथाच तदमृतस्याशरीरस्याऽऽत्मनः इत्यत्र अमृतशब्देन 'यो वै भूमा तदमृतं, तत्सुखम्' इत्यादिश्रुतिसिद्धं भूमाख्यनिरतिशयसुखमेव सकलानर्थाध्यास-निवृत्तावाविर्भूतं पुरुषार्थः इत्युपदिष्टं भवति ।

तदनन्तरं, अध्यासतिरोहितस्यामृतस्याऽऽविर्भावप्रकारं सदृष्टान्त-माह—'तद्यथा एतान्यमुष्मादाकाशात्समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यन्ते । एवमेवैष संप्रसादः अस्माच्छरीरात्समुत्थाय परं-ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते । स उत्तमः पुरुषः ।' इति ।

वर्षावसाने अशरीराः वाय्वादयः अतिसूक्ष्मभावेन आकाशसाम्यमा-पन्नाः, प्रावृडारम्भे किञ्चिच्छूनाः, सूर्यकिरणज्योतीरूपं सहकारिणं प्राप्य पुरोवातादिरूपेणाऽऽविर्भवन्ति । एवं एष संप्रसादः-जीवः अहं मनुष्यः, गौरः, स्थूलः, कृशः इत्याद्यध्यासेन शरीरसाम्यमापन्नः, आचार्यमुखात् वेदान्तश्रवणेन, स्वयं मननेन च यौक्तिकं स्थूल-सूक्ष्मशरीराद्विवेकं लब्ध्वा,

'ज्योतिषां ज्योतिः' इति श्रुतिषु प्रसिद्धं परं-ज्योतिश्शब्दितं परमात्मानमुपसंपद्यते। अथ च स्वस्वरूपेणाभिनिष्पद्यते। सः, गीतासु क्षराक्षरविलक्षणतया प्रतिपादितः उत्तमः पुरुषः ब्रह्मैव। निवृत्तनिखिलबन्धब्रह्मात्मनाऽवस्थितिः आत्मविद्याफलमिति उक्तश्रुत्या अवगम्यते।

अत्र परस्य ज्योतिषः उपसंपत्तिः का? स्वरूपेणाभिनिष्पत्तिश्च कीदृशी? उपसंपद्य इत्यत्र क्त्वाप्रत्ययार्थः कः? इति चिन्त्यते। ज्योतिषः उपसंपत्तिः—प्राप्तिः, अनावृतस्फुरणरूपब्रह्मात्मना ऐक्यपर्यवसिता। वर्षावसाने आकाशे सूक्ष्मरूपेण स्थितानां वाय्वादीनां प्रावृडारम्भे किञ्चिदुच्छूनतया विविक्तानां सौरं तेजः सहकारि प्राप्य पुरोवातादिना स्वेन रूपेणाभिव्यक्तिकथनेन, दृष्टान्ते तेजः-प्राप्तेरुपादानात्। अभिनिष्पत्तिः—अभिव्यक्तिः—साक्षात्कारः वृत्त्यात्मकः इति दृष्टान्तेन सह दार्ष्टान्तिकसंगतिमनुरुध्य दहराधिकरणे भगवत्पादाः उपसंपत्तिपदार्थं अभिनिष्पत्तिपदार्थं च वर्णयन्ति। तथाच भाष्यम्—'देहाद्युपाध्यविविक्तस्यैव सतो जीवस्य श्रुतिकृतं विवेकविज्ञानं शरीरात् समुत्थानम्। विवेकविज्ञानफलं स्वरूपेणाभिनिष्पत्तिः केवलाऽऽत्मस्वरूपावगतिः।' इति।

अत्रेयं शङ्का अवतरति—उपसंपद्येत्यत्र क्त्वाप्रत्ययः उपसंपत्तेः गुणभूतक्रियायाः अनन्तरकालिकत्वं मुख्यक्रियायां अभिनिष्पत्तौ बोधयति। 'समानकर्तृकयोः पूर्वकाले' (पा-सू,) इत्यनुशासनात्। तच्चासंगतम्, साक्षात्काररूपाभिनिष्पत्त्यनन्तरकालिकत्वादैक्यात्मकोपसंपत्तेः, अभिनिष्पत्तौ उपसंपत्त्यनन्तरकालिकत्वस्य बाधादिति। तत्परिहाराय, 'अत्र चोपसंपत्तावुत्तरकालायामपि क्त्वाप्रयोगः मुखं व्यादाय स्वपिति इतिवन्मन्तव्यः' इति भामतीकारा वदन्ति। मुखव्या-

दानस्य स्वापोत्तरकालत्वात्, तत्र सुप्त्वा व्यादत्ते इति विपर्यासकरणवत्, अत्रापि अभिनिष्पद्य उपसंपद्यते इति विपर्यासः करणीयः इति तेषामाशयो भाति ।

परन्तु, वैयाकरणाः, क्त्वाप्रत्ययस्य नोत्तरकालीनत्वार्थकतां स्वीकुर्वन्ति । 'अव्ययकृतो भावे' इत्यनुशासनात् भावार्थकत्वमेव मन्यन्ते । भावः क्त्वाप्रत्ययप्रकृतिधातोरर्थः । तदर्थकत्वं च प्रत्ययस्य साधुतायामुपयुज्यते । क्त्वाप्रत्ययप्रकृत्यर्थभूतायाः क्रियायाः स्वसमानकर्तृकायां प्रधानीभूतक्रियायां तात्पर्यविषयतत्तत्संबन्धेनान्वयः । स्नात्वा गच्छति इत्यत्र स्नान-गमनक्रिययोः न कार्यकारणभावो विवक्षितः, अपितु पौर्वापर्यमात्रम् । अतः तत्र गुणभूतस्नानक्रियायाः उत्तरकालीनत्वसंबन्धेन प्रधानगमनक्रियायामन्वयः । भुक्त्वा तृप्यति इत्यादौ तृप्तौ भोजनजन्यतायाः तात्पर्यविषयत्वात् गुणभूतभोजनक्रियायाः जन्यत्वसंबन्धेन मुख्य-तृप्तिक्रियायामन्वयः । भोजनजन्या तृप्तिरिति बोधः । वेदमधीत्य तिष्ठति इत्यत्र अध्ययन - तिष्ठतिक्रिययोः न पौर्वापर्यं, न वा कार्यकारणभावे तात्पर्यम्, अपितु यदा अयं वटुस्तिष्ठति, तदा अधीयान एव तिष्ठतीति समानकालावच्छिन्नव्याप्यव्यापकभावे इति, गुणभूताध्ययनक्रियायाः समानकालावच्छिन्नव्याप्यव्यापकभावसंबन्धेन स्थितिक्रियायां प्रधानीभूतायामन्वयः । नेत्रे निमील्य हसति इत्यत्र नेत्रनिमीलन—हासक्रिययोः समानकालिकयोः पौर्वापर्याभावात् निमीलनक्रियायाः समानकालीनतासंबन्धेन हासक्रियायामन्वयः । एवमेव मुखं व्यादाय स्वपिति इत्यत्रापि व्यादानक्रियायाः समानकालिकत्वसंबन्धेन स्वापक्रियायामन्वयः, न तु उत्तरकालीनतासंबन्धेन , तयोः क्रिययोः समानकालिकत्वादिति वदन्ति ।

एतन्नये, उपसंपद्य अभिनिष्पद्यते इत्यत्र उपसंपत्त्यानन्तर्यस्य साक्षात्काररूपाभिनिष्पत्तावभावेऽपि, साक्षात्कारे सति उपसंपत्तिरूपकार्यस्यावश्यंभावेन, उपसंपत्त्यभिनिष्पत्त्योः व्याप्यव्यापकभावसद्भावात्, उपसंपत्तिक्रियायाः व्याप्यव्यापकभावसंबन्धेन (व्यापकतासंबन्धेन) अभिनिष्पत्तिक्रियायामन्वयेन परंज्योतिरुपसंपत्तिव्यापकसाक्षात्कारात्मकाभिनिष्पत्तिमानिति बोधः ।

नैयामिकास्तु, स्नात्वा गच्छतीत्यादौ उत्तरकालीनत्वसंबन्धेन स्नानक्रियायाः गमनेऽन्वये, न स्नात्वा गच्छति इत्यत्र प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ इति न्यायेन उत्तरकालीनत्वसंबन्धेन स्नानाभावस्य गमने बोधनं वक्तव्यम् । तच्च न संभवति । उत्तरकालीनत्वस्य वृत्त्यनियामकत्वेनाभावप्रतियोगितावच्छेदकसंबन्धताविरहेण तत्संबन्धावच्छिन्नप्रतियोगिताकस्नानाभावस्याप्रसिद्धेः । अतः वृत्तिनियामकेन आश्रयतासंबन्धेन गमनान्वयि उत्तरकालीनत्वमेव क्त्वाप्रत्ययार्थः, अव्ययकृतामनेकार्थत्वात् । नञ् समभिव्याहारे च आश्रयतासंबन्धेन उत्तरकालीनत्वाभावो बोध्यते इति नानुपपत्तिः । एवमेव सर्वत्र वैयाकरणनये संसर्गतया भासमानस्य न्यायमते क्त्वाप्रत्ययार्थतया शाब्दबोधे प्रकारतया भानमिति फलतो न विशेषः । इत्थंच उपसंपद्य अभिनिष्पद्यते इत्यत्र व्याप्यव्यापकभाव एव (व्यापकत्वमेव) क्त्वाप्रत्ययार्थो बोध्यः इति वदन्ति ।

एवं क्त्वाप्रत्ययप्रकृत्यर्थक्रियायाः जनकतासंबन्धेनापि प्रधानीभूतक्रियायामन्वयो दृश्यते । अत एव, झणात्कृत्य कंसः पतितः इत्यत्र झणात्कारस्य जनकतासंबन्धेन पतनक्रियायामन्वयः । पतने झणात्कारानन्तरकालिकत्वस्य, झणात्कारकार्यत्वस्य चाभावात् । नैयायिकधुरन्धराः

पुणताम्बेकरोपनामकश्रीमहादेवपण्डिताः न्यायकौस्तुभे, झणात्कृत्य पतितः कंसः इत्यत्र जनकत्वं क्त्वाप्रत्ययार्थ इति, झणात्कारजनकं पतनमिति बोधः इति च वर्णयन्ति ।

एवं मुखं व्यादाय स्वपितीत्यत्र, स्वापस्य मुखव्यादानजनकत्वात् मुखव्यादानजनकः स्वापः इति बोधोऽपि संभवति । एवंच उपसंपद्याभिनिष्पद्यते इत्यत्र उपसंपत्तेः जनकतासंबन्धेन अभिनिष्पद्यते इत्यत्र उपसंपत्तेः जनकतासंबन्धेन अभिनिष्पत्तावन्वयेन, जनकत्वस्य क्त्वाप्रत्ययार्थतास्वीकारेण वा उपसंपत्तिजनकाभिनिष्पत्तिमान् इति बोधोपगमे न काप्यनुपपत्तिः । भामतीकाराणामपि अत्रैव बोधे तात्पर्यं न क्रियाव्यत्यासे, कण्ठतस्तैस्तथाऽनुक्तेरिति ध्येयम्। वस्तुतस्तु, शरीरात् समुत्थानं—मननादिकृतः यौक्तिकः आत्मनि शरीरविवेकः । उपसपत्तिः—ब्रह्माभेदेन साक्षात्कारः । अभिनिष्पत्तिः—आविर्भावः। साक्षात्काराभावे सहजस्वरूपस्य अभावः-अज्ञानम्, साक्षात्कारसत्त्वे सहजस्वरूपसत्वमिति क्षैमिकी साक्षात्कारजन्यतारूपस्वरूपाविर्भावं, उपसंपद्य स्वेन रूपेणाभिनिष्पद्यते इति वाक्यं बोधयति । एतादृशक्षैमिकजन्यताप्रतिसन्धानेनैव मुमुक्षवः प्रवर्तन्ते । अथवा, आत्मस्वरूपतिरोधायकाज्ञान-तत्कार्यनिवृत्तिरूपः आविर्भावः । स च आत्मस्वरूपमात्रपर्यवसन्नः अभिनिष्पत्त्यर्थः। एवंच उपसंपत्तिमान् - तत्त्वसाक्षात्कारवान् स्वरूपेणैव जायते, न तु आगन्तुकफलवत्तया इति, स्वरूपात्मक - अज्ञानतत्कार्यनिवृत्तिमान्, न तु आगन्तुकफलवानिति वा उक्तश्रुतेरर्थः । इत्थंच साक्षात्कारात्मकोपसंपत्त्युत्तरकालीनत्वस्य अभिनिष्पत्तौ सत्वात् उपसंपद्येत्यत्र क्त्वाप्रत्ययस्योत्तरकालीनत्वार्थकतायामपि न कापि क्षतिः ।

14

न च 'सता सोम्य तदा संपन्नो भवति' 'सति संपद्य न विदुः' इत्यादिश्रुतौ ऐक्ये एवार्थे संपत्तिशब्दः प्रयुक्तः इति न तस्य साक्षात्कारार्थकत्वं युक्तम्। उपेति उपसर्गरहितसंपत्तिशब्दस्यैक्ये प्रयोगेऽपि उपसंपद्य इति उपोपसृष्टसंपत्तिशब्दस्य साक्षात्कारार्थकत्वमिति स्वीकारेऽपि दृष्टान्तासंगतिः। वाय्वादौ दृष्टान्ते सौरतेजःप्राप्तेरेवोपसंपत्तिरूपत्वात् दार्ष्टान्तिकेऽपि प्राप्त्यर्थकताया एव समुचितत्वादिति वाच्यम्। अर्थभेदेऽपि समानशब्दोपादानमात्रेणोपमानोपमेयभावः 'यथा ह वै श्येनो निपत्यादत्ते, एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते' इति वेदे दृश्यते। न हि श्येनपक्षिणः आकाशादधो निपत्य मत्स्याद्यादानमिव श्येनयागस्य दार्ष्टान्तिकस्य निपत्यादानं संभवति। तत्रेवात्रापि दृष्टान्ते वाय्वादौ दार्ष्टान्तिके जीवे च उपसंपद्येत्यस्यार्थभेदेऽपि समानशब्दमात्रेण दृष्टान्तदार्ष्टान्तिकभावः उपपद्यते।

अपिच, उपसंपत्तेः प्राप्तिरूपत्वेऽपि प्राप्तेः ज्ञानात्मकत्वेन उपसंपद्येत्यत्र साक्षात्कारात्मकज्ञानार्थकत्वमुपपद्यते। गुरोः सकाशादयमर्थोऽवगतः इति तात्पर्येण गुरोरयमर्थः प्राप्तः इति प्रामाणिकप्रयोगदर्शनात्। तथाच शरीरात् समुत्थाय - यौक्तिकं विवेकं लब्ध्वा, ततः परं ज्योतिः उपसंपद्य-स्वाभेदेन साक्षात्कृत्य, स्वेन रूपेणाभिनिष्पद्यते-विगलितनिखिलबन्धस्वात्मनाऽवस्थितो भवति इति पर्यवसितः स्वारसिकः श्रुत्यर्थः। ईदृशस्वात्मनाऽवस्थितेः साक्षात्कारानन्तरकालीनत्वात् नानुशासनविरोधशङ्काऽप्युन्मिषति।

ज्ञानेनाज्ञानतत्प्रयुक्तदृश्यानां न ध्वंसो जायते। तथा सति दृश्यध्वंसस्य तस्य नाशकाभावेन परिशेषापत्त्या 'विद्वान् नामरूपाद्विमुक्तः' इति श्रुतिबोधितस्य विदुषि सर्वदृश्योच्छेदस्य बाधापत्तेः। परन्तु तत्त्व-

ज्ञानानन्तरक्षणे अज्ञानतत्प्रयुक्तकार्यादि दृश्यं न तिष्ठति। अज्ञानतत्कार्य-दृश्याश्रयकालपूर्वः तत्त्वज्ञानोत्पत्तिक्षणो न भवति। तावता ज्ञाना-नन्तरं अज्ञानतत्कार्यदृश्याननुवृत्तिः पर्यवस्यतीति **श्री ब्रह्मानन्दस्वामि-श्रीचरणाः** व्यवस्थापयन्ति। अस्मिन् पक्षे उपसंपत्तिः — साक्षात्कारः स्वरूपेणाभिनिष्पत्तिः — स्वरूपाज्ञानतत्प्रयुक्तदृश्याधिकरणकालपूर्वत्वान-धिकरणकालोपहितत्वम्। शुक्तिः पूर्वं रजतत्वेन ज्ञाता इदानीं (शुक्ति-त्वसाक्षात्कारकाले) स्वरूपेणाभिनिष्पन्ना इति लौकिकप्रयोगे तथा प्रत्ययात्। दृश्याश्रयकालपूर्वत्वानधिकरणकालश्च तत्त्वसाक्षात्कारोत्पत्ति-क्षण एव। इत्थं च साक्षात्कारकाले एव उक्ताभिनिष्पत्तिर्वर्तते। अत नेत्रे निमील्य हसति इत्यत्रेव उपसंपद्याभिनिष्पद्यते इत्यत्र साक्षात्कारात्म-कोपसंपत्तिसमानकालिकत्वं उक्ताभिनिष्पत्तौ बोध्यते। समानकालि-कत्वं क्रिययोः संसर्गः क्त्वाप्रत्ययार्थो वेत्यन्यदेतत्। **अप्पय्यदीक्षितास्तु** साधको जीवः स्वाभेदेन ब्रह्मसाक्षात्कारानन्तरं, मायाबिम्बभूतसगुण-ब्रह्मभावमापद्यते, जलापाये जलसूर्यः आकाशस्थबिम्बभूतसूर्यभावं यथा आपद्यते तद्वत्। यावत्सर्वमुक्ति अन्ये जीवाः प्रतिबिम्बभूताः सन्ति। प्रतिबिम्बानां सत्वे ब्रह्मणः बिम्बरूपत्वं नापैति, प्रतिबिम्बप्रतियोगि-त्वस्यैव बिम्बत्वस्वरूपत्वात्। तदा सगुणब्रह्मभावापन्नः जक्षणादि-लीलाभोगाननुभवति। ततः सर्वमुक्तौ विश्वमायानिवृत्त्या प्रतिबिम्बा-नामभावात् प्रतिबिम्बप्रतियोगित्वरूपबिम्बत्वस्यापायात् स्वरूपेण चिन्मात्ररूपेणावस्थितो भवति। ततश्च, अत्र शरीरात् समुत्थानं - साक्षा-त्कारपर्यन्तविवेकज्ञानम्। परंज्योतिः - बिम्बात्मकं सगुणं ब्रह्म। सगुण-ब्रह्मभावः - तद्रुपसंपत्तिः। स्वेन रूपेणाभिनिष्पत्तिः - केवलात्मरूपेणा-वस्थानम्। संप्रसादः - जीवः, शरीरात् समुत्थाय - स्थूल - सूक्ष्मशरीर-विलक्षणात्मसाक्षात्कारं प्राप्य, परं ज्योतिरुपसंपद्य - बिम्बात्मकसगुण-ब्रह्मभावं प्राप्य, तदनन्तरं सर्वमुक्तौ स्वरूपेण अभिनिष्पद्यते - निर्वि-

शेषचिन्मात्रेणावस्थितो भवति इति श्रुत्यर्थं वर्णयन्ति । अत्र उपसंपद्येत्यत्र उत्तरकालीनत्वार्थकक्त्वाप्रत्ययानुपपत्तिशङ्कैव नोन्मेषं लभते इत्यवधेयम् ।

अत्रेयमपरा शङ्का समुन्मिषति - निर्गुणब्रह्मविद्याफलकथनावसरे 'जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा' इति श्रुतिवचनं न संगच्छते । मुक्तस्याशरीरस्य जक्षणक्रीडादीनामसंभवादिति । तत्र केचिदाचार्याः पूषानुमन्त्रणमन्त्राणामिव एषामपि फलवाक्यानां प्रकरणादस्मादुत्कृष्य, सगुणविद्याफलभूतब्राह्मलौकिकभोगप्रतिपादकवाक्यैः सह योजनं कार्यमिति मन्यन्ते । 'अविभागेन दृष्टत्वात्' (ब्र.सू. 4-4-4) इत्यधिकरणे, "स तत्र पर्येति इत्यादिफलस्य तु निर्गुणप्रकरणगतस्यापि 'मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके' इति ब्रह्मलोकसंबन्धादिलिङ्गात् सगुणविद्यासूत्कर्षः इति सिद्धान्तयति सूत्रकारः इत्याह समाधानार्थमिति ।" इति कल्पतरुः ।

अन्ये तु, वामदेवस्य ब्रह्मविद्यया सर्वात्मभावोऽभूदिति, 'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति ।'इत्यादिना बृहदारण्यके अभिहितम् । एवं ब्रह्मविद्यया सर्वात्मभावमापन्नः मुक्तः इन्द्रादिरूपेण जक्षणादिकं करोति इति जक्षदित्यादिश्रुतीनामर्थः । तथाच छान्दोग्यभाष्यम् — 'जक्षत् इन्द्राद्यात्मना' इति । इति वदन्ति ।

अपरे तु, अज्ञानिनामिव तत्त्वज्ञानिनामपि देहेन्द्रियमनोधियां प्रवृत्तिः निवृत्तिश्च भवत्येव । व्रात्यस्य श्रोत्रियस्य चाहारादौ यथा न भेदः तथैव । न च ज्ञानिनः भरतादेः प्रवृत्त्यभावः (उदासीनता) पुराणेषु श्रूयते इति वाच्यम् । 'जक्षत् क्रीडन् रममाणः' इति श्रुतिवाक्ये विदुषः जक्षणादिप्रवृत्तिरप्युक्ता वर्तते । तस्मात् विबुद्धोऽपि

प्रवर्तते, परन्तु ग्रन्थिभेदवान्। मूढस्तु प्रवर्तमानः ग्रन्थिमानिति विशेषः। तथाच विदुषः जीवन्मुक्तस्य चर्या जक्षदित्यादिनाऽभिहितेति वर्णयन्ति। तत्रैते चित्रश्लोका द्रष्टव्याः।—

प्रवृत्तौ वा निवृत्तौ वा देहेन्द्रियमनोधियाम्।
न किञ्चिदपि वैषम्यमस्त्यज्ञानिविबुद्धयोः। (चि-दी-267)
भरतादेरप्रवृत्तिः पुराणोक्तेति चेत्तदा।
जक्षत्क्रीडन्रतिं विन्दन्नित्यश्रौषीर्न किं श्रुतिम्॥
न ह्याहारादि सन्त्यज्य भरताद्याः स्थिताः क्वचित्।
काष्ठपाषाणवत्, किंतु सङ्गभीता उदासते॥ इति।

वस्तुतस्तु, अशरीरस्य गलाधोनयनादिकस्य मुख्यजक्षणादिकस्यासंभवात् जक्षत् इत्यादयः शब्दाः जक्षणाद्यभिव्यङ्ग्यसुखविशेषबोधकाः। समिद्भारं वहन् अध्वानं पश्यन् अधीयानो गच्छति इति वाक्यात् शतृशानज्-लडाख्यातानां श्रवणात् समिद्भारवहन-अध्वदर्शन-अध्ययन-गमनानां यौगपद्यं प्रतीयते। एवमत्र जक्षत् क्रीडन् रममाणः इत्यत्र शतृशानजादिश्रवणात् जक्षणक्रीडाद्यभिव्यङ्ग्यसुखविशेषाणां यौगपद्यं प्रतीयते। 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः ब्रह्मानन्दमहासमुद्रशीकरायमाणानां सर्वेषां सुखविशेषाणां तत्रान्तर्भावात् ब्रह्मानन्दानुभवी ज्ञानी यौगपद्येन सर्वानन्दविशेषानुभवी इत्युच्यते। तैत्तिरीयकेऽपि 'सोऽश्नुते सर्वान् कामान् सह' इति कामशब्दितानां सर्वेषामानन्दानां सह-शब्देन यौगपद्येनानुभवः अभिहितः। तत्र श्रुतौ सहशब्दस्य यौगपद्यार्थकतां वक्ति तदुपबृंहणरूपा

'सोऽश्नुते सकलान् कामानक्रमेण सुरर्षभाः।
विदितब्रह्मरूपेण जीवन्मुक्तो न संशयः॥'

इति सूतसंहिता। अत्र श्लोके सुरर्षभा इति संबोधनपदम्। एवमेव, प्रकृतविद्योपसंहारे, 'सर्वांश्च कामानाप्नोति यस्तमात्मानमनुविद्य विजा-

नाति' इति वाक्ये विजानाति - आप्नोति इति लडाख्याताभ्यां असंभवद्यौगपद्यानां सर्वेषां सुखानां यौगपद्यं, ब्रह्मसाक्षात्कारतुल्यकालत्वं च प्रतीयमानं साधु संगच्छते। साक्षात्क्रियमाणस्य ब्रह्मण एव सकलविषयसुखशीकरनिकरमहाम्बुधिरूपनिरतिशयसुखरूपत्वे तात्पर्यमवसेयमिति शिवम्।

इति फलवाक्यार्थनिरूपणं नाम एकादशं प्रसूनं समाप्तम्।

आश्चर्यानुसन्धानम्

द्वादशं प्रसूनम्

बृहदारण्यनिविष्टं विलुठितमाभीरवारनारीभिः ।

सत्यचिदानन्दघनं ब्रह्म नराकारमालम्बे ॥

भगवान् श्रीकृष्णः अर्जुनेन सह स्वस्य संवादात्मकगीताशास्त्रस्य पठनश्रवणादिकं ज्ञानयज्ञं ब्रूते । आत्मतत्त्वज्ञानिनं गीतासु बहुधा स्तौति च । 'बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।

वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ।

प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।

यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ इति ।

'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।'

सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' । इत्यादिना ज्ञानमपि प्रशंसति ।

ज्ञानिज्ञेयस्याऽऽत्मतत्त्वस्य, तत्साक्षात्कारस्य, तद्वत आत्मदर्शिनः, आत्मतत्त्वोपदेष्टुः, तदीयात्मतत्त्ववचनस्य, आचार्यमुखेनात्मतत्त्वश्रवणादिकं कुर्वतः ततोऽवगततत्त्वस्य चाश्चर्यत्वनिरूपणेनात्मनो दुर्बोधता-

मभिधाय, तथाविधात्मतत्त्वज्ञानलब्धये यथाधिकारं यत्नः कार्य इति अर्जुनं व्याजीकृत्योपदिशति गीतासु ।

'आश्चर्यवत्पश्यति कश्चिदेनं आश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद, न चैव कश्चित्'।। इति ।
प्रकृतः ज्ञेयः देही आत्मा, आश्चर्येण—अद्भुतेन तुल्यो वर्तते । तस्मिन् तत्स्वभावविरुद्धाः आविद्यका अनेके धर्माः प्रतीयन्ते । स्वयं सद्रूपः असद्रूपत्वेन भाति । देहाद्यतिरिक्तमात्मानमसन्तमेव मन्यन्ते चार्वाकादयः । स्वप्रकाशचैतन्यरूपः सन् जडत्वेन (चिद्भिन्नत्वेन) आनन्दघनः सन् दुःखितत्वेन, स्वयं विकाररहितः कूटस्थोऽपि विकारवत्त्वेन, नित्योऽपि देहाद्युत्पत्तिकाले जायमान इव, सदा प्रकाशमानोऽपि अप्रकाशमान इव, ब्रह्माभिन्नोऽपि ब्रह्मणो भिन्न इव, नित्यमुक्तोऽपि बद्ध इव, द्वितीयरहितोऽपि सद्वितीयत्वेन च विरुद्धानेकाकारतया प्रतीयते । अतः अद्भुतेन सदृशो वर्तते । अनेकजन्मार्जितसुकृतैः प्राप्तशमदमादिसाधनसंपन्नः चरमशरीरवान् (यस्य शरीरस्य पाते सति न शरीरान्तरपरिग्रहः, किन्तु विदेहकैवल्यमेव तादृशशरीरवान्) कश्चिदेव (न सर्वः) तं पश्यति ।

शास्त्रेण आचार्योपदेशेन च सर्वद्वैतनिषेधोपलक्षित-परमात्मस्वरूपमात्राकारायां तत्त्वमस्यादिवेदान्तमहावाक्यजन्यायां समस्तपुण्यसञ्चयफलभूतायां अन्तःकरणवृत्तिलक्षणायां प्रतिफलितंसमाधिपरिपाकेन साक्षात्करोति । अतः यः पश्यति सः अद्भुतेन तुल्यो वर्तते ।

ईदृशं दर्शनमपि लोके अपरिदृष्टं कार्यं करोतीति अद्भुतमिवाऽऽस्ते। अन्तःकरणवृत्तिरूपः साक्षात्कारः न पारमार्थिकः, अद्वैतहानि-

प्रसङ्गात् । अपितु अविद्याकार्यान्तःकरणवृत्तिरूपत्वादाविद्यकः । सोऽपि स्वस्मिन् प्रतिफलितं परमार्थस्वरूपमात्मानं व्यञ्जयति । एवं स्वस्य मूलभूतामुपजीव्यां हन्ति, समानाकारज्ञानाज्ञानयोर्विरोधात् - अविद्याकार्यमपि नाशयति । अविद्याकार्यत्वाविशेषात् स्वमपि नाशयति इत्येवं दर्शनमपि आश्चर्येण तुल्यं भवति । एवं यः पश्यति सोऽपि आश्चर्यवदेव । यद्यप्ययं आत्मतत्त्वसाक्षात्कारेण निवृत्ताविद्यः, तथापि प्रारब्धकर्मप्राबल्यात् अविद्यावानिब भाषते अज्ञैः सह रमते, । अथापि सः व्यामोहं न भजति । यदाहुः भगवत्पादाः जीवन्मुक्तानन्दलहर्याम् —

पुरे पौरान्पश्यन् नरयुवतिनामाकृतिमयान्
सुवेषान् स्वर्णालंकरणकलितान् चित्रसदृशान् ।
स्वयं साक्षात् द्रष्टेत्यपि च कलयन् तैः सह रमन्
मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ।। इति ।

प्रायेण समाधिस्थः आत्मानन्दमनुभवन्नास्ते । कदाचित् समाधेः व्युत्थितः कदाचित् विजने नदीतीरे शेते । यथाजातरूपधरोऽयं अवनिमास्तरणं कृत्वा बाहुमूलमुपधानीकृत्य अतिविस्तीर्णमाकाशं परिधाय विरतिनाम्नीं वनितामालिङ्गन् आनन्दपरवशः शेते । कदाचित् आत्मतत्वबोधकानि गायति, कदाचिदानन्दनारवश्येन यथेच्छं नृत्यति । यदाहुः सदाशिवब्रह्मेन्द्रसरसरस्वत्यः स्वविद्याविलासान् आत्मविद्याविलासे —

'तटिनीतटेषु तत्त्वं ध्यायन्नास्ते मुनिः कोऽपि ।
विपुलशिलातलफलके विमलसरिद्वारिपरिवृतोदारे ।
मन्दं मलयजपवने वाति प्रस्वपिति कोऽपि यतिराजः ।।

उपधाय बाहुमूलं परिधायाकाशमवनिमास्तीर्य ।
प्रस्वपति विरतिवनितां परिरभ्यानन्दपरवशः कोऽपि ।
'क्वापि ध्यायति, कुहचिद्गायति, कुत्रापि नृत्यति स्वैरम्' ॥
इत्यादि ।

सर्वैरपि दुष्प्रापस्य तत्त्वज्ञानस्य प्राप्त्या सकललोकस्पृहणीयः । अतः आश्चर्यवदेव तिष्ठति ।

इत्थं च आत्मा, तज्ज्ञानं, ज्ञाता चेति त्रयमपि आश्चर्यमिति आत्मा दुर्विज्ञेयः, अनायासेन ज्ञातुं न शक्यते इति प्रथमपादेन प्रदर्शितम् । अक्षरार्थस्तु, आश्चर्यवत् - आश्चर्यतुल्यतया दृश्यमानं एनं-देहिनमात्मानम्, आश्चर्यवत् पश्यति - आश्चर्यवदिति क्रियाविशेषणम् । आश्चर्यतुल्यं दर्शनं करोति । यः पश्यति सः आश्चर्यवत् - आश्चर्यतुल्यः ज्ञाता इति बोध्यः.

एवं, आचार्योपदेशेनैवात्मा अवगन्तव्यः । उपदेष्टा च दुर्लभत्वेनाश्चर्यसदृशः । नाज्ञः उपदेष्टा संभवति । ज्ञानी तु प्रायेण समाधौ आत्मसुखमनुभवन्नास्ते । यदि प्रारब्धवशात् समाधेः व्युत्थितो भवति, तदापि, अयं ज्ञानीति ज्ञातुं न शक्यते । 'अन्धवज्जडवच्चापि मूकवच्च महीं चरेत् ।' इति स्मृतेः जडादिवत् तस्य प्रतिभासात् । आह च भर्तृहरिः —

चण्डालः किमसौ द्विजातिरथवा शूद्रोऽथ किं तापसः
किंवा तत्त्वनिवेशपेशलमतिः योगीश्वरः को नु किम् ।
इत्युत्पन्नविकल्पजल्पमुखरैः संभाष्यमाणा जनैः
न क्रुद्धाः ... ... यान्ति स्वयं योगिनः ॥ इति
अवधूतकर्मजालः जडबधिरान्धोपमः कोऽपि ।
आत्मारामो यतिराडटवीकोणेष्वटन्नास्ते ॥

इति आत्मविद्याविलासः ।

कथंचिदयं ज्ञानीति विज्ञाय तमुपसृत्य तत्त्वोपदेशप्रार्थनायां कृतायामपि, अज्ञजनबुद्धिमनुसृत्य तेषामात्मतत्त्वोपदेशे क्लेशातिशयान्नोपदिशेत् ज्ञानी। अज्ञजनोपदेशेन पूजां धनलाभं ख्यातिं वा नापेक्षते। परंतु दुःखमनुभवतः अज्ञान् विज्ञाय तेषां दुःखनिदानाज्ञानापनोदनाय कारुण्येन केवलं तत्त्वं व्युत्थितो योगी उपदिशेत्। एतादृशश्चेश्वरतुल्यः उपदेष्टा अतिदुर्लभः आश्चर्यतुल्यः। अतोऽप्यात्मा दुर्विज्ञेयः।

एवं, उपदेष्टुः आत्मबोधकं वचनमपि आश्चर्यवदेव। शुद्धात्मा न शब्दगोचरः। 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'। इति श्रुतेः। केनापि शब्देनावाच्यस्यात्मनो वचनमाश्चर्यवदेव। तत्त्वमस्यादिमहावाक्यघटकतदादिपदं सर्वज्ञत्वादिकिंचिद्धर्मविशिष्टचैतन्यस्य वाचकम्। तेन निर्धर्मकस्य शुद्धस्यात्मनः शक्त्या बोधनं न संभवति। अतः जहदजहल्लक्षणया विशेषणांशं परित्यज्य विशेष्यचैतन्यमात्रस्वरूपं बोधनीयम्। लक्षणा नाम शक्यसंबन्धः। संसर्गरहिते शुद्धे आत्मनि संबन्धो न पारमार्थिकः, किन्तु कल्पितः। लक्षणया बोध्यमानस्य लक्ष्यस्य तीरादेरिव लक्ष्यतावच्छेदकधर्मः कोऽपि नास्ति। शब्दजन्यं स्वरूपमात्रावगाहि ज्ञानं निष्प्रकारकं - निर्विकल्पकं - साक्षात्कारि चेति महत्तीयमाश्चर्यपरंपरा।

अथवा, महावाक्यं अभिधानाभिधेययोः शक्ति, लक्षणां, अन्यद्वा संबन्धान्तरं विनैवाऽऽत्मतत्त्वं प्रतिपादयति। तदाश्चर्यवत्। शब्दस्य शक्तिरचिन्त्या। यतः प्रमाणान्तरजन्यविशिष्टबुद्धिसामान्यस्य बाधज्ञानप्रतिबध्यत्वेऽपि, वह्निना सिञ्चति इति शब्दात् सेचनं न वह्निकरणकमिति बाधज्ञाने सत्यपि वह्निकरणकसेचनशाब्दबोधो जायते। अत एव वह्निकरणकं सेचनं ब्रुवाणः वह्निना सिञ्चति इति वाक्यप्रयोक्ता उपहासपात्रं भवति। बाधज्ञानवतः श्रोतुः तद्वाक्यात् तादृशशाब्द-

बोधानुदये उपहासानुपपत्तेः । अस्तं गतोऽर्कः इत्यत्र बोद्धृवैशिष्ट्यात् संध्या उपास्या, नावो बन्धनीयाः इत्यादयो बहवोऽर्थाः प्रतीयन्ते । न चानेकेषामर्थानां बोधनात् वाक्यभेददोषोऽपि । एवं शब्दशक्तेरचिन्त्यत्वात् वैचित्र्यात् विनाप्यभिधानाभिधेयसंबन्धं महावाक्यमात्मतत्त्वं प्रतिपादयति । न च विनैव संबन्धं बोधनाङ्गीकारे अतिप्रसङ्गः स्यादिति वाच्यम् । लक्षणया बोधयतीति पक्षेऽपि शक्यसंबन्धात्मकलक्षणाया अनेकसाधारणत्वेनातिप्रसङ्गस्य तुल्यत्वात् । शक्यसंबन्धस्येतरसाधारण्येऽपि, यत्र तात्पर्यं तस्यैव शक्यसंबन्धिनः बोधः न सर्वस्येति तात्पर्यविशेषात् बोधनियमः इत्यप्यसंगतम् । तात्पर्यस्यापि सर्वान् प्रत्यविशेषात् । ननु कश्चिदेव शुद्धान्तःकरणः तात्पर्यविशेषमवधारयति, न सर्वः इति नातिप्रसङ्ग इति चेत् । संबन्धानपेक्षापक्षेऽपि पुरुषगतः निर्दोषत्वरूपः कश्चिद्विशेषः नियामकोऽस्ति । एवंच यादृशस्य शुद्धान्तःकरणस्य पुंसः तात्पर्यानुसन्धानपूर्वकं जहदजहल्लक्षणया वाक्यार्थबोधो जायते इत्यङ्गीक्रियते, तादृशस्यैव पुंसः अभिधानाभिधेयसंबन्धज्ञानं विनापि तत्त्वमस्यादिः केवलःशब्दः अखण्डसाक्षात्कारं जनयतीति न काप्यनुपपत्तिः । अस्मिन् पक्षे शुद्धस्यात्मनःलक्षणाख्यशब्दवृत्तिविषयत्वस्याप्यनङ्गीकारात् 'यतो वाचो निवर्तन्ते' इति सुतरामुपपन्नं भवति । विनैव संबन्धं प्रतिपादनं महदाश्चर्यं भवति । पक्षोऽयं वार्त्तिककारैः प्रपञ्चितः—

दुर्बलत्वादविद्यायाः आत्मत्वाद्बोधरूपिणः ।
शब्दशक्तेरचिन्त्यत्वाद्विद्मस्त मोहहानतः ॥
अगृहीत्वैव संबन्धमभिधानाभिधेययोः ।
हित्वा निद्रां प्रबुध्यन्ते सुषुप्ते बोधिताः परैः ॥

जाग्रद्वन्न यतः शब्दं सुषुप्तौ वेत्ति कश्चन ।
ध्वस्तेऽतो ज्ञानतोऽज्ञाने ब्रह्मास्मीति भवेत्फलम् ।

अविद्याघातिनः शब्दादहं ब्रह्मेति धीर्भवेत् ।
नश्यत्यविद्यया सार्धं हत्वा रोगमिवौषधम् ।। इत्यादिना ।

वचनविषयः, वक्ता, वचनक्रिया चेति त्रितयमपि अत्याश्चर्यरूपमिति, आत्मा दुर्विज्ञेयः इति द्वितीयपादेन निरूपितं भवति । अक्षरार्थस्तु, अन्यः— सर्वजनविलक्षणः, न तु आत्मदर्शिनः उक्तादन्यः तस्योपदेष्टृत्वासंभवात् । तथैव— यथादृष्टं तथैव, आश्चर्यवत् - आश्चर्यसदृशं (क्रियाविशेषणं), वदति सोऽपि आश्चर्यवदेव इति । पादद्वयेन शुद्धात्मनो द्रष्टा, वक्ता चोक्तः । तावुभावपि मुक्तौ । ताभ्यामन्यः- मुमुक्षुः आचार्योपसदनं कृत्वा तन्मुखेनात्मानं शृणोति वेदान्तवाक्यानां तात्पर्यनिर्णयेनात्मानमवधारयति । ततः मननादिपरिपाकात्, वेदापि - साक्षात्करोत्यपि । एवं श्रवणादिना इह जन्मन्येवावाप्तात्मसाक्षात्कारः आश्चर्यः । अनेकेषु जन्मसु अनुष्ठितसुकृतसञ्चयेन संक्षालितमनोमलस्य दुर्लभत्वात् ।

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ।।

इति भगवद्वचनात् ।

श्रवणादिसामग्रीमतोऽपि जन्मान्तरप्रापकप्रारब्धकर्मणा प्रतिबन्धे सति इह जन्मनि आत्मसाक्षात्कारो न जायते । भोगेन तादृशजन्मरूपप्रतिबन्धकक्षये, जन्मान्तरे एव जायते । 'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः' । इति स्मृतेः । अत एव श्रवणादिकमनुष्ठितवतोऽपि वामदेवस्य प्रारब्धकर्मप्रतिबन्धेन साक्षात्कारो न जातः । पुनः गर्भशय्यां गतः तेन क्षीणप्रतिबन्धः तदैव साक्षात्कारलाभेन सर्वात्मभावमवाप । श्वेतकेतोस्तु उद्दालकोपदेशानन्तरमेव प्रतिबन्धविरहेण

तस्मिन्नेव जन्मनि साक्षात्कारोऽजायत । 'तद्धास्य विजज्ञौ' इति श्रुतेः । 'ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्' इति व्याससूत्रमपि प्रतिबन्धक्षयापेक्षामेव साक्षात्कारोत्पत्तिं दर्शयति । अतः श्रवणादिपरिपाकेनेह जन्मन्येवावाप्तसाक्षात्कारः मुमुक्षुः दुर्लभत्वादाश्चर्यसदृशः । 'आश्चर्यो ज्ञाता कुशलानुशिष्टः' इति च श्रुतिर्वक्ति ।

'आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद इति भागस्यायमर्थः, अन्यः- उक्तात् आत्मदर्शिनः वक्तुश्च मुक्ताद्विलक्षणो मुमुक्षुः ब्रह्मविदं वक्तारमुपसंपन्नः एनं - आत्मानं शृणोति - श्रवणाख्यविचारविषयीकरोति । श्रुत्वा च मनननिदिध्यासनपरिपाकात् वेदापि - साक्षात्करोत्यपि आश्चर्यवत् इति ।

श्रवणादिसाधनसंपत्तेः सत्वादिहैव जन्मनि साक्षात्कारोदयस्यावर्जनीयतया कुतः आश्चर्यत्वमित्याशङ्क्याऽऽह न चैव कश्चिदिति । कश्चित् श्रवणादिकं कुर्वन्नपि एनं नैव साक्षात्करोति, प्रतिबन्धपरिक्षयाभावात्, अतः इहैव जन्मन्यवाप्तात्मसाक्षात्कारः आश्चर्यो भवति ।।

एतावता आत्मा दुर्विज्ञेयः इति प्रतिपादितम् ।

एवं, आत्मतत्वदर्शी देहादिपर्यन्तं भूतग्रामं अनृतस्वाप्नपदार्थवत् ऐन्द्रजालिकप्रदर्शितपदार्थवच्च पश्यति। कश्चित् तत्वज्ञानी भूतग्राममाश्चर्यवदेव वदति। यद्ययं प्रपञ्चः सत्यः स्यात् 'नेह नानाऽस्ति किञ्चन' इत्यादिश्रुतिभिः न बाध्येत । नरशृङ्गादिवदसंश्चेत् न प्रत्यक्षावभासविषयो भवेत् इन्द्रियसंनिकर्षाभावात् । एवं सत्वेन असत्वेन वा निर्वक्तुमशक्योऽपि, सदसद्विलक्षणः अनिर्वचनीयो मिथ्या इति लोकाप्रसिद्धरूपेणोपपादयति । सर्वव्यवहारास्पदस्य प्रपञ्चस्य एवं मिथ्यात्वोपपादनमत्याश्चर्यं भवति । एवं सर्वोऽपि प्रपञ्चमात्मभिन्नतया प्रत्यक्षेणावगच्छति। तत्त्वज्ञानी,प्रपञ्चोऽ-

यमात्मरूपः आत्मनो न भिन्नः, 'इदं सर्वं यदयमात्मा' इति प्रपञ्चस्य प्रत्यगनन्यत्वश्रवणादिति वदति । न चेयं श्रुतिः यजमानः प्रस्तरः इतिवत् उपचरितार्थेति वक्तुं शक्यते । 'आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितं भवति' इति एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपरोधापत्तेः । अतः अनात्मतयोपलभ्यमानस्यापि प्रपञ्चस्य प्रत्यगभिन्नत्वेन श्रवणमाश्चर्यं भवति । कश्चित्तु एनं - प्रपञ्चं प्रत्यगनन्यत्वेन श्रुत्वा स्वाप्नादिदृष्टान्तेनोपपाद्य ध्यात्वा साक्षात्कृत्यापि तीव्रविक्षेपे सति परिहीयमानप्रज्ञो भवति । अतश्च द्वैतप्रपञ्चमिथ्यात्वावबोधपूर्वकमात्मतत्त्वज्ञानमतिदुर्लभमित्येवंपरतयामि श्लोकमिमं व्याचक्षते । एनमित्यनेनास्मिन् व्याख्याने 'अव्यक्तादीनि भूतानि' इत्यव्यवहितपूर्वश्लोकोक्तः भूतग्रामः गृह्यते इति बोध्यम् ।

तथाचाद्वितीयशुद्धात्मतत्वस्यातिदुर्बोधत्वात्, तज्ज्ञानसंपादने यत्नः कर्तव्यः इति अर्जुनं व्याजीकृत्य भगवान् गीतासूपदिदेश । भगवदभिहितात्मतत्वज्ञानारोहणसोपानपरम्परायां यथाधिकारमारुह्य, तत्वज्ञानसंपादनेन भगवतः प्रिया भूत्वा वयममृता भवेमः इति शिवम् ।

इति तन्त्रार्थप्रसूनमालिकायां आश्चर्यानुसन्धानं नाम द्वादशं प्रसूनं समाप्तम् ।

ग्रामः कवेरजातीरे पण्डितग्राममण्डितः ।
शाहजीराजदत्त श्रीविशलूरिति विश्रुतः ॥ 1 ॥

दर्भङ्गानृपगान्यश्रीवेङ्कट्रामतनूभवः ।
छन्दोगवंशजस्तत्र सुब्रह्मण्याभिधो बुधः ॥ 2 ॥

परमाचार्यकरुणादृष्टिपातैरहर्निशम् ।
रक्षितोऽहं, महेशस्य दयामालम्ब्य शक्तितः ॥ 3 ॥

न्यायवेदान्तमीमांसाव्याकृतीनां महीरुहाम् ।
विद्वदाह्लादसन्दायितन्त्रार्थसुमसञ्चयैः ॥ 4 ॥

ग्रथितां मालिकामेतां जगद्गुरुपदाब्जयोः ।
भक्त्या समर्पये तेन सद्गुरुः संप्रसीदतु ॥ 5 ॥

इति भारतराष्ट्रपतिभिः साहित्याकादमिसंस्थया च संमानितैः, कुम्भघोणाद्वैतसभाप्रधानपण्डितैः न्यायवेदान्त वागीश-शास्त्ररत्नाकर-पण्डितराज वे. सुब्रह्मण्यशास्त्रिभिः विरचिता

तन्त्रार्थप्रसूनमालिका समाप्ता

शिवं भूयात्

